वसुदेवोग्रसेनाद्यैर्यदुभिस्तेर्चितान्नृपा श्रासन्नच्युतसंदर्शपरमानंदनिर्वृता: २२ भीष्मोद्रोणो
ऽम्बिकापुत्रोगांधारीससुतातथा सदारा:पांडवा:कुंतीसंजयोविदुर:कृप: २३ कुंतिभोजोविराटश्चभी
ष्मकोनग्नजिन्महान् पुरुजिद्द्रुपद:शल्योधृष्टकेतु:सकाशिराट् २४ दमघोषोविशालाक्षोमै
थिलोमद्रकेकयौ युधामन्यु:सुशर्माचससुताबाह्लिकादय: २५ राजानोयेचराजेंद्रयुधिष्ठिरमनु
व्रता: श्रीनिकेतंवपु:शौरे:सस्त्रीकंवीक्ष्यविस्मिता: २६ श्रथतेरामकृष्णाभ्यांसम्यक्प्राप्तसमर्हणा: प्रश
शंसुर्मुदायुक्तावृष्णीन्कृष्णपरिग्रहान् २७
र्ध्यं यस्यदैवमदक्षिणंप्रनानुकूलंतंस्वजनमपिसंगसुहृदादयोनानुस्मरंतिश्रतोममदैवंप्रतिकूलंयुष्माकंकोऽपराधइत्य
र्थ: १९ २० ईशवशत्वमेवाहकंसप्रतापिताइतिहेस्वस: एतर्ह्येवसंप्रत्येव २१ युधिष्ठिरंतुव्रताश्चराजेस्त्वयजिनत्वात् २२२३२४ रामः ९५

अन्योनिहतान्यथा ४ आगतं ज्ञानगम्यः भारतीभारतम् ५ सुचंद्रशुकसारणौः सहानिरुद्धोद्धारकाख्यायामास्तेनयाकृतवर्मा
वपूयपर्गसेनानी ६ देवधिष्ण्याभैर्विमानसंकाशैः नरलाम्लरंगास्तद्वत्प्लवगतिर्यंबातेः विद्याधरद्युभिर्विद्याधार

ईयेवं भगवान् रामो यत्राऽस्यदृष्टोपिकर्मणाः लोकस्यम्याहयनीशायपाल्मोः घायनुनये ४ महत्पार्तीर्थयाः
त्रायानत्रागमन्भारतीःप्रजाः ब्रह्मयज्ञतथाकूरवसुदेवाहुल्काद्यः ५ प्रद्युम्नारतान्छत्रस्वमघक्षपयि
लवः गदप्रद्युम्नसांबाश्वसुचंद्रशुकसारणौ आस्तेनिरुद्धोरक्षायांकृतवर्मावपूयपः ६ तेरथैर्देव
धिष्ण्याभैर्हयैश्चतरलप्लवैः गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ७ व्यरोचंत महातेजः पथिकां 78
वनमालिना दिव्यस्रक्वस्त्रसन्नाहाः कलत्रैः खेचराइव तत्रस्नात्वा महाभागाउपोष्यसुसमाहिताः
ब्राह्मणेभ्योददुर्धेनूर्वासःस्रक्रुक्ममालिनीः ८ रामह्रदेषुविधिवत्पुनराप्लुत्यवृष्णयः ददुः
स्वन्नंद्विजाग्र्येभ्यः कृष्णेनोभक्तिरस्त्विति ९ स्वयंचतदनुज्ञाताव्ष्णयःकृष्णदेवता भुक्त्वोपविविशुः
कामंस्निग्धच्छायांघ्रिपांघ्रिषु ११ तत्रागतांस्तेददृशुः सुहृत्संबंधिनोनृपान् मत्स्योशीनरकौशल
विदर्भकुरुसृंजयान् १२ कांबोजकेकयान्मद्रान् कुंतीनाहर्द्रकेरलान् अन्यांश्चैवात्मपक्षी
यान्परांश्चशतशोनृप नंदादीन्सुहृदोगोपान्गोपीश्चोत्कंठिताश्चिरं १३ अन्योन्यसंदर्शनह
र्षरंहसाःप्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः आश्लिष्यगाढंनयनैःस्रवज्जलाहृष्यत्वचोरुद्धगिरोययुर्मुदं

नि १ महातेजाः महाजसः दिव्याश्च ... ८ ९ पुनरन्वेष्यः प्राप्लुत्य ...
... ११ १२ १४ प्रोत्फुल्लहृद्वक्त्रसरो

भा.द.
६४

पक्षनृपानैःशनै आगमम्यस्यनजा यथासहबुभुजे ३८ श्रीकृष्णस्यैवंब्राह्मणपतानानिविचित्राणिनयाहतस्यापि ३९
अन्त्यैरजितिमिति स्वभृत्यैः पराजितं दृष्ट्वा ध्यानंतस्यवेगस्तेनोद्ग्रथितमात्मबंधनमहंकारोयस्यसः गतिंनित्यावियुक्त
लिंगधाममविरोधस्तांसतांब्राह्मणविदांप्राप्तमित्यर्थः ४० एतत्पृथुकोपाख्यानं कृत्वातत्रब्राह्मणविशेषतःकृतेति ४१
इति दशमे एकाशीतितमः हारीतितमआगत्यकुरुक्षेत्रंरविग्रहे वृष्णीन्द्रष्ट्वानुदाभूयास्यकुः कृष्णकथाः

इत्थंव्यवसितोबुद्ध्याभक्तोऽतीवजनार्दने विषयान्जाययात्यक्ष्यन्बुभुजेनातिलंपटः ३८ तस्यवैदेव 79
देवस्यहरेर्यज्ञपतेप्रभो ब्राह्मणाःप्रभवोदैवंनतेभ्योविद्यतेपरं ३९ एवंसविप्रोभगवत्सुहृत्तदादृष्ट्वा
स्वभृत्यैरजितंपराजितं तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धामलेभेचिरतःसतांगतिं ४० इतिश्रीभाग
वतेमहापुराणेदशमस्कंधेपृथुकोपाख्यानेएकाशीतितमोध्यायः श्रीशुकउवाच अथैकदा
द्वारकायांवसतोरामकृष्णयोः सूर्योपरागःसुमहानासीत्कल्पक्षयेयथा १ तंज्ञात्वामनुजाराजन्
पुरस्तादेवसर्वतः समंतपंचकंक्षेत्रंययुःश्रेयोविधित्सया २ निःक्षत्रियांमहींकुर्वन्रामःशस्त्र
भृतांवरः नृपाणांरुधिरौघेणयत्रचक्रेमहाह्रदान् ३

स्फिचः श्रीदामसुहृदेकरसः प्रकल्पैद्रुपदं भुविनंदादिसुहृदानंदीकुरुक्षेत्रंजगामसः कल्पक्षयेयथासर्वग्रास
इत्यर्थः १ ज्योतिर्विद्भिः कथ्यमानमादावेवज्ञात्वासमंतपंचकंकुरुक्षेत्रं २ अवृत्तस्यक्षत्रियवधस्यानन्वेनप
रशुरामस्याप्यपनुत्तिस्थानत्वेनवक्षेत्रस्यपापनिरामकत्वमाह निःक्षत्रियामितिद्वाभ्यां ३ रामःरामः राम.
६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निश्चिनोतिनिनूनमिति एतन्मेयतिरेषवासावहंचतस्यएतन्ममहतीर्विभूतिर्यस्यसंतस्यावलोकादन्यत् ३३ ननुसंवेदवलोकनमात्रे
रामहदैश्वर्यंयतवान् नहिंदनुभ्यदत्तमितिकिंनांवाचदत्तमाहनन्विति ननुमेसखासमक्षमभाषाराएवयाचि नेवयाचकायभूरि
वह्यपिदिशतेददाति अत्रहेतुः भूरिभोजः स्वयंनदेयंदेवंपर्जन्यवदीक्षमाणाइति अयमर्थः स्वयंगतावहूभोजः बहुभोज्याप्तकामत्वा
त्तलक्ष्मीलाभ्य अतोयथापारावारपरिपूरकोऽनिवेदयाम्यः पर्जन्यकदाचिदुपिवर्षमल्पमेवमन्यमानोलज्जयेवसमवर्षनरात्रौनिद्राणि
कर्षकक्षेत्रमाप्लावयति एवंश्रीकृष्णोपिस्वभोगापेक्ष्यातदेयमिंद्रादिपदमिरूपुष्टमन्वानः तस्यचभजनंबहुमन्यमानसमक्षसबुधा
राएवंददाति ३४ नदेवाहकिंचिदतिउरुबहुपिस्वदत्तंयत्किंचित्करोतिअल्पमन्यते सुहृत्कृतंफल्ग्वपितिबुच्छमपिभूरिकारिबहुमन्यत ४०

नूनंबतैतन्ममदुर्भगस्यशश्वद्दरिद्रस्यसमृद्धिहेतुः महाविभूतेरवलोकतोन्योनैवोपपद्येतयदूत्तमस्य ३३ नन्वब्रुवा
णोदिशतेसमक्षंयाचिष्णवेभूर्यपिभूरिभोजः पर्जन्यवत्तत्स्वयमीक्षमाणोदाशार्हकाणामृषभःसखामे
किंचित्करोत्युर्वपियत्स्वदत्तंसुहृत्कृतंफल्ग्वपिभूरिकारी मयोपनीतंपृथुकैकमुष्टिंप्रत्यग्रहीत्प्रीतियुतोमहा
त्मा ३५ तस्यैवमेसौहृदसख्यमैत्रीदास्यंपुनर्जन्मनिजन्मनिस्यात् महानुभावेनगुणालयेनविषज्जतस्त
त्पुरुषप्रसंगः ३६ भक्तायचित्राभगवान्हिसंपदोराज्यंविभूतीर्नसमर्थयत्यजः अदीर्घबोधायविचक्षणःस्व
यंपश्यन्निपातंधनिनांमदोद्भवं ३७

त्यर्थः अतएवमयाउपनीतंसमीतंनीतंप्रीतियुतःस्वयमेवप्रत्यग्रहीतवान् ३५ श्रीकृष्णस्यभक्तस्वभावास्संदृष्ट्वातज्जकिंप्रार्थयतेतस्यैति सौ
हृदंप्रेमचसख्यंहितासंसनंच मैत्रीउपकारकत्वंच दास्यंसेकत्वंतत्समाहारेकवचनं तस्यतत्संबंधिनोमेममस्यात्नतुविभूतिःकिंच महानुभा
वेनतेनविषज्जतःसंगंप्राप्नुवतस्तद्भक्तैःसंगःस्यादिति ३६ ननुभक्तेःफलंसंपदंप्राप्यपुनर्भक्तिःकिमितिप्रार्थ्यतेअतआ
निजस्य ... २१ विचित्रोपवनाद्यैःकथंभूतैः कूजद्द्विजकुलैराकुलैः तथाप्रोत्फुल्ला
निकुमुदादीनियेषुतानिवारीणियेषुतानितथाभूतैः २२ किंचजुष्टंभिःहरिणाक्षीभिर्वीक्षिणाभासांनानिभिः तदैश्वर्यंदृष्ट्वाचिंतकिंनवान
नमितिस्वरूपमभूदिति २३ अमरप्रभानतुल्यकांतयःप्रत्यगृह्णन्उपायनादिभिःदत्तवंत २४ उद्धुतोहर्षोयस्याःसाअतिसंभ्रमआद

इतितच्चिंतयंतंतप्राप्तोनिजगृहांतिकं सूर्यानलेंदुसंकाशैर्विमानैःसर्वतोवृतः २१ विचित्रोपवनोद्या
नैःकूजद्द्विजकुलाकुलैः प्रोत्फुल्लकमुदांभोजकल्हारोत्पलवारिभिः २२ जुष्टंस्वलंकृतैःपुंभिःस्त्रीभि
श्चहरिणाक्षिभिः किमिदंकस्यवास्थानंकथंतदिदमित्यभूत् २३ एवंमीमांसमानंतंनरानार्योमर
प्रभाः प्रत्यगृह्णन्महाभागंगीतवाद्येनभूयसा २४ पतिमागतमाकर्ण्यपत्न्युद्धर्षातिसंभ्रमा निश्च
क्रामगृहात्तूर्णंरूपिणीश्रीरिवालयात् २५ पतिव्रतापतिंदृष्ट्वाप्रेमोत्कंठाश्रुलोचना मीलिताक्ष्यन
मद्बुद्ध्यामनसापरिषस्वजे २६ पत्नींवीक्ष्यविस्फुरंतींदेवींवैमानिकीमिव दासीनांनिष्ककंठीनांम
ध्येभांतींसविस्मितः २७ प्रीतःस्वयंतयायुक्तःप्रविष्टोनिजमंदिरं मणिस्तंभशतोपेतंमहेंद्रभवनं
यथा २८ पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः पर्यंकाहेमदंडानिचामरव्यजनानिच २९ आ
सनानिचहैमानिमृदूपस्तरणानिच मुक्तादामविलंबीनिवितानानिद्युमंतिच ३० स्वच्छस्फटिककुड्ये
षुमहामारकतेषुच रत्नदीपाभ्राजमानाललनारत्नसंयुताः ३१ विलोक्यब्राह्मणस्तत्रसमृद्धीःसर्व
संपदां तर्कयामासनिर्व्यग्रःस्वसमृद्धिमहैतुकीं ३२

रायस्यासाअथालयात्कवलयात् रूपधारिणीश्रीरिवस्वर्गस्यतत्रभागवतांश्रीनिर्वात्स्वर्गिणामिवतयोरूपंवभूवेतिभावः २५
बुद्ध्याअथयमेवबंध्यइतिनिश्चयेनमनसासंकल्पेन २६।२७।२८ यत्रमंदिरेपयःफेननिभाःशय्याआस्तरणानिन्यादिसंपदः तत्रसर्व
संपदःसमृद्धीर्विलोक्यतर्कयामासेतिचतुर्थेनान्वयः यत्रचदांताःगजदंतमयाःपर्यंकाः २९ यत्रमासनानिचमृदून्यूपस्तरणानि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वर्गतं स्वर्गवासिनः १२ श्वोभूते ऽङ्घ्रिते रवौ विश्वं भावती भावः नेनेति पुरतो भाविनमिंद्र दुर्लभं विभवं स्वचयति
स्वसुखेन स्वानंदपूर्णोनेति दानो दीनता दर्शयति नंदितो विनयोक्तिभिः १३ क्रीडितः स्वचितः कार्जरपनल
र्जितः श्रीकृष्णस्य दर्शनेन निर्वृतः १४ निर्वृतिमेवाह अहो श्रुति चतुर्भिः यतः यतः लक्ष्मीमुरसि बिभ्रता श्लिष्टो

इत्थं विचिंतयन् वसनाच्चीरबद्धान् द्विजन्मनः स्वयं जहार किमिदमिति पृथुकतंडुलान् ८ नन्वे
तदुपनीतं मे परमप्रीणनं सखे तर्पयंत्यंग मां विश्वमेते पृथुकतंडुलाः ९ इति मुष्टिं सकृज्जग्
ध्वा द्वितीयां जग्धुमाददे तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः १० एतावतालं विश्वात्मन् स
र्वसंपत्समृद्धये अस्मिन् लोकेऽथवामुष्मिन् पुंसस्त्वत्तोषकारणं ११ ब्राह्मणस्तां तु रजनीमुषि
त्वाच्युतमंदिरे भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतं यथा १२ श्वोभूते विश्वभावेन स्वसुखेनाभिवं
दितः जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः १३ स चालब्ध्वा धनं कृष्णात् न तु याचितवान् स्वयं
स्वगृहान् व्रीडितोऽगच्छन्महद्दर्शननिर्वृतः १४ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया यद्दरि
द्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि १५ क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ब्रह्मबंधु
रिति स्माहं बाहुभ्यां परिरंभितः १६ निवासितः प्रियाजुष्टे पर्यंके भ्रातरो यथा महिष्या वीजितः श्रां
तो बालव्यजनहस्तया १७ शुश्रूषया परमया पादसंवाहनादिभिः पूजितो देवदेवेन विप्रदेवेन देववत् १८ अधनोयं
न १९ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनं
...इति कारुणिको नूनं धनं मे भूरि नाददात् ... पश्यति स्वर्गापवर्ग

भा॰ द॰ ८२ स्वकामिनितंमस्युतगच्छ्रत्युकतंडुलान् क्षिपन् निमिलवानिंद्र दुर्लभांतु न दास्यमे सकथयन् सुखगोष्ठीं कुर्वन् सर्वभूतानां
मनसोभिज्ञः मद्दर्शप्रथुकानानीय दातुं लज्जत इति जानन्निमर्थः १ प्रहसन् प्रेम्णा लीलां कुर्वन् २ लज्जयान्वकथयत् लमयानुदत्ता
हस्त एव पीतिताभ्यां ३ ७ सर्वभूतानामात्मदृक् अंतःकरणसाक्षी ६ अमर्त्यानां देवानामपि दुर्लभाः ७ अतिगीर्णा न्याहसनस्य

श्रीशुक उवाच स इत्थं द्विजमुख्येन सह संकथयन् हरिः सर्वभूतमनोभिज्ञः स्मयमान उवाच तं १ ब्रह्म
ण्यो ब्राह्मणं कृष्णो भगवान् प्रहसन् प्रियं प्रेम्णा निरीक्षणेनैव प्रेक्षन् खलु सतां गतिः २ श्रीभगवानु
वाच किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ३ भूर्यप्य
भक्तोपहृतं न मे तोषाय कल्पते पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्ना
मि प्रयतात्मनः ४ इत्युक्तोपि द्विजस्तस्मै व्रीडितः पतये श्रियः पृथुकप्रसृतिं राजन् न प्रायच्छदवा
ङ्मुखः ५ सर्वभूतात्मदृक् साक्षी तस्यागमनकारणं विज्ञायाचिंतयन्नायं श्रीकामो माभजत्पुरा
६ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ७
इत्थं विचिंत्य वसनाच्चीरबद्धान् द्विजन्मनः स्वयं जहार किमिदमिति पृथुकतंडुलान् ८ नन्वेतदुपनी
तं मे परमप्रीणनं सखे तर्पयंत्यंग मां विश्वमेते पृथुकतंडुलाः ९ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धु
माददे तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः १० एतावतालं विश्वात्मन् सर्वसंपत्समृद्धये अस्मिन् लो
केऽथवामुष्मिन् पुंसस्त्वत्तोषकारणं ११

सुतस्तन्मध्ये धीरे रावद्धान् ८ अंग हे सखे मां विश्वात्मानं मां ९ इति वदन् लोकानुविंजग्धान् तत्परेति अयं भावः एतावता
पुंसः इहामुत्र च ननु कदाचिद्विलासभूतानां सर्वसंपदां समृद्धये अलं अतः परं द्वितीया मुष्टिः नेन मम मामेन द धीनां श्राम: ८२
कुर्विति १० त्वत्तोषकारणं तत्तोषस्य कारणं यथा भवेत् तथा सर्वसंपत्समृद्धये यां भक्तस्य समृद्धि दत्तवान् त्वं तथैव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निम्नं कूलं न तं उन्नतं जलमयं तं ३७ अंबुनां संप्लवः आभिमुख्येन वर्षा यस्मिन्तेकोदके तस्मिन्वन इत्यर्थः परिबभ्रिम भ्रमन्तोऽस्म

स्माढाताः परिपश्चितः बभ्रिम इडागमः छांदसः आत्मानं पृष्ठ न वेत्त इत्यर्थः ३६ ३९ उच्चावचं पयाग्लोकयन्नीपयाव यकृतार्थो

इत्याह अहो इति आत्मा देहः ४० गुरोर्निष्कृतं प्रत्युपकारः सर्वार्थं यो यस्मात् सर्वात्मा देहस्तयोर्यदर्पणं विनियोगः ४१ अया

तयामानि यातो यामो यस्य य कस्यान्तस्य न कृतसारं भवति न हदन्यदपि गतसारं गौरवार्कन्यायातयामपि न्युच्यते ८४

सूर्यश्चास्तं गतस्तावत्तमसा चावृता दिशः निम्नं कूलं जलमयं न प्राज्ञायत किंचन ३७ वयं भृशं तत्र

महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे दिशोऽविदंतोऽथ परस्परं वने गृहीतहस्ताः परिब

भ्रिमातुराः ३८ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदा

तुरान् ३९ अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ४०

एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतं यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ४१ तुष्टोऽहं भो

द्विजश्रेष्ठाः सत्याः संतु मनोरथाः छंदांस्ययातयामानि भवंत्विह परत्र च ४२ इत्थंविधान्यनेका

नि वसतां गुरुवेश्मसु गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशांतये ४३ ब्राह्मण उवाच किमस्माभिरनि

र्वृत्तं देवदेव जगद्गुरो भवता सत्यकामेन येषां वासो गुरावभूत् ४४ यस्य छंदोमयं ब्रह्म देह आवप

नं विभो श्रेयसां तस्य गुरुषु वासोऽत्यंतविडंबनं ४५ इति श्रीभा॰ मा॰ दशमस्कंधे अशीतितमोऽध्यायः

[illegible] इत्यर्थः ४३ इत्यंविधानि एवं प्रकाराणि अनेकानि किं त्वयास्मर्यत इति शेषः [illegible]

[illegible] भवता [illegible] ४४ भवतस्तु सर्वमेतद्विडंबनमात्रं

भा॰पु॰ ८१ नोऽधायि यः पतो गुरुर्वेदितव्यं पदं तमसः संसारस्य ३१ ननु आत्मज्ञानप्रदस्य गुरोरत्यंतं पूज्यत्वं न तु पुरुषस्य तीर्थगुरुत्वादित्याह सवा

इति इह संसारे यत्र संभवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यकर्मविद्याप्रदं गुरुमाह द्विजातेः सतः पुंसः सत्कर्मणां यत्र संभवः उपनीय

वेदाध्यापक इत्यर्थः स द्वितीयो गुरुः यथा हमिश्वरस्तथा पूर्वस्मादपि पूज्य इत्यर्थः ब्रह्मविद्याप्रदं गुरुमाह आश्रमिणां सर्वेषामपि ज्ञानदो यः स

तु शान्ताद हमेवेति ३२ अतो ज्ञानप्रदं गुरुरूपं मामाश्रित्य ये संसारं तरंति ते बुद्धिमन्त इत्याह नन्विति हे ब्रह्मन्तेन वर्णाश्रमवतां मध्ये येऽर्थकोविदाः ३

कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नो यतः द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ३१ स वै स

त्कर्मणां साक्षाद्द्विजातेरिह संभवः आद्योऽङ्ग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ३२ नन्वर्थ ८५

कोविदा ब्रह्मन्वर्णाश्रमवतामिह ये मया गुरुणा वाचा तरंत्यंजो भवार्णवं ३३ नाहमिज्याप्रजा

तिभ्यां तपसोपशमेन वा तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ३४ अपि नः स्मर्यते ब्रह्मन्वृत्तं नि

वसतां गुरौ गुरुदारैश्चोदितानामिंधनानयने क्वचित् ३५ प्रविष्टानां महारण्यमपर्तौ सुमहद्द्वि

ज वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ३६

हमनुष्यजन्मनि तत्रापि वर्णाश्रमन्वेसति ये मया गुरुणा गुरुरूपेणाध्यका वाचा उपदेशेन मात्रेणांजः सुखेनैव भवार्णवं तरंती

निहानं प्रदातुरोरधिकः सोऽन्यो नास्तीत्युक्तं ३३ अतस्तन्नड्जनादुधिको धर्मश्च नास्तीत्याह नेति इह स्यधर्मः प्रजातिः प्रक

ष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्षते ताभ्यां तथा तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वर

तथा न तुष्येयं यथा सर्वभूतात्मापि गुरुशुश्रूषया ३४ किंच अस्माकं गुरुशुश्रूषणं किमपि दैवाद्देवसंपन्नं तत्किं त्वया स्मर्यत इति

पृच्छति अपिन इति गुरौ निवसतामस्माकं यत्किमपि वृत्तं तत्र क्वचित्कदाचित् ३५ अपर्तौ अपगते ऋतावकाल इत्यर्थः शीत राम: ८१

श्च वर्षं च तयोः समाहारः स्तनयित्नवो गर्जितानि वा भवत् ३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

८६

२१२२ धनिभिः सिरभिः शांततंव्याप्तं २३ अव धूतं मलिनं २४ विस्मयमाह किमनेनेति द्वाभ्यां २५ संभ्रमतः सम्मानितः २६ सतो वसतो गृहे गृहीत्वा २७ भार्याकृतायरिरंसितानवेतिगृहस्थलिंगदर्शनात् भोगदर्शनात् संशयादिवप्रश्नः २८ अप्रतिषेधाद्वाहमनुमतं मत्वा हृष्टाय इति नहिनेवितंनूनमकामविहितं कामेर्विहतं नभवतीति मे विदितं तत्पाहितं धनेषु वस्त्रादि

अथ हि श्रीहरसाराजन् भगवान् लोकपावनः आलिंपदिव्यगंधेन चंदनागरु कुंकुमैः २१ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा अर्चित्वा वेष्टनांबूलं गां च स्वागतमब्रवीत् २२ कुचैलं मलिनं साधिं द्विजं धमनिसंततं देवीपर्यचरत् स्वेव्या चामर व्यजनेन वै २३ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना विस्मितो भूदतिप्रीत्या अवधूतं सभाजितं २४ किमनेन कृतं पुण्यं मवधूतेन भिक्षुणा श्रिया हीनेन लोके स्मिन् गर्हितेनाधमेन च २५ योसौ त्रिलोकगुरुणा श्रीनिवासेन संभ्रतः पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा २६ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः आत्मनो ललिता राजन्‌ करौ गृह्य परस्परं २७ श्रीभगवानुवाच अपि ब्रह्मन् गुरुकुलात् भवता लब्धदक्षिणात् समावृत्तेन धर्मज्ञ भार्योढा सदृशी नवा २८ प्रायो गृहेषु ते चित्तमकामविहितं तथा नैवातिप्रीयसे विद्वन् धनेषु विदितं हि मे २९ केचित्कुर्वंति कर्माणि कामैरहतचेतसः त्यजंत्यप्रकृतीर्देवीर्यथाहं लोकसंग्रह ३०

भा॰ उ॰ ६० भोजनं च स्वं धके इ्रइति तत्र स्त्रीकारमात्रेण सर्वने दास्यं निमीभावः नान्यभीष्टान् परिमाकविरसत्वात् ११२२ अप्यः स्त्रिकिमस्त्रीनि प्रश्नः १३ १४ महममम १५ गुल्मानि रक्षार्थ सैन्यस्थानानि कक्षाः प्रतोलिः अतिपायतिक्रम्यनगामसः द्विजैः सहितः ततश्च आगम्याः दुर्गमायें धकाव स्मयते यांगहेषु १६ तयाहरे अष्टसहस्राणां महिषीणां वेश्म

८७

अस्ति पुत्राहारस्तम्भं भोजकस्य पके स्वहः स्मरतः पादकमलमात्मानमपि यच्छति किं त्वर्थकामान्‌ भजतो नात्यभीष्टान् जगद्गुरुः ११ स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदुः अयं हि परमो लाभ उत्तमश्लोकदर्शनं १२ इति संचिन्त्य मनसा गमनाय मतिं दधे अप्यस्त्युपायनं किंचिद् गृहे कल्याणि दीयतां १३ याचित्वा चतुरो मुष्टीन् विप्रान् पृथुकतण्डुलान् चैलखण्डेन तान् बद्ध्वा भर्त्रे प्रादादुपायनं १४ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन्‌ १५ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्द्विजः विप्रोगम्यान्धकवृष्णीनां गृहेष्वच्युतधर्मिणां १६ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः विवेशैकतमं श्रीमत्‌ ब्रह्मानंदं गतो यथा १७ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा १८ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः प्रीतो व्यमुञ्चदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः १९ अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणं उपहृत्यावनिज्यास्य पादौ पादावनेजनी २०

गृहास्ते पुत्र च मध्ये श्रीमन्‌ एकतमं गृहं विवेश आनंदमग्नः सद्द्विजो ब्रह्मानंदं गतो यथा वभूवेति शेषः १७ पर्यग्रहीत् पर्यरंभत् १८ अब्बिंदून् आनंदाश्रुकणान् १९ समर्हणं उपायनं उपहृत्य समर्पयादावनेजनीरप २० रामः रामः रामः रामः रामः

उत्तमश्लोकस्य सत्यो मनोहराः विषयवैतृष्ण्यजनिकाः कथा विशेषज्ञः सारवित् विषण्णः विषयाविषादं प्राप्तः २ कथाश्रवण
स्तवनं दृष्टान्ततया ऽन्यार्थे नो हस्तवागिति तावेव करौ यौ तत्कर्मकर्तारौ तदेव मनः स्थिरजंगमेषु वसन्तं तं स्मरेत् तत्पुण्य
कथाः शृणोति स एव कर्णः उभयलिंगं स्थिरजंगमं च तस्मै उभयलिंगमिति मत्वा आनमेत् तदेव शिरः तदेव त

को नु श्रुत्वाऽसकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः विरमेत विशेषज्ञो विषण्णः काममार्गणैः २ सा वा ४४
ग्यया तस्य गुणान् गृणीते करौ च तत्कर्म करौ मनश्च स्मरेद्वसन्तं स्थिरजंगमेषु शृणोति तत्पुण्य
कथाः स कर्णः ३ शिरस्तु तस्योभयलिंगमानमेत्तदेव यत्पश्यति तद्धि चक्षुः अंगानि विष्णोरथ
तज्जनानां पादोदकं यानि भजन्ति नित्यं ४ सूत उवाच विष्णुरातेन संपृष्टो भगवान्बादराय-
णिः वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ५ श्रीशुक उवाच कृष्णस्यासीत्सखा कश्चिद्ब्र-
ह्मणो ब्रह्मवित्तमः विरक्त इंद्रियार्थेषु प्रशान्तात्मा जितेंद्रियः ६ यदृच्छयोपपन्नेन वर्तमानो
गृहाश्रमी तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ७ पतिव्रता पतिं प्राह म्लायता वदनेन
सा दरिद्रा सीदमाना सा वेपमानाभिगम्य च ८ ननु भगवन् भगवतः सखा साक्षाच्छ्रियः पतिः ब्र
ह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः ९ तमुपैहि महाभाग साधूनां च परायणं दास्यति द्रवि
णं भूरि सीदते ते कुटुंबिने १० ५८ धा

स्थिरलिंगमिति ... यत्पश्यति तदेव चक्षुः नान्यत् अंगानि यानि पादोदकं भजन्तीति ४ ... कुचैलाः किंच क्षुत्क्षामा ... किंचि [illegible]

भा॰ द॰
७९
२२ विनशनं कुरुक्षेत्रं २३ विवदन्तौ कुः मिथः किंचिद् ... [illegible] २४ अन्योन्यः परा[illegible] संग्राम

कृत्वा द्विजैः कृष्यमाणं कुरुपाण्डवसंयुगे सर्वराजन्यनिधनं भारस्येनेहृतं भुवः २२ स भीमदुर्योध
नयोर्गदाभ्यां युध्यतोर्मृधे वारयिष्यन्विनशनं जगाम यदुनन्दनः २३ युधिष्ठिरस्तु तं दृष्ट्वा यमौ
कृष्णार्जुनावपि अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः २४ गदापाणी उभौ दृष्ट्वा संरब्धौ
विजयैषिणौ मण्डलानि विचित्राणि चरन्ताविदमब्रवीत् २५ युवां तुल्यबलौ वीरौ हे राजन् हे वृ 89
कोदरः एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं २६ तस्मादेकतरस्येह युवयोः समवीर्य
योः न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः २७ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् अनुस्म
रन्तावन्योन्यं दुरुक्तं दुष्कृतानि च दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ उग्रसेनादिभिः प्रीतैर्ज्ञा
तिभिः समुपागतः २९ तं पुनर्नैमिषं प्राप्तमृषयोऽयाजयन्मुदा क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखि
लविग्रहः ३० तेभ्यो विशुद्धविज्ञानं भगवान्व्यतरद्विभुः येनैवात्मन्यदो विश्वमात्मानं विश्व
गं विदुः ३१ स्वपत्न्यावभृथस्नातो ज्ञातिबन्धुसुहृद्वृतः रेजे स्वज्योत्स्नयेवेन्दुः सुवासाः सुष्ठ्व
लंकृतः ३२ ईदृग्विधान्यसंख्यानि बलस्य ... अनंतस्याप्रमेयस्य ... स दयितो भवेत् ३४ इति श्रीभागवते महा
पुराणे दशमस्कन्धे ... ऊनाशीतितमोऽध्यायः राजोवाच भगवन्यानि यान्यासन्नि मुकुन्दस्य महात्मनः
वीर्याण्यनन्तवीर्यस्य श्रोतुमिच्छामहे प्रभो १

२७ यागतः संगतः २९ क्रत्वंगं यज्ञमूर्तिं ३० आत्मनि अधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव विदुः परस्परं तेन [illegible]
व्यतरत् अदात् ३१ ३२ इति श्रीधरस्वामि ... ७९ अशीतितमे ... श्रीदामा ... [illegible] राम॰
शरीर मारको हरिः पुरा ... रामचरितानन्तरं ... मुकुन्द ... भगवन् ... ७९

किंनरस्वरः पत इति श्रास्रवत् उद्गात ९ अनुस्रोतेन अनुलोमतः पुलहाश्रमं हरिक्षेत्रं १० गोमत्यां गंडकीं विपा-
शायां च स्नात्वा शोणे च प्लुतः इष्ट्वा संपूज्य १२ श्रीशैलं श्रीपर्वतं १३ कांचीपुरी १४ दक्षिणामथुरां १५

अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ९ अनु-
स्रोतेन सरयूं प्रयागमुपगम्य सः स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं १० गोमतीं गंडकीं स्नात्वा
विपाशां शोण आप्लुतः गयां गत्वा पितॄनिष्ट्वा गंगासागरसंगमे ११ उपस्पृश्य महेंद्राद्रौ रामं
दृष्ट्वाभिवाद्य च सप्तगोदावरीं वेणां पंपां भीमरथीं ततः १२ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशा-
लयं द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः १३ कामकोष्णीं पुरीं कांचीं कावेरीं च सरिद्वरां श्रीरंगाख्यं
महापुण्यं यत्र संनिहितो हरिः १४ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा सामुद्रं सेतुमगमत् महापा-
तकनाशनं तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः कृतमालां ताम्रपर्णीं मलयं च कुलाचलं १६ तत्रा-
गस्त्यं समासीनं नमस्कृत्याभिवाद्य च योजितस्तेन चाशीर्भिरनुज्ञातो गतोऽर्णवं दक्षिणं तत्र कन्या-
ख्यां दुर्गां देवीं ददर्श सः १७ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं विष्णुः संनिहितो यत्र स्नात्वास्प-
र्शद्गवायुतं १८ ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान् गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र
धूर्जटेः १९ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं
२० प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् २१

प्रथमं तावदपेक्षितं कर्तव्यं कथयंति इल्वलस्येति द्वाभ्यां ३७ प्रायश्चित्तमाह भारतमिति [illegible] २० २१ रामः रामः
नादि दुरात्मविप्रोपादे कार्यं मात्र मुक्तमित्यविध सुसमाहितः कामाकादिरहितः चरित्वा [illegible] ३९ इति दशमे ऽ०

ऋषय ऊचुः इल्वलस्य सुतो घोरो बल्वलो नाम दानवः स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ३७ तं
पापं जहि दाशार्ह तन्नः शुश्रूषणं परं पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं ३८ ततश्च भारतं
वर्षं परीत्य सुसमाहितः चरित्वा द्वादश मासांस्तीर्थस्नायी विशुध्यसे इति श्रीभागवते महापुराणे
दशमस्कंधे बल्वलवधे ऽष्टसप्ततितमोऽध्यायः श्रीशुक उवाच ततः पर्वण्युपावृत्ते प्रचंडः पांसुवर्षणः
भीमो वायुरभूद्राजन् पूयगंधस्तु सर्वशः १ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितं अभवद्यज्ञ-
शालायां सोऽन्वदृश्यत शूलधृक् २ तं विलोक्य बृहत्कायं भिन्नांजनचयोपमं तप्तताम्रशिखा-
श्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ३ सस्मार मुसलं रामः परसैन्यविदारणं हलं च दैत्यदमनं ते तूर्णमु-
पतस्थतुः ४ तमाकृष्य हलाग्रेण बल्वलं गगनेचरं मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः सोऽपतद्भु-
वि निर्भिन्नललाटोऽसृक् समुत्सृजन् मुंचन्नार्तस्वरं शैलो यथा वज्रहतोऽरुणः ६ संस्तुत्य मु-
नयो रामं प्रयुज्यावितथाशिषः अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा ७ वैजयं-
तीं ददुर्मालां श्रीधामाम्लानपंकजां रामाय वाससी दिव्ये दिव्यान्याभरणानि च ८

सप्ततितमः ऋनाशीतितमे रामो बल्वलं हि जनुष्टये निहत तीर्थस्नानाद्यैः स्तुतः [illegible] उपावृत्ते प्राप्ते १२ भिन्नांजनवि-
रोजिनचयः उपमा यस्य तं प्रतिकृष्य समित्यर्थः तप्तताम्रवत् शिखाः श्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य तं
३ अरुणो रुधिरेणादेहः शैलो धातुभिः ६ ७ श्रियो धामानि अम्लानानि पंकजानि यस्यां तं ८ रामः रामः रामः रामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मविद्येऽपि किं ममेश्वरस्येति चेत् सत्यमेवं तथापि प्रायश्चित्तं कर्तव्यमित्याशयेनाह। योगेश्वरस्येति साऽर्द्धेन अन्त्यो योगाल
यानहं तस्य इत्यादिलक्षणाः तथाप्येतस्य ब्रह्महत्यापापावनप्रायश्चित्तं हलोकपावनं मुलन्यचोदितः स्वयमेव भवान् यदि कं
दिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथेति ३१ न यस्येति विधिं प्रायश्चित्तं प्रथमेकस्य मुख्यं विधीयतां उपदिश्यतां
३२ किंच वर्तेहमुनयः एतस्य दीर्घमायुः सत्त्वबलं इन्द्रियं तत्पाठवं अन्यत् यद्वच्छिराः सात्त्विकमपेक्षितं तत्र ब्रह्मसवे ३३ सु
त्वादीनां सत्यता यथा भवेत् अस्माकं च वचः सत्यं यथा भवेत् यथा भवेत् यथा विधीयतामित्यर्थः ३४ तथा सत्यपादपत्राहम्

योगेश्वरस्य भवतो नाम्नायोऽपि नियामकः यद्यपि तद्ब्रह्महत्यायाः पवनं लोकपावनः चरिष्यति भवान् लोक
संग्रहो नान्यचोदितः श्रीभगवानुवाच करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया नियमः प्रथमे क
ल्पे यावान् स तु विधीयतां ३२ दीर्घमायुर्बतैतस्य सत्त्वमिन्द्रियमेव च आशासितं यत्तद्ब्रूत साधये यो
गमायया ३३ ऋषय ऊचुः अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च यथा भवेद्वचः सत्यं तथा राम वि
धीयतां ३४ श्रीभगवानुवाच आत्मा वै पुत्र उत्पन्न इति वेदानुशासनं तस्मादस्य भवेद्वक्ता आयुरिन्द्रियस
त्ववान् ३५ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ अजानतस्त्वपचितिं यथा मे चिन्त्यतां बुधाः

३६

गादंगात्संभवसि हृदयादभिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यादि वेदानुशासनं वेदवचनं तस्मादस्य रोमह
र्षणस्य पुत्रः उग्रश्रवाः भवतां पुराणप्रवक्ता भवेत् सर्वमायुरादिमांश्च भवेत् सर्वमायुरादिमांश्च भवेत् सूतः साक्षादजीवना
...सम्यग्भविष्यति ...न्यनस्यादिति भावः ३५ प्रथमं तावद्यदपेक्षितं कथयतेत्...

भा.ट.
८७
अभिप्रेत्य श्रीराम इति तात्वा २१ महर्षेर्व्यासस्य २२ सूतं प्रतिलोमजं जनकं प्रह्वणामं जितिस्वयेन तांश्च आसीनं वतान् तेभ्यो
वृद्धैरासीनमित्यर्थः २३ २४ अजानन्त्र व्यास इति चेत् तेनैव मित्याह कृतपरीक्षि २५ ननु वध्वनः कथमेवं कुर्याद्यत्राह अदांतस्य
तिगुणाय विताय व्याख्याय २६ विप्रान व्यासं अतः किं चित्करोत्तु किं तेनेति चेत् अतमाह एतत् दर्पहति धर्मध्वजिनः उ

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः अभिनंद्य यथान्यायं प्रह्वस्योत्थाय वार्चयन् सोऽर्चितः सप
रिवारः कृतासनपरिग्रहः रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत २२ अप्रत्युत्थायिनं सूतमकृत
प्रह्वणांजलिं अध्यासीनं च तान्विप्रान् कोपादुद्वीक्ष्य माधवः २३ यस्मादसाविमान्विप्रानध्यास्ते
प्रतिलोमजः धर्मपालांस्तथैवास्मान्वधमर्हति दुर्मतिः २४ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य
च इतिहासपुराणानि धर्मशास्त्राणि सर्वशः २५ अदांतस्याविनीतस्य वृथा पंडितमानिनः न गु
णाय भवंति स्म नटस्येवाजितात्मनः २६ एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः वध्या मे धर्मध्व
जिनस्ते हि पातकिनोऽधिकाः २७ एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि भावित्वात्तं कुशाग्रेण
करस्थेनाहनत्प्रभुः २८ हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः ऊचुः संकर्षणं देवमधर्मस्ते कृतः
प्रभो २९ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन आयुश्चात्माक्लममेतावत्पावत्सत्रं समाप्यते अजान
नतैवाचरितस्त्वया ब्रह्मवधो यथा ३०
तमलिंगधारिणः २७ भावित्वादिति नहि भवितव्यं केनापि परिहर्तुं शक्यत इत्यर्थः अहनत् अहन २८ तेन्वया २९ अधार्मिकं
प्रतिलोमजवधः को मम धर्म इति चेत्ता आहुः अस्येति पुराणप्रवचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिंस्तदायुश्च दत्तमि
ति ३०
रामः
८७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१५ एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेति कृत्वा सकृदपि जरासंधादिभिर्निर्जित्य इति पशुदृष्टीनामीयते
नित्यजय इत्यर्थः योगेश्वरः भगवान् जगदीश्वर इति १६ विदूरथांतमाम स्यूतनादितनोः कुलं कृष्णस्य कापरमता

म२

गदयाभिहतोप्याजौ न चचाल यदूद्वहः कृष्णोपि तमहन् गुर्व्या कौमोदक्या स्तनांतरे ८ गदानिर्भि
न्नहृदय उद्वमन् रुधिरं मुखात् प्रसार्य केशबाह्वंघ्रीन् धरण्यां न्यपतद् व्यसुः ९ ततः सूक्ष्मतरं ज्योतिः कृ- ९४
ष्णमाविशदद्भुतं पश्यतां सर्वभूतानां यथा चैद्यवधे नृप विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः आ
गच्छदसिचर्माभ्यामुच्छ्वसंस्तज्जिघांसया ११ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना शिरो जहार राजेंद्र स
किरीटं सकुंडलं १२ एवं सौभं च शाल्वं च दंतवक्त्रं सहानुजं हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः मुनि-
भिः सिद्धगंधर्वैर्विवेशालंकृतां पुरीं १५ एवं योगेश्वरः कृष्णो भगवान् जगदीश्वरः ईयते पशुदृष्टीनां
निर्जितो जयतीति सः श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ
किल १७ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः १८
पृथूदकं बिंदुसरस्त्रितकूपं सुदर्शनं विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं १९ यमुनामनु यान्येव
गंगामनु च भारत जगाम नैमिषं यत्र ऋषयः सत्रमासते २०

युद्धोद्यमं ... सह पांडवैः ... संग्रामाहृष्कृतेति १७ प्रतिस्रोतं प्रतिलोमं १८ सुदर्शनं तीर्थं चक्रं चक्रतीर्थं १९ यमुनामनु या
रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः ॥

भा.पु. प्राप्य यात् प्रतिरुरोध ३ मुकुंदं प्राह दुर्मदः इत्यादेरपि श्लोकद्वयस्य परमार्थस्तु दुर्मदः गतमदः प्राह तत्कुंदं तत्तीर्थे जन्म
८६ निमुक्तिदानार्थं मम ... अद्य निजजन्मने यथा विष्णुमाशोः ४ ... भवान्मम स्वामी दृष्टिपथं गतः प्राप्तः एतदि
ष्टाभक्तं भक्तं प्रतिहर्षेणोक्ता ७ किंच हे कृष्ण त्वमस्माकं मातुलेयो बंधुः एवमपि मित्रध्रुक् मित्रद्रोहं ... तितवान् मां च जिघां
समि तस्मादस्माकं त्वं लोमहर्षः ... गृहाण प्रानृनं दुर्वारः अतस्त्वां तान्मात्र महत्या वेकितः हे ... मंदसर्वस्य हन
समक्ष ... धर्मेता ... गदया ... हनिष्ये प्रहरिष्यामि ... लह ... त्वं नितनुब ... तुल्यां ... कौ ... हननेव ... ५

ततथायांतमालोक्य गदामादाय सत्वरः अवप्लुत्य रथात् कृष्णः सिंधुं वेलेव प्रत्यधात् ३ गदामुद्य
म्य कारूषो मुकुंदं प्राह दुर्मदः दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ४ त्वं मातुलेयो नः कृष्ण
मित्रध्रुक् मां जिघांससि अतस्त्वां गदया मंद हनिष्ये वज्रकल्पया ५ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां
मित्रवत्सलः बंधुरूपमरिं हत्वा व्याधिं देहचरं यथा ६ एवं रूक्षैस्तुदन् वाक्यैः कृष्णं तो ९५
त्रैरिव द्विपं गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ७

अवज्ञकल्पया उत्पलमालावदिति कोमलयेत्यर्थः ५ नन्वेवं हननेन कस्त्वपुरुषार्थस्तमाह तर्हीति अज्ञानविघ्नेतः
तोयस्मात् हे सर्वज्ञेत्यर्थः परमार्थानः स्वामिनं एतद्देहसंबंधेन बंधुरूपं बहुलशापनशत्रुत्वेन प्रतीतं त्वां हत्वापि त्वारागा
मानृण्यमुपैमि उपैष्यामि विरोधेनाभ्राध्यीयते मनसि चिन्त्यत इति आधिः देहांतर्यामितया चरतीति तथा तमीश्वरं हत्वा
अत्र धर्मशारा ... हृतोर्गन्यर्थस्य सानार्थत्वात् ... तेन यथा पित्राद्दीनामानृण्यमुपयंति तद्वदिति ६ रूक्षै रामः
रुत्यादिप्रतीत्यभिप्रायेणा तोत्रैः अंकुशादिभिः ७ रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः ८६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंच यस्य पादसेवयार्जितया पुष्कलया आत्मविद्यया अनादिरविद्यारूप आत्मविपर्ययग्रहस्त्वहंकारः सुखी
दुःखीत्यादिलक्षणस्तं हि त्वं हिनोति नाशयंति संतः ऐश्वर्यं पदं च तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं सत्यमित्यर्थः
३२ किं तर्हि संपन्नं तदाह तं शस्त्रपूगैरिति वर्म कवचं रुरोज बभंज ३३ ३४ लयार्कसन्निभं प्रलयकालीनसूर्यसदृशं ९६

यत्पादसेवोर्जितयाऽऽत्मविद्यया हिनोत्यनाद्यात्मविपर्ययग्रहं लभंत आत्मीयमनंतमैश्वरं
कुतो नु मोहः परमस्य सद्गतेः ३२ तं शस्त्रपूगैः प्रहरंतमोजसा शाल्वं शरैः शौरिरमोघविक्रमः विद्ध्वा
ऽच्छिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह ३३ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतं ३४ आधावतः प२
सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवो धा५
दयाचलः ३५ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः वज्रेण वृत्रस्य यथा पुरंद
रो बभूव हाहेति वचस्तदा नृणां ३६ तस्मिन्निपतिते पापे सौभे च गदया हते नेदुर्दुंदुभयो राजन्दि
वि देवगणेरिताः सखीनामपचितिं कुर्वन् दंतवक्त्रो रुषाभ्यगात् ३७ इति श्रीभागवते महापुराणे द
शमस्कंधे सौभवधो नाम सप्तसप्ततितमोऽध्यायः श्रीशुक उवाच शिशुपालस्य शाल्वस्य पौंड्रकस्यापि
दुर्मतिः परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदं १ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् पद्भ्यामि
मां महाराज महासत्त्वो व्यदृश्यत २

अन्वितारीहिताः किंच ... इति द्वासप्तसप्ततितमः ततोऽष्टसप्ततितमे दंतवक्त्रविदूरथौ हत्वा हरिः पुरे रमे

भा०उ० ८५
इति तातं जनितं पिताऽऽईत्याश्चर्यं तस्य कस्य २६ २७ स्वबोधः स्वतःसिद्धज्ञानवानपि स्वजनस्नेहतः प्रकृतो मनुष्यस्वभावे उपप्लुतः निम
ग्नः स्थितः ततस्तत्सर्वमासुरीं मायां मयानुप्रणीतां मायेयमिति ज्ञातवान् २८ स्वाप्नं स्वप्नप्रपंचं यथा २९ एवं परस्तं तनुपम
स्तं निराकरोति एवमिति केचन नान्विताः पूर्वापरानुसंधानरहिताः तदाह यत्स्ववाच इति तत्रानुस्मरंतीत्यर्थः अज्ञम ९७

एष ते जनिता तातो यदर्थमिह जीवसि वधिष्ये वीक्षतस्तेऽमुमीशश्चेत्पाहि बालिश २५ एवं निर्भर्त्स्य मा न१
यावी खड्गेनानकदुंदुभेः उत्कृत्य शिर आदाय खस्थः सौभं समाविशत् २६ ततो मुहूर्तं प्रकृतावुपप्लु
तः स्वबोध आस्ते स्वजनानुषंगतः महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयो
दितां २७ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः स्वाप्नं यथा चांबरचारिणं रिपुं
सौभस्थमालोक्य निहंतुमुद्यतः २८ एवं वदंति राजर्षे ऋषयः केचनान्विताः यत्स्ववाचो विरुध्ये
त नूनं ते न स्मरंत्युत २९ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः क्व चाखंडितविज्ञानज्ञा
नैश्वर्यस्त्वखंडितः ३१

भिप्रायः ततश्च प्राज्ञस्यापार्थ रामेणास्य हता तः श्रीकृष्णः संकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ३० असंभावितं चेत्याह क्व
शोक मोहाविति भयं बाहुर्निमित्त दर्शनकृतं रुतं हन्मुः पुरीं ममेति षड्क्रयश्च हस्त श्रीशार्ङ्ग्यपतद्दितिजक्तं न द्वयं वा केति अ
ज्ञेषु संभवो येषां ते अखंडिता विनिशाने ऐश्वर्याणि यस्य सः तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यविषयं ३१ रामः रामः राम ८५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तं च शाल्वं शरसंदोहैः शरजालैः खं सूर्य इव रश्मिभिरिति सुशीलत्व विपुलत्वादिभिराकाशोपमात्सौभस्य अविध्यदेव
तुल्यादिभिः शरागार रश्मिसादृश्यं अयमनेनैव रश्मिवत्शरजालप्रसारणात् सूर्यतुल्यः श्रीकृष्ण इति १४ दोर्बाहुः १५

तं षोडशभिर्विद्ध्वा बाणैः सौभं च खे भ्रमत् अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः १४ शाल्वः 98
शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं १५ हाहाकारो म
हानासीद्भूतानां तत्र पश्यतां निनद्य सौभराडुच्चैरिदमाह जनार्दनं १६ यत्त्वया मूढ नः सख्युर्भ्रातुर्भा
र्या हृतेक्षतां प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा १७ तं त्वाद्य निशितैर्बाणैरपराजितमानिनं
नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः १८ श्रीभगवानुवाच वृथा त्वं कत्थसे मन्द न पश्यस्यन्तिके
ऽन्तकं पौरुषं दर्शयन्ति स्म शूरा न बहुभाषिणः १९ इत्युक्त्वा भगवाञ्छाल्वं गदया भीमवेगया तता
ड जत्रौ संरब्धः स चकम्पे वमन्नसृक् गदायां संनिवृत्तायां शाल्वस्त्वन्तरधीयत २० ततो मुहूर्त आग
त्य पुरुषः शिरसाच्युतं देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुदन् २१ कृष्ण कृष्ण महाबाहो पिता ते पितृ
वत्सलः बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः २२ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः
विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा २३ कथं राममसंभ्रान्तं जित्वाजेयं सुरासुरैः शाल्वेनाल्पी
यसा नीतः पिता मे बलवान्विधिः २४ इति ब्रुवाणे गोविन्दे सौभराट् प्रत्युपस्थितः वसुदेवमिवानीय कृष्णं चेद
मुवाच सः २५

१६ ... सख्युः ... अस्माकं प्रमत्तः अनवहितः व्यापादितः निहतः १७ अपराजितोऽहमिति मानवन्तं पुनरावृत्तिं मृत्युं

भा॰ द॰ सौभेयाः सौभस्थाः ४ नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारस्त्रिनवरात्रं सप्तविंशतिरहोरात्राणी
८४ त्यर्थः तुमुलमाकुलं उल्बणं घोरं ५ परमतमनुपपन्नस्यापि इन्द्रप्रस्थं गत इत्यादिना ६ आहवेषु स्वागतमेवमपि चिंतयन् विजृम्भि

गदाशार्ङ्गासिबाणाग्रैर्भग्नः सौभपतेर्बलं पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ४ एवं यदूनां शाल्वा
नां निघ्नतामितरेतरं युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ५ श्रीशुक उवाच इन्द्रप्रस्थं गतः कृष्ण आहू 99
तो धर्मसूनुना राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां
निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ ७ आह चाहमिहायात आर्यमिश्राभिसंगतः राजन्याश्चै
द्यपक्षीया नूनं हन्युः पुरीं मम ८ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं सौभं च शाल्वराजं च दारुकं
प्राह केशवः ९ रथं प्रापय मे सूत शाल्वस्यान्तिकमाशु वै संभ्रमस्ते न कर्तव्यो मायावी सौभराडयं १०
इत्युक्तश्चोदयामास रथमास्थाय दारुकः विशन्तं ददृशुः सर्वे स्वे परे चारुणानुजं ११ शाल्वश्च
कृष्णमालोक्य हतप्रायबलेश्वरः प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे १२ तामापतन्तीं नभसि म
होल्कामिव रंहसा भासयन्तीं दिशः शौरिः सायकैः शतधाच्छिनत् १३

तमाभाषत आर्यमिश्राभिसंगतो बलभद्रादिसहितः ८ दुर्निमित्तैर्मत्तदर्पेणाकुलचित्त एव चिंतयन् द्वारकामागत्य स्वानां
कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य आराम पुरं रक्षां प्रति निरूप्य नियुज्य दारुकं प्राह इत्यन्वयः ९ ते त्वया १० आस्थाय स राम.
म्यगधिष्ठाय अरुणानुजं ध्वजे वर्तमानं गरुडं ११ हतप्रायस्य बलस्येश्वरः १२ रामः रामः रामः रामः ८४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपोवाहरणान्नीतो निनाय २७ २८ मत्तमत्तोविनाः कीर्त्तिं विन्त्यस्मतेन त्वयास्तेन २९ पितरौ रामकस्मादभिसंगम्यतत्पा
र्श्वं गत्वा ताभ्यां पृष्टः स्वयोग्यं किंनु वक्ष्यामीति ३० भ्रातृजामयो भ्रातृभार्याः अकं निश्चितं ततः कैव्यं कथयिष्यति तत्क
यनमनुकरोति कथंकथमिति विभो हे समर्थ्य रतद्यसर्पणं धर्मं वाह सूत इति ३२ आप्यवाहितः अपनीतः उपसृष्ट

प्रद्युम्नं गदयाशीर्णवक्षःस्थलमरिंदमं अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः २७ लब्ध 100
संज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् अहोअसाध्विदं सूत यद्रणान्मेऽपसर्पणं २८ न यदूनां कु
ले जातः श्रूयते रणविच्युतः विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् २९ किं नु वक्ष्येऽभिसंगम्य पि
तरौ रामकेशवौ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमं ३० व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृ
जामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ३१ सारथिरुवाच धर्मं विजानतायुष्मन्कृतमेतन्मया
विभो सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ३२ एतद्विदित्वा तु भवान्मयापोवाहितो रणात्
उपसृष्टः परेणेति मूर्च्छितो गदया हतः ३३ इति श्रीभागवते महापुराणे दशमस्कन्धे षट्सप्ततित
मोऽध्यायः श्रीशुक उवाच स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः नय मां द्युमतः पार्श्वं वीरस्ये न
त्याह सारथिं १ विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः प्रतिहत्य प्रत्यविध्यान्नाराचैरष्टभिः स्मयन् २
चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ३

उपसर्गो पीडां प्राप्त इति कृत्वा मत्तः परेण शत्रुणा गदया हतः सन् मूर्छितो निःसंज्ञितां गतो भवानिति ३३ इति दशमे षट्
[illegible] संनद्धः १ विधमन्तं क्षप

भा·पु· ८३ किंच विध्यानि स्वरान्मेघानिदुःखानि प्रच्छपूर्णानि येषां तैः अयोलोहितमयानि दुःखानि अग्राणि येषां तैः अजिनीपालं सेनापालं सन्न
तानि निम्नानि पर्वाणि ग्रन्थयो येषां तैः १८ सैनिकान्भटान्नेतॄन्सारथीन् १९ स्वस्वसैन्ययोर्वर्तमानाः पूर्वं पूजयामासुः समानि
तवंतः २० कदाचिद्बहुरूपं कदाचिदेकरूपं कचित्तदृश्यते कचिन्न दृश्यते एवं दुर्विभाव्यं दुर्विज्ञेयमभूत् २१ किंच कचिदि

बिभ्याधपं च विंशत्या स्वर्णपुंखैरयोमुखैः शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः १८ श
तेनाताडयत्सालं मैकैकेनास्य सैनिकान् दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः १९ तदद्भु 101
तं महत्कर्म प्रद्युम्नस्य महात्मनः दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः २० बहुरूपैकरूपं तद्दृ
श्यते न च दृश्यते मायामयं मयकृतं दुर्विभाव्यं परैरभूत् २१ कचिद्भूमौ कचिद्व्योम्नि गिरिमूर्ध्नि
जले कचित् अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितं २२ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः
शाल्वस्ततस्ततोऽमुंचन् शरान्सात्वतयूथपाः २३ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः पीड्यमा
नपुरानीकः शाल्वोऽमुह्यत्परेरितैः २४ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः न तत्यजू र
णं स्वंस्वं लोकद्वयजिगीषवः २५ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः आसाद्य गदया
मौर्व्या व्याहत्य व्यनदद्बली २६

ति एवं तद्दुःखस्थितं बभूव २२ अग्निवद्दाहकः अर्कवत्प्रकाशनः सर्वेन संस्पर्शो येषां तैः आशीविषवदेकदेशस्पर्शमात्रे
ण मारकत्वात् दुरासदैः दुःसहैः पीड्यमानपुरं अनीकानि च यस्य सः परैर्यदुभिरीरितैर्मुक्तैः २४ भृशार्दिता अपि स्व राम: ८३
स्वरणं स्वास्वायुद्धभूमिं २५ मौर्व्या कार्ष्णायसमय्या व्याहत्य प्रहृत्य २६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६ नयेति प्रति तां यशिशिरो नारिष्टः श्वयस्मयं हलमयं पुरस्तो भसंतं निर्माय स्वयितवा प्राप्तान् ७ नमो सां धकारस्य धाम श्राङ्गधं श्रन्योर्दुरासदं दुःप्राप्यं ८ ६ प्रसादाग्रहाः श्वद्गालास्तदुपरि गृहाः नालिकास्तत्पर्यंत कुम्भानि ना: विहार 102

६ नासुरमनुष्याणां गंधर्वोरगराक्षसां श्रभेद्यं काममंयज्ञेसयानं शक्तिभीषणां ६ नयेति निरिशाद्दित्तोमयः पुरपुरंजयः पुरं निर्माय शाल्वाय प्राह सो भमयस्मयं ७ सलब्धा कामगं यानं नमो धामदुरासद यथो द्वारवतीं शाल्वो वैरं वृष्णि कृतं स्मरन् ८ निरुध्य सेनया शाल्वो महत्या भरतर्षभ पुरीं बभंजो पवनान्युद्यानानि च सर्वशः ६ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः विहारान् सविमानाग्न्यान् निपेतुः शस्त्रवृष्टयः १० शिलाद्रुमाश्चाशनयः सर्पा आसारशर्कराः प्रचंडश्चक्रवातोभूद्रजसाच्छादिता दिशः ११ इत्य र्द्यमाना सौभेन कृष्णस्य नगरी भृशं नाभ्यपद्यत वा शं त्रिपुरेण यथा मही १२ प्रद्युम्नो भगवान् वीक्ष्य बाध्यमाना निजाः प्रजाः मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः १३ सात्यकिश्चारुदेष्णश्च साम्बोक्रूरः सहानुजः हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ १४ अपरे च महेष्वासा रथयूथपयूथपाः निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः १५ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह यथासुराणां विबुधैस्तुमुलं लोमहर्षणं १६ ताश्च सौभपतेर्मायाद्दिव्यास्त्रै रुक्मिणीसुतः क्षणेन नाशयामास नैशं तम इवोष्णगुः १७

नृक्षीगृस्यानानि वसंच संजकिंच निमानाग्रानस्मा घरख्च वृष्टयादयः पेतुः १० श्रासारश्शार्कराः धारासंपातवत् शिलोपलाः ११ ... १२ १५ तुमुलं व्याकुलं रोमहर्षणं लोडं १६ नैशं निशि विभवं तमः उष्णगुः सूर्य इव १७ रामः रामः रामः

भा० पु० ८२ ३८ युवां भारं जिहीर्षुर्गतिमत्वसंपादनेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वेति किंच पुरस्य दशात्युद्धिन्नावेशा दुर्योधनो भ्रमति स्म भांति घायमयमायानुनि मितन्मान्तसः भूभारहरणाबीजं दुर्योधनभ्रमं भीमादिहास्यं तत्स्य च रामवंविधायत्तू क्षीमासीदित्यर्थः ३६ ४० इति दशमे पंचसप्ततमः ततः षट्सप्ततितमे ऽध्याये शाल्वमहासौभं प्रद्युम्न

गृहासभीमस्तं दृष्ट्वा श्विधान्त्पत्नीमो पुरोनिश्चार्य माशाराश्रपांगरासाकृशानुमोदिता: ३८ सश्री त्रुविमनाइवाभवत् सभूवत् श्रीभगवान् भुवो भारं समुजिहीर्षुर्भ्रमतेस्मयदृशा ३६ एततन्निगितो दशमस्कंधेदुर्योधनस्यमान भगाना माम पंच सप्ततितमो ध्यायः ४० इति श्रीभागवते महापुराणे ... श्रीशुक उवाच अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप क्रीडानरशरीरस्य यथा सौभपतिर्हतः १ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा २ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ३ इति मूढः प्रतिज्ञाय देवं पशुपतिं विभुं आराधयामास नृप पांसुमुष्टिं सकृद्ग्रसन् ४ संवत्सरान्ते भगवानाशुतोष उमापतिः वरेण छंदयामास शाल्वं शरणमागतं ५

प्रहारेण प्रद्युम्ननिर्गमः संपाद्य धर्मराजस्य राजसूय महाध्वरं निहत्य सौभराजादीन् योपारम यदूत्तमः १ पूर्वाहं सकृत्पांसुमुष्टिमेकां ग्रसन् भक्षयन् ४ संवत्सरांतं इति आशुतोऽपि भगवानुमापतिः श्रीकृष्णविद्विष्ठाय शाल्वाय परं स्वं वेफलमन्यमानो नश्रीघ्रप्रादुरभूत् तस्यातिनिर्बंधसालब्धसंवत्सरान्ते अवरेणाच्छंदयामास ... च्छान्ता कारितवान् वरं वृत्तोच्छि प्रवाच्यत्यर्थः ५ रामः ८२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२८ २९ गतज्वरः निश्चिन्तमासीत् ३० श्वश्रुते स्वात्मायस्य तस्यानेरं द्रादीनां लक्ष्मीर्लक्ष्यः विभूतयः विश्वसृजा महेयेन उपस्कृ
ताः विरचिताः ताभिः सह कुरुराट् दुर्योधनोतप्यत् ३२ महिषीसहस्रमिति बहुत्वोपलक्षणं कर्णाद्भिर्दृष्टिः शोभा यस्य मध्ये
सुबाहुमध्यमित्यर्थः कुचकुंकुमैः शोणा हारा यस्य ततः श्रीमंतमुखानि यस्य ततः बलैः कुंडलैः आभ्यां च सपत्नशोभतेतिशेषः 104

ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् प्रेम्णा निवासयामास क्रमसंवत्सरागतान् २८ भगवानपि
तत्रांग न्यवात्सीत्प्रियंकरः प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं २९ इत्थं राजा धर्मसुतो मनो
रथमहार्णवं सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ३० एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं
अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ३१ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नानाविभांतिकिलविश्व
सृजोपक्लृप्ताः ताभिः पतीन् द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ३२ यस्मिंस्त
दा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं मध्ये सुचारुकुचकुंकुमशोणहार
श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यं ३३ सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिराट् वृतोनुजैर्बंधुभिश्च
कृष्णेनापि स्वचक्षुषा ३४ आसीनः कांचने साक्षादासने मघवानिव पारमेष्ठ्यश्रिया जुष्टः स्तूयमान
श्च वंदिभिः ३५ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप किरीटमाली न्यविशदसिहस्तः क्षिपन् रुषा ३६
जले च स्थलवद्भ्रान्त्या मयमायाविमोहितः ३७
स्थलेभ्यगृह्णाद्वस्त्रान्तं जलं मत्वा स्थले पतत्

[illegible] स्वस्य वस्तु याहिताहितज्ञापनेन ३४ ३५ मानी अहंकारः किरीटं माला च बिभर्ति यस्य सः
[illegible] ३६ तत्र स्थले वस्त्रान्तमभ्यगृह्णात् आकुंचितवान् कुतः जलमिति स्थले रुष्वा
[illegible] स्थलवत् भ्रान्त्या ३७

देवराट्पतिभ्यां [illegible] सखीन् सखीन पिद्रन्तीभिः उदकेनाद्रयत् वर्मयंत्रैः सवनपात्रैश्च [illegible] कामिनीं १७ कियाभिः स्वर्गकि
भा॰ द॰ ८१ याभिः क्रतुराट् सम शिरोराजनस्तु यज्ञ १८ पत्नीसंयाजो यागविशेषः अवभृथस्नानं [illegible] वर्तते श्रुति [illegible] नानुष्ठापयर्थः

नादेवराट् न सखीन् [illegible] तीभिः किं नाम [illegible] कुचोरुमध्याः स्नान्तु [illegible] वरा [illegible]
नमात्याः [illegible] विहारे १७ [illegible]
[illegible] पत्नीभिः क्रियाभिः क्रतुराडिव १८ पत्नीसंयाजावभृथ्यैश्चरित्वा ते तमृत्विजः आचान्तं स्नापया
चक्रुर्गंगायां सह कृष्णया १९ देवदुंदुभयो नेदुर्नरदुंदुभिभिः समं मुमुचुः पुष्पवर्षाणि देवर्षिपितृमा
नवाः २० सस्नुस्तत्राखिला वर्णाश्रमयुक्ता नराः महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् २१ अथ रा
जाहते क्षौमपरिधाय स्वलंकृतः ऋत्विक्सदस्यविप्रादीनानर्चाभरणाम्बरैः २२ बंधुज्ञातीन्नृपान्मि
त्रसुहृदोन्यांश्च सर्वशः अभीक्ष्णं पूजयामास नारायणपरो नृपः २३ सर्वे जनाः सुररुचो मणिकुंडलस्र
गुष्णीषकंचुक दुकूलमहार्ध्यहाराः नार्यश्च कुंडलयुगालककुन्तलजुष्टवक्त्रश्रियः कनकमेखलया विरे
जुः २४ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः ब्रह्मक्षत्रियविट्शूद्राः राजानो ये समागताः २५ दे
वर्षिपितृभूतानि लोकपालाः सहानुगाः पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप २६ हरिदासस्य
राजर्षे राजसूयमहोदयं नैवातृप्यन् प्रशंसन्तः पिबन्मर्त्योमृतं यथा २७ 105

१९ २१ आहते नूतने आनर्च अर्चितवान् २२ २३ सुरा इवाभिवरुक् कांतिर्येषां मणिकुंडलैः सहिताः स्रगुष्णीषादयो येषां ते कुंड
लयुगेनालककुन्तलेन जुष्टवक्त्रश्रियः ताः २४ २७ रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः
८१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋत्विजश्च सदस्याश्च सभासदः बहुविदस्तेषु सुहृत्तमेषु सुस्विष्टेषु सूनृतं प्रियवाक् समर्हणमलंकारादि दक्षिणाश्च वि
त्ताभिः स्नानं यागगंगायां ८ ९ १० चित्राणि ध्वजपताकाग्राणि येषु तैरिभेन्द्रैः स्यन्दनैः सर्वैरर्वद्भिश्च एवं चतुरंगैः सैन्यैर्नि
र्ययुः ११ यजमानो युधिष्ठिरः पुरःसरो येषां ते १२ सदस्यादयस्तुष्टुवुः अन्ये च द्विजश्रेष्ठा निर्ययुः १३ किं च गन्धादिभिः स्वलं

ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः चैद्ये च सात्वतपतेश्चरणं प्रविष्टे
चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्यां ८ मृदङ्गशङ्खपणवधुन्धुर्यानकगोमुखाः वादित्राणि विचित्राणि ने
दुरावभृथोत्सवे ९ नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः वीणावेणुतलोन्नादस्तेषां स दिवमस्पृश
त् १० चित्रध्वजपताकाग्रैरिभेन्द्रस्यन्दनार्वभिः स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ११ यदुसृञ्ज
यकाम्बोजकुरुकेकयकोशलाः कम्पयन्तो भुवं सैन्यैर्यजमानपुरःसराः १२ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्म
घोषेण भूयसा देवर्षिपितृगन्धर्वास्तुष्टुवुः पुष्पवर्षिणः १३ स्वलंकृता नरा नार्यो गन्धस्रग्भूषणा
म्बरैः विलिम्पन्त्योऽभिषिञ्चन्त्यो विजह्रुर्विविधै रसैः १४ तैलगोरसगन्धोदहरिद्रासान्द्रकुङ्कुमैः पुंभिर्लिप्ताः
प्रलिम्पन्त्यो विजह्रुर्वारयोषितः १५ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदे
व्यः ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः १६

कृताः नरा नार्यश्च मिथो विजह्रुः १४ स्नाने वा हस्ते तैलेति किंच सान्द्रकुंकुमादिभिः पुंभिर्लिप्ताभ्यां प्रलिंपन्त्यो वारयोषितश्च
विजह्रुः १५ नृभिर्गुप्ताः स्यन्दनादियानैर्नृदेव्यो राजपत्न्यो निरगमन् निर्ययुः एतदुपलब्धुं विमानवरैर्देव्यो यथा दिवि
परिषिच्यमानाः सव्रीडेन हासेन विकसन्ति वदनानि यासां ताः १६ रामः रामः रामः रामः रामः रामः

106

भा॰ द॰
८०

सुरा मानवाः खेचराः प्रयाताश्च ५३ पापं धर्मद्विषं स्वनेहेतुः कलिं कलेरंशं अतएव कुरुकुलस्यामयं व्याधिं नाशहेतुं ५४ वि
तानं यज्ञं च ५५ इति दशमे टीकायां चतुःसप्ततितमोऽध्यायः पंचसप्ततितमे यज्ञावभृथसंभ्रमः सुयोधनस्य चाभूत्तामानभंगो ॥
दभिश्रमात् दुर्योधनस्येव डः खेकारणप्रश्नपूर्वकमनुवदति अजातशत्रोरिति १ इति श्रुतं तत्र कारणं उच्यतां २ दुर्योधनस्या

ऋताः सभाजिताः सर्वे सुरमानवखेचराः स्वं स्वं धामानि ययुर्मुदा ५३ दुर्योधनमृते
पापं कलिं कुरुकुलामयं यो न सेहे श्रियं स्फीतां दृष्ट्वा पाण्डुसुतस्य ताम् ५४ य इदं कीर्तयेद्विष्णोः कर्म चै
द्यवधादिकं राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते ५५ इति श्रीभा॰ म॰ द॰ शिशुपालवधश्चतुःस
प्ततितमोऽध्यायः राजोवाच अजातशत्रोस्तं दृष्ट्वा राजसूयमहोदयं सर्वे मुमुदिरे नृदेवा ये
समागताः १ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां २ श्रीबादराय
णिरुवाच पितामहस्य ते यज्ञे राजसूये महात्मनः बान्धवाः परिचर्यायां तस्यासन्प्रेमबन्धनाः ३
भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ४ गुरु
शुश्रूषणे जिष्णुः कृष्णः पादावनेजने परिवेषणे द्रुपदजा कर्णो दाने महात्मना ५ युयुधानो विक
र्णश्च हार्दिक्यो विदुरादयः बाह्लीकपुत्रा भूर्याद्या ये च सन्तर्दनादयः ६ निरूपिता महायज्ञे नानाकर्म
सु ते तदा प्रवर्तन्ते स्म राजेन्द्र राज्ञः प्रियचिकीर्षवः ७

सहनकारणत्वेन यागमहोत्सवमेव पुनः सिंहावलोकनेन निरूपयति पितामहस्येत्यादिना एकदंतः पूर्वं तस्मात्तं प्राप्तेनेतरं
यज्ञ प्रेमबन्धनाः प्रेमयन्त्रिताः ३ पूजायां सम्माननं द्रव्यसाधने नानावस्तुसम्पादने ४ गुरुशुश्रूषणे वंदनालेपनादौ
५ ६ निरूपिताः नियुक्ताः सन्तो नानाकर्मसु प्रवर्तन्ते स्म ७ रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः
८०

107

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४३ भवतात्तु उत्थायेत्यस्याभिमितिप्राप एवमर्त्योर्थं देहो भर्त्तुस्व बलः सर्वान् तेनान् हत्वान् एतामयेवशी घ्रं हन्तव्य इति ततः स्वानेवा-
स्वायत्वा शिरो जहारेति ४४ नन्वेवं निंदकस्य कथं वासुदेवे प्रवेशः तत्राह जन्मत्रयेति जन्मत्रयेष्वनुगुणमनुवर्त्तितं यद्वैरं तेन संरब्ध १०८

निंदा भगवतः श्रवणं स्तनपरस्य जनस्य च ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः ४१ ततः पांडुसु-
ताः क्रुद्धा मत्स्यकैकयसृंजयाः उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ४२ ततश्चैद्यस्त्वसंभ्रांतो
जगृहे खड्गचर्मणी भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ४३ तावदुत्थाय भगवान्
स्वान्निवार्य स्वयं रुषा शिरः क्षुरांतेन चक्रेण जहारापततो रिपोः ४४ शब्दः कोलाहलोथासीच्छिशु-
पाले हते महान् तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ४५ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपा-
विशत् पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४६ जन्मत्रयानुगुणितवैरसंरब्धया धिया
ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ४७ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात्
सर्वान् संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ४८ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः उ-
वास कतिचिन्मासान् सुहृद्भिरभियाचितः ४९ ततोनुज्ञाप्य राजानमनिच्छंतमपीश्वरः ययौ सभार्यः
सामात्यः स्वपुरं देवकीसुतः ५० वर्णितं तदुपाख्यानं मयाते तिविस्तरं वैकुंठवासिनोर्जन्म विप्रशापात्
पुनः पुनः ५१ राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५२

यास्मिन्निर्दिष्टयात् तन्मयतां तत्स्वरूपतां जातः पुनः पार्षदो बभूवेत्यर्थः अत्र हेतुः भावो हीति भावो भवनाम्नतु ध्यानं भवस्य
[illegible] कारणं [illegible] ध्यानेन कीटादेरपि तथा दृष्टत्वादित्यर्थः ४७ ४८ ५२ रामः रामः रामः रामः

भा॰टु॰
१९ वर्णाश्रमकुलेभ्योऽपेतो नोब्रह्मत्वात् स्वनाम गोत्रमिति स्फुटं ततः सर्वधर्मबहिष्कृतः स्वैरवर्तीप
रत्वेष्वरः त्वात् गुणैः हीनो निर्गुणत्वात् आदिरहितः एवंभूतो जीवानां योग्यत्व इत्यसपर्यामितिं कथमर्हतीत्यर्थः ३६ अपि वक्ष्यमाणं
तत्र्यायाः मादृशा स्यात् अहङ्कारात् यस्माद्ब्राकलपघाति नात्र प्राग्नयिकं सद्भिर्बहिःकृतं अपि तु स्पष्टं किंच अस्मा
दादिकुलं बलं कृत्यधिकारे [illegible] आपानरतं वीर्य्यं तत्र आवर्तमित्यर्थः अहो पक्षुनामेव नावदी इत्यत्र हात्म्य पडत कुलाद्ध्यप
याते शापेन प्राप्तत्वादि त्यादि अपि तु साक्षादीश्वरः अतः सपर्यामात्रं कथमर्हतीत्यर्हः ३७ किंच येराजानोऽप्यात्तु आह १०९

वर्णाश्रमकुलापेतः सर्वधर्मबहिःकृतः स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति ३६ ययातिनैषां हि कु-
लं शप्तं सद्भिर्बहिःकृतं वृथापानरतं शश्वत्सपर्यां कथमर्हति ३७ ब्रह्मर्षिसेवितान् देशान् हित्वैतेऽब्र-
ह्मवर्चसं समुद्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः ३८ एवमादीन्यभद्राणि बभाषे नष्टमंगलः
नोवाच किंचिद्भगवान् यथा सिंहः शिवारुतं ३९ भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः कर्णौ
पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ४०

यतिन इदं ईर्ष्यकाकथादिदेशान् स्थानत्वाप्राप्तयति एतेनुब्रह्मर्षिभिः तानेव देशानाश्रिता अब्रह्मवर्चसं समुद्रं दुर्गमपिहि त्वाह
यन्तित्वेत्यर्थः बाधंते नायाः दस्यवः प्रजाः भाखः अपमर्यः वेदं तद्विपाभियोगो ब्रह्मवर्चसं तद्दृष्टं दुष्ट्वमब्रह्मवर्चसं स
म्यभूतं दुर्गं धर्मवत्सनीतेर धर्मं तमाहु देवि तत्यर्थः तथाहत्य पुनः दस्युनविग्रनाधेबशावर्तमानात् दस्मति अतोप
दुष्पाः न्यक्रोनामाधर्मिकोस्तीति पारुष्यं रुत्तानार्थमेव ३८ शिवाफेरुः तद्रुतं श्रुत्वा यथा सिंहो न किंचिदवबूते तथा रामः
तद्वत् ३९ ४० १९

२३ आत्मनाक्रियमाणाम् अर्हणाम् आनन्त्यं कस्मात् तत्राह सर्वभूतानामात्मानमभूताय अनन्यदर्शिने निरस्तभेदमतये २४ श्रीकृष्णानुभाववित् सहदेव इत्युक्त्वा तूष्णीमभूत् २५ द्विजेरितं साधु साध्वीति यच्चोक्तं तदाहार्दमभिप्राय २६ ३१ हे सदसस्पतयः सर्वे बालस्य भाषितं मामन्यध्वं मानानीतं माग्रहीत किं तत् यत् यतः कृष्णोऽर्हणे संमतः तत् ३२ ३३ अस्मिन्वासवे योग्ये पूर्ववदुन्नेयः 110

मा

भगवन्मार्गे प्रवृत्ता अपि केचिद्विदन्तोऽपि तापिनः कामान्न मुञ्चन्ति तेन भगवन्तं प्राप्नुवन्तीति इदानीं ये बहिः संगं परित्यज्य
वलं कुर्वाणा ईश्वरं प्राप्नुवन्तीति तान् श्रीभगवन् कामान् यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्रेत्यादिश्रुत्य
र्थमाह यदि नाम समुद्भूतं नीति हे भगवन् ये यतयः हृदि स्थिताः कामा नष्टाः कामस्य जयः मूलानि वासना
यदि नाम समुद्भूतं निपतन्ति तेषां मूलता भवान् हृदि गतोऽपि दुरधिगमः दुःप्रापः किं पुनः स्वल्पनं कं तमसः
विस्मृतं कं तमसि स्वल्पः स यथा कण्ठवर्तिमानोऽप्यस्वल्पतः स्वादुः वा प्राप्य भवतीति स्वधृदीति न केवलमेतावत्

यदि नाम समुद्भूतं निपतन्ति यो हृदि कामजटा दुरधिगमो ऽसतां हृदि गतोऽस्मृतकण्ठमणिः
असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतान्तकादनधिरूढपदाद्भवतः ३९ २९

किं नु असुतृपयोगिनां मिन्द्रियतर्पणपराणां योगच्छद्मना उभयतोऽप्यसुखं विहामुत्र च दुःखमेवात इह
अनपगतान्तकात् अनिवृत्ता अन्तकालाद्भवनाद्यनाद्याः केवलात् भोगवैभवप्राप्तकृतपापैःको
नाम दुःखं भवति दूरवादपि दुःखं कंपयन्तात् अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्मात्तस्मात्तत्
स्वरूपप्राप्त्यभावादपि विद्यावद्धिष्य भवत्वेन प्राप्तिर्न धर्मानिष्कर्मानिष्कर्मनिबन्धनत्वं दुःखप्रदं कथ्य
[illegible]
[illegible]

तदेवं प्रपंचस्य सत्वे साधकं नास्तीत्युक्तं इदानीमसत्वे स्फुटं प्रबलं युक्तमाह यतो जायमानं भूतानि जायन्ते
न्यायात्सन्मूलं वा नुमानं प्रमाणमित्याह न यदिदमिति यत् यस्मात् इदं विश्वं पुरस्तात् पूर्वं न आस आसीत्
तदा सोऽयमेवमग्न आसीत् आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतेः न चानिधानात् प्रलयात् अनु अन्
तर भविष्यत् न भविष्यति नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेः अतः कारणात् अन्तरामध्ये ऽपि रूपं
विराजतीनां द्रव्यमात्राराणाम् लोहकास्त्रीय सरूपाणां विकल्पाभेदाघटकुण्डलादयः तेषां यथा नो मार्गः प्रका
तैः रूपमीयते सदृशान्यानिरूप्यते यथा तत्र कार्याकाराणां नामधेयमात्रेणाक रणमदाभेवतु सत्यं तथात्रा

न यदिदमग्र आस न भविष्यदतो निधनादनु मितमन्तरा त्वयि विभाति मृषैकरसे अत उपमीयते
द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयन्त्यबुधाः ३७ २४ २५ २८

आकाशादीनां नाममात्रतानुत्तमेव सत्यं तथा च श्रुतिः यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं विज्ञातं
भवति वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्
यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसमित्यादि तस्माद् द्रव्यसत्वे प्रमाणाभावादसत्वे प्रमाणस्य विद्य
मानत्वात् वितथमनोविलासं कृतं सत्यमिति ये अवयन्ति जानन्ति ते अबुधाः अज्ञाः इत्यर्थः अत्रैवं प्रयोगः
विवादास्पदं सितं न सत् आद्यन्तयोरविद्यमानत्वात् विकारित्वाद्दृश्यत्वाद्यामुक्तिरजनादिवत् आत्मवत्स्वे
तिमुकुटकुण्डलकंकणकिंकिणीपरिणतं कनकं परमार्थतः महदहंकृतिखप्रमुखं तथा नरहरेर्न परं प
रमार्थतः ३७ २४

भा॰ टी॰
१२८

ननु यद्यपि प्रपंचो नाम नास्त्येव न वा सत्तातेन वैतन्यस्य संबंधगंधोपि नास्ति किं वा बहु पुराणमीश्वरस्य प्रयत्नो नित्यमुक्तः किं विषय वंतदा कर्मकाण्डमित्यपेक्षायामीश्वरविशेषं दामुपत्तो सतु जगामखायामसमानन्छन्परि ग्रहस्य जाने तत्र माहत्य: विष्णुतस्वाहमानन्नन्ते मो भृभिवाकसीति श्रजोमे: कालोदिनमु सकं स्वामि न्यापाव देवी त्याह स यदजयति सतुजीवः यत्र यस्मादजयामायया श्रुतौ: श्रुविद्यांसुनुशपीनस्वालिंगेन नतः गुणांश्च देहेन्द्रियादीन् सेवमानम्भाम्मनयाः स्वस्य न हदनुनदन तरं सरूपतांतकर्मयोगं वगुषन्न श्रपेन भगः पिहितानंदादिगुणः सनन्दनु संसारं भजति प्राप्नोति नहि यपैव वकर्मकाण्डमिति भावः नमुनन्वंनु जहासि नाम जो माया ननु सामर्थ्यं स्वास्तिकयंतन्मागस्ते 146

स यदजया त्वजामनुशयीत गुणांश्च जुषन्भजति सरूपतां तदनु मृत्युमपेतभगः त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ३८ २५॥

तत्र हरिरित्यत्र स्वमिति श्रपभावः यथा भुजंगः स्वगात्रमपि कंचुकं गुणानुत्रानाभिमन्यते तथा त्वमजा नहितिरंतनरत्नादसंबिन्कामयेनुष्ठं दपतेरजया न्यमिति नानुपश्यस्यतिकुतः एतन्नदाहात्मा नाम गः निरग्प्राप्तैश्वर्यः महसि परमैश्वर्ये स्वष्टगुणिते ऽणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराज सेकथंभूतः अपरिमेयभगः अपरिमितैश्वर्यः न तत्स्वयामिव देशकालादिपरिच्छिन्नं न वाष्टगुणितं मैश्वर्यं अपि तु परिपूर्णं स्वरूपानुबंधित्वादपरिमितमित्यर्थः नन्वं पीतीतं वजीवो रागाशगता कालस्वभा बादिभिर्भीतान् सत्वरजस्तमो गुणमयान् मीलयंतीव हन्माया कम्पयदा तिरस्यमि मर्दयंयानुरमा रामः १२८

...तामारायां गतोऽस्मिन् हरिनामे वनतां वारय ३८ २५

भा॰ टी॰
७०

केतुत्वमतिशयेनाह यस्येति त्रिभुवनानां मंगलरूपादि विपातालेभूमौ पृथिव्यां यस्य यशो लिंगं पुनाति कथं पृथिवीं दे गवितानां दिग्भवानामवितानं मंगलकरं श्रारूपं तत्ता वरं गाबुवपृथिवीं पुनाति कयंतन्त्राप्यनदिविमंदाकिनीति स्वयमभो गवतीति इह वभूमौ भोगवती नस्मात वागमनारीय मंगलपवित्रवभविष्यतीतिभावः ४५ नेमे मनोरदेनो केतुन ते वर्तमाने ह्याली यपञ्चेत्युपादेवेशुजेरातं भस्यजिनी यया स्वगने स्तुअनन्यमानेषु वावः नथा कथालवानिति रिश्च: ४६ वतुर्षु हेतुः नमाथा नामनसा ध्यानं तत्त्वविन्महरिपाकं बोदितां ४७ ४८ इतिदशमस्कंधवृत्तौ सप्ताशीतितमोध्यायः अथैकसप्त

यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं मंदाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणाम्बु पुनाति विश्वं ४५ श्रीशुक उवाच नत्वेते ष्वात्मपक्षे ष्वगत्स्नु विजिगीषया वादः परेशः स्मयत्रु भ्रत्पमुहुर्वप्राह कृष्णाच ४६ श्रीभगवानुवाच त्वाहि नः परमवपुस्तु सुहृन्मंत्रार्थतत्व विदत्र श्रथात्रवृत्पनु च यम्म दुष्टः करवाम तत्र ४७ इत्युपामंत्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् निदेशं शिरसाधाय उद्धवः प्रत्यभाषत ४८ इतिश्रीभागवते महापुराणे दशमस्कंधे भगवत्प्रयाणसप्ततितमोध्यायः श्रीशुक उवाच इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोब्रवीत् सभ्यानां मतमाज्ञाय रूपस्य च महामतिः १ उद्धव उवाच यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया कार्यं पैतृष्वसेयस्य परस्पर शाच यारशो विशां ३ यष्टव्यं राजसूयेन दिक्चक्रजयिना प्रभो अतो जरासुतजय उभयार्थो तो मम ४ अस्माकं च महानर्थो ह्येतेनैव भविष्यति यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः ५ स वै दुर्विषहो राजा नागायुतसमो बली बलिनामपि चान्येषां भीमं समबलं विना ६

तित मउद्धवस्तु मंत्रतः इंद्रप्रस्थगतेकृष्णपार्श्वानां परमोत्सवः १ राजसूयमिषक वाभीमदुर्योधनादिषु किलमुत्पाद्यनद राभूभारमहरत्प्रभुः २ देवर्षेस्तत्र राजसूयगमनं सभ्यानां मतं राजरक्षा रूपस्य च भय ३ यक्ष्यतः पाण्डवं स्थितः पैतृ ष्वसेयस्य पितृष्वसुः पुत्रस्य स विशं हासायानंकार्यं तत्या यारशातियेनाशशारक्षा चक्रतैव्या ३ तत्र प्रथम राजसूयार्थं तव्यतताराजरक्षा कर्तव्ये त्याह यष्टव्यमिति षष्ठभिः अतः दिग्विजय हेतो उपायार्थं राजसूयार्थं शरणागत रक्षार्थम् ४ ५ रामः
७०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूमान्महान्गुरोर्लाभोयमस्माकंयतः सर्वलोकवन्दनीयतानिति ३५ ईश्वरः कर्तायिषांतेषु ३६ एवंमविदुषवसर्वज्ञेन ... गरास्थनधाय ... स्वानादः ... हकस्यतेस्वस्वशक्तिभिर्विद्यादिभिर्भूतेषु ... अतोवर्तमानस्य ... विभिः विराजन्ते ... स्यापितिनत्राह ... इतिस्वशक्तिभिः ... भूतेषुवर्तमानस्य ... जगत्कंयत्सदेवपतत्सायम् ... तेनेन्जगत्स्त्रजतः किंतुकेवलं ... ३७ ३८ नमह्रतिकृतः स्वेनरूपेनसर्वतोविलक्षणात्मनेसुविमायमया ... ३८ नन्वेवंभूतस्यकिंमायाविष्टितरिस्मतस्त्राह नीवत्वाति

अपिस्विदन्यलोकानांमायाताशंकुतोभयं नन्तुभूपान्भगवतोलोकान्पर्यटतोगुरोः ३५ नाहितेऽविदितंकिंचिल्लोकेष्वीश्वरकर्तृषु अथापि पृच्छामहे युष्मान्पांड्यानांवि किर्षितं ३६ नारद उवाच ६
या सामान्यानेवकृष्णोदयस्वपामानभिमोविश्वसृजेस्वमायिनः भूतेषुभूतस्वशक्तिभिर्विरचय्य ...
न्नरूपोनमेष्टतं ३७ नवेहितंकोहितसाधुवेदितुंस्वमायययेदंस्रजतोनियच्छतः यद्विद्यमानात्मनयावभासतेतस्मैनमस्तेस्वविलक्षणात्मने ३८ जीवस्ययः संसरतोविमोक्षणंनजानतोनर्थवहाच्छरीरतः लीलावतारैः स्वयशः प्रदीपकंप्राज्वालयत्त्वानमहंप्रपद्ये ३९ अथाप्याश्रावयेब्रह्मन्नरलोकविडंवनं रातः पैतृष्वस्रेयस्यभक्तस्यचविकीर्षितं ४० यस्यामित्वांमखं ... पांडवः पारमेष्ठ्यकामो नृपतिस्तत्भवाननुमोदतां ४१ तस्मिन्देवकृतुवरेभवंतंवैसुरादयः दिदृक्षवः समेष्यंतिराजानश्चयशस्विनः ४२ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेन्तेवसायिनः तवब्रह्ममयस्येशकिमुतेक्षाभिमर्शिनः ४३ प्रदी
अविद्यात्मत्वात्तेनअनर्थप्रापकाच्छरीरात्संसरतस्तेनैवतामसाच्छरीरादिर्मोक्षाणमजानतः प्राज्वालयत्प्रदी ... ३९ अथाप्याश्रावयिष्यामि नरलोकविडंबनं ...
... ४० ४१ ... किंनुत्नानां ...
... भक्तोस्माकंकुतस्वन्दः ... स्थायिनः स्वयंवाप्रविश्य ...
रस्त्वयिसद्रक्षणार्थंमयेनानायोपिवेदस्माकं दुःखस्यात ... किमत्य कश्चिन्नरास्थादिस्त्व ...
किंवन्यथा ... स्वकर्मजंदुःखंप्राप्नोत्यवेति ... भेतद्वयमिति ... भावः २७ किंदुःखेनदुःखे
स्वप्नादितमिति स्वप्नवज्जानंतःपश्यदुःखं ... यतः परतंत्रविषयसौख्यंकिंच ... संप्रति ...
कन्त्येनशरीरेणादुरन्त्यत्रदाराद्विनोकेवलंयहामः ... पूर्वमेवतिः कामाः संतत्वानाम्निनाहलाकुः
लोकेभवानजगादितः कलयावतीर्णः सद्रक्षणायपरखलनिगृहणायचान्यः कश्चिन्नवदीपमतिपालितदेवाभी
२८ हामः किंवाजनः स्वकृतंस्मृतिनात्रविघ्नः २७ स्वयान्नदिनंदपश्चसुखंपरंत्वमीशासाम्यद्धयेन ... केनदुःखं
हराघ्रियुग्मंवंधाद्विदुःखमयः ... कर्मपायात् यो भूभुजोः पुतनामंतगजवीर्यमेकोविभ्रद्धराधभवनेम
गदाद्विबाद्यैः २९ ... यथाहितनवकं ... भवंतमनंतवीर्यं जित्वान्नलोकनिरतं सक
दृष्ट्वाप्युदासन्नृपाः ... ३० इतिमागधसंरुद्धाभवद्दर्शनकांक्षिणः प्रपन्नापादमूलं
ते दीनानांशंविधीयतां ३१ राजदूतेब्रुवत्येवंदेवर्षिः परमद्युतिः बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथारविः
नंदृष्ट्वाभगवान्कृष्णः सर्वलोकेस्वरेश्वरः ३२ ववंदउत्थितः शीर्ष्णासस भ्यः सानुगोमुदा सभाजयित्वाविधिव
कृतासनपरिग्रह वभाषेसूनृतैर्वाक्यैः श्रद्धयातर्पयन्मुनिं ३४
हिर्वैति वरत्वतः ... निष्कामैः लभ्यं ... सिद्धं ... ३८
तिप्रार्थयनेतत्र इति ... कर्मपाशात् भवद्भिरेवविक्रमतो ...
दुःयत्रतिय ... अभिमानात् ... भवनेभूभुजो ... स्मात् ... ३८ किंवपुष्मदीयावयमित्य
स्मानधिक ... भगवतः ... वीर्यमपिन्लोकेनिरतं ... भगवतस्र ... दण्डः प्राग

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं सर्वेग्रहेभ्यः पृथक् पृथक् निर्गत्यानंतरं एकस्य बलवत्सुधर्मप्रविश्य यान्तिविघ्नानां १७ न्यपृच्छत् १८ उपमंत्रिणः
परिहासकाः पृथक् पृथक् स्वस्वसमुदायैः १९ ल्ल दंगादयः प्रसिद्धाः दरः शंखः सूताद्य स्तुवु २० आसनगाम्बलेव
दमाह मंत्रात् व्याच ष्टे तेन्यर्थः वादिनः वदन्त चतुराः २३ गिरिव्रतेतत्संज्ञके दुर्गे पेरू दाञ्चासनं तेषां चतुःस्वनावे
दयते इत्यन्वयः २४ ल्ल स्त्रकम्पति च हृल्लाके राज्ञां विहितः पृ नत्र प्रथमेनपारगाम्न परागे नियोगानुवादः ॥

सुधर्म्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः प्राविशद्यन्निविघ्नानां नर्मसंगमबन्धमयः १७ तत्रोपवि
ष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दि
वि तारकागणैः १८ तत्रोपमंत्रिणो राजन् नानाहास्यरसैर्विभुं उपतस्थुर्नटाचार्या नर्तक्यस्तांडवैः
पृथक् १९ मृदंगवीणामुरजवेणुतालदरस्वनैः ननृतुर्जगुस्तुष्टुवुः सूतमागधवन्दिनः २० तत्रा
हुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः पूर्वेषां पुण्ययशसां राज्ञां चाकथयन् कथाः २१ तत्रैकः पुरुषो रा
जन्नागतोऽपूर्वदर्शनः विज्ञापितो भगवते प्रतीहारैः प्रवेशितः २२ स नमस्कृत्य कृष्णाय परेशाय कृ
तांजलिः राज्ञामावेदयत्तेषां दुःखं जरासंधनिरोधजं २३ ये च दिग्विजये तस्य सन्नतिं न ययुर्नृपाः प्रसह्य रु
द्धास्तेनासन्नयुते द्वे गिरिव्रजे २४ कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभंजन वयं त्वां शरणं यामो भवभी
ताः पृथग्धियः २५ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे यस्तावदस्य ब
लवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै २६
[illegible] २५ पृथक् [illegible] लोक [illegible] भयविज्वरावतो न मंति लोक इति विकर्म्मनिषिद्धं काम्यं च तस्मिन्नितरां रतः
कलाश्च [illegible] देवान् ऋषीन् पितॄन् [illegible] तर्पयित्वा ७ गुष्टीनां प्रथमप्रसूतानां ८ बर्हिर्भिर्हिरण्यपरि [illegible]
मृगान्नमस्कारं [illegible] नेजिकः [illegible] नरं यद्वा [illegible] वत्सानां [illegible]
निमयोन [illegible] वर्हिः [illegible] मृगान्नमु [illegible] रूपुराणावनु [illegible] लक्षाले नगरीता ना
पुतानि वनुर्दशानि [illegible] वहुसंख्याम्नान सम [illegible] चतुर्दशानां लक्षाणां सप्ताधिकमानं सकः वदं चतुरशीत्य

उपस्थायार्कमुद्यंतं तर्पयित्वात्मनः कलाः देवान् ऋषीन् पितॄन् वृद्धान् विप्रानभ्यर्च्य चात्मवान् ७
धेनूनां रुक्मशृंगीणां साध्वीनां मौक्तिकस्रजां पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ८
ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह अलंकृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ९ गोविप्र दे
वतावृद्धगुरून् भूतानि सर्वशः नमस्कृत्यात्मसंभूतीर्मंगलानि समस्पृशत् १० आत्मानं भूषयामास न
रलोकविभूषणं वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ११ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदे
वताः कामांश्च सर्ववर्णानां पौरान्तःपुरचारिणां १२ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत संवि
भज्याग्रतो विप्रान् स्रक्तांबूलानुलेपनैः १३ सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयं तावत्सूत उपा
नीय स्यंदनं परमाद्भुतं १४ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्याग्रतः स्थितः गृहीत्वा पाणिना पाणी सारथे
स्तमारुरोह २५ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः
कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः १७
[illegible] नसहस्राणि त्रयोदश गा नित्यं दिने दिने च प्रातरेव हवेति ९ आत्मसंभूतिः स्वविभूतिः मंगलानि कपिलादीनि १० नरलोकस्य
विभूषणरूपमात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः ११ कामानभिलषितान् सर्वान् समर्प्य १२ विप्रादीन् स्रगादिभिः संवि
भज्य तेभ्यस्तानि दत्वेत्यर्थः १३ उपायुंक्त भोगार्थमग्रहीत् १४ पाणिं कृतां न लोकह हीत्वा १५ सव्रीडप्रेमवीक्षितैरीक्षितः स
खांगिन स्त्रीणां स व्रीडिते क्षितैः कृच्छ्राद्विसृष्टो निरगात् दीनि १६

भा॰ उ॰
९८

150

151

राम:
९८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततस्सप्ततितमेकृष्णस्याह्निककर्माणि दूतनारदयोःकार्यकार्यमंत्रविचारणं १ जगन्मंगलचारित्र्यमाह्निकं जगदीशि
तुः नारदेनक्वचित्किंचित् दृष्टमाह यथाक्रमं मत्यर्थः धर्मकामसुकृत्स्नेनश्रद्धितात्मनेतिप्रस्तुतस्पष्टीकृतस्या
धिकारोयंशब्दः उपवृत्तायांआसन्नायां प्रतिभिश्रीकृष्णैः माधव्योमाधवस्यभार्याः १ वंदिनइवश्रीकृष्णंबोधयं
तीमंतिवयांसिपक्षिणः ऽरुरुवन् अतिशायनाकूजन् मंदारवनवायुभिर्गायत्स्वलिष्वनिद्रावयासि २ वैदर्भीतुपल 152

श्रीशुकउवाच अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् गृहीतकंठ्यः पतिभिर्माधव्योविर
हातुराः १ वयांस्यरूरुवन्कृष्णंबोधयंतीववंदिनः गायत्स्वलिष्वनिद्राणि मंदारवननवायुभिः २
मुहूर्तंतंतुवैदर्भीनामृष्यदतिशोभनं परिरंभणविश्लेषात् प्रियबाहंतरंगता ३ ब्राह्मेमुहूर्तउत्था
यवार्युपस्पृश्यमाधवः दध्यौप्रसन्नकरणआत्मानंतमसःपरं ४ एकंस्वयंज्योतिरनन्यमव्ययं
स्वसंस्थयानित्यनिरस्तकल्मषं ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनि
र्वृतिं अथाप्लुतोंभस्यमलेयथाविधिक्रियाकलापंपरिधायवाससी चकारसंध्योपगमादि
सत्तमोहुतानलोब्रह्मजजापवाग्यतः ६

रणांपरिरंभणविश्लेषात्तंपर्यालोच्य ३।४ एकं अखंडं तत्र हेतुः अनन्यं निरुपाधिं अतएवअव्ययं नित्यं स्वयंज्योतिःस्वे
हेतुः नित्यनिरस्तकल्मषं अविद्यायस्मात्तं उपलक्षणमाह अस्येति विश्वस्यलक्षितः आसोभवाश्वालोनिर्वृतिश्चभावः
सत्तानिर्वृतिरानंदः तथाहिगुणक्षोभात्पूर्वंसन्मात्रंयः सदेवसौम्येदमग्रआसीदित्यादिश्रुतेः सएवानंदःविज्ञान
मानंदंब्रह्मेत्यर्थः ५ अथाप्लुतः स्नातः संध्योपगमादि उपासनं आदिर्यस्यभवति तथाक्रियाकलापंचकार काश्चन्याउदयात्
[illegible] जप ६

भा०द०
६९
हेयोगेश्वरआत्मन् आत्मनिममनसिनवस्वरूपेवानिर्भाताः प्रतीतास्तवयोगमायाः केवलंविदामविद्मः ननुत्वंपरमार्थवि
तिभावः ३८ त्वन्मानुष्यताद्येनमुह्यामि अतोमांप्रस्थापयेत्याह अनुजानीहीति ३९ ततस्मालोकंशिक्षयन्निमंधर्ममास्थितःननुन
वनः हेपुत्रमाखिदमोहमावाप्नुहीति ४० इतिएवमनुगृहीतस्तमेकमेवसंतंददर्शेति ४१ मुहुर्दृष्ट्वा जातकौतुकोत्सु

विदामयोगमायास्तेदुर्दर्शाअपिमायिनां योगेश्वरात्मन्निर्भाताभवत्पादनिषेवया ३८ अनुजानीहिमां
देवलोकांस्तेयशसाप्लुतान् पर्यटामितवोद्गायन्लीलांभुवनपावनीं श्रीभगवानुवाच ब्रह्मन्धर्मं
स्यवक्ताहंकर्तातदनुमोदिता तच्छिक्षयन्लोकमिममास्थितःपुत्रमाखिदः ४० शुकउवाच इत्याचरंतंस 153
मं३ द्धर्मान्पावनान्गृहमेधिनां तमेवसर्वगेहेषुसंतमेकंददर्शह ४१ कृष्णस्यानंतवीर्यस्ययोग
मायामहोदयं मुहुर्दृष्ट्वाऋषिरभूत्विस्मितोजातकौतुकः ४२ इत्यर्थकामधर्मेषुकृष्णेनश्रद्धि
तात्मना सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ४३ एवंमनुष्यपदवीमनुवर्तमानोनाराय
णोऽखिलभवायगृहीतशक्तिः रेमेंगषोडशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजु
ष्टः ४४ यानीहविश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणिहरिश्चकारः यस्त्वंगगायति
शृणोत्यनुमोदतेवा भक्तिर्भवेद्भगवतिह्यपवर्गमार्गे ४५ इतिश्रीभागवतेमहापुराणेदशमस्कं
धेएकोनसप्ततितमोऽध्यायः

निर्विस्मितोभूदिति ४२ श्रद्धितः श्रद्धायुक्तः आत्मायस्यतेन ४३ नारददृष्टाश्रीकृष्णलीलांनिगमयति एवमिति अखि रामः
लस्यभवायउद्भवायगृहीताःशक्तयोनानामूर्तयोयेनसः सव्रीडंचतत्सौहृदंचतेननिरीक्षणंहासश्चताभ्यांजुष्टः ४४ ॥ ६९
अनन्यविषयाणिअसाधारणानि अपवर्गमार्गेमोक्षप्रदे ४५ इतिदशमेएकोनसप्ततितमोऽध्यायः रामः रामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वितानाग्नीनाहवनीयादीन् ऋत्विग्होत्रेणपंचभिर्मखैर्महायज्ञैर्यजंतं २४ ३१ कालेनग्रसमयेविधिनाउपपादयंतंप्रापरां
विवाहमित्यर्थः कल्पयंतंघटयंतंविभूतिभिःविभवैः ३२ प्रस्थापनंदुहितृजामात्रादीनांस्वगृहात्तद्गृहंप्रतिनयनं उपानयनं

जुहुतंचवितानाग्नीन्यजंतंपंचभिर्मखैः भोजयंतंद्विजान्क्वापिभुंजानमवशेषितं २४ क्वापिसंध्यामुपासीनं 154
जपंतंब्रह्मवाग्यतं एकत्रवासिचर्मभ्यांचरंतमसिवर्त्मसु २५ अश्वैर्गजैरथैः क्वापिविचरंतंगदाग्रजं क्व
चिच्छयानंपर्यंकेस्तूयमानंचबंदिभिः २६ मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः जलक्रीडारतंक्वापि
वारमुख्याबलावृतं २७ कुत्रचिद्द्विजमुख्येभ्योददतंगाः स्वलंकृताः इतिहासपुराणानिशृण्वंतंमंगलानिच
२८ हसंतंहास्यकथयाकदाचित्प्रिययागृहे क्वापिधर्मंसेवमानमर्थकामौचकुत्रचित् २९ ध्यायंतमेक
मात्मानंपुरुषंप्रकृतेःपरं शुश्रूषंतंगुरून्क्वापिकामैर्भोगैःसपर्यया ३० कुर्वंतंविग्रहंकैश्चित्संधिंचान्य
त्रकेशवं कुत्रापिसहरामेणचिंतयंतंसतांशिवं ३१ पुत्राणांदुहितॄणांचकालेविध्युपयापनं दारैर्वरै
स्तत्सदृशैःकल्पयंतंविभूतिभिः ३२ प्रस्थापितोपानयनैरपत्यानांमहोत्सवान् वीक्ष्ययोगेश्वरेशस्यये
षांलोकाविसिस्मिरे ३३ यजंतंसकलान्देवान्क्वापिक्रतुभिरूर्जितैः पूर्तयंतंक्वचिद्धर्मंकूपारामालय
स्यादिभिः ३४ चरंतंमृगयांक्वापिहयमारुह्यसैंधवं घ्नंतंतत्रपशून्मेध्यान्परीतंयदुपुंगवैः ३५ अव्य
क्तलिंगंप्रकृतिष्वंतःपुरगृहादिषु क्वचिच्चरंतंयोगेशंतत्तद्भावबुभुत्सया ३६ अथोवाचहृषीकेशंना
रदःप्रहसन्निव योगमायोदयंवीक्ष्यमानुषीमीयुषोगतिं ३७

ततद्गृहाद्गृहंप्रतिनयनं तैर्महोत्सवान्कल्पयंतं योगेश्वरेश्वरस्यश्रीकृष्णस्यप्रपत्यानांमहोत्सवान्वीक्ष्यलोकाः सर्वेविसि
स्मिरेविस्मयंचक्रुःतथाभूतान्कल्पयंतं ३३ ३५ अव्यक्तलिंगंवेषांतरेणाच्छन्नं ३६ ३७ रामः रामः रामः॥

भा॰ दु॰
६६ भगवतात्स्वस्याईशामन्यमानस्यसंभावयन्नाहनैवेति सर्वमित्यादेवमर्दशांमनुमममगौरवात् नर्हिकथंकंसादिवधमैत्रीनत्रा
हखलानांमद्दृष्ट्यैवेत्याहुर्नमितिकुतःजगतःस्थितिर्नाथकरीणांरक्षारणांपालनंनाभ्यांसहनस्यनिःश्रेयसायनवायस्वच्छावतारः इतिव
यंसुच्छुसम्मग्विभःअतःखलदमःसाधुसन्मानंचयुक्तमितिभावः १७ यदुक्तंप्रभोकिंकरःवामेतिअत्राह दृष्टमितिभक्तजनतापा

नारदउवाच नैवाद्भुतंत्वयिविभोऽखिललोकनाथेमैत्रीजनेषुसकलेषुदमःखलानां निःश्रेयसायहिजगत्स्थितिरक्ष
णाभ्यांस्वैरावतारउरुगायविदामसुष्ठु १७ दृष्टंतवांघ्रियुगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगा॰ 155
धबोधैः संसारकूपपतितोत्तरणावलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात् १८ श्रीशुकउवाच ततो
ऽन्यदाविशद्गेहंकृष्णपत्न्याःसनारदः योगेश्वरेश्वरस्यांगयोगमायाविवित्सया १९ दीव्यंतमक्षैस्तत्रापिप्रि
ययाचोद्धवेनच पूजितःपरयाभक्त्याप्रत्युत्थानासनादिभिः २० पृष्टश्चाविदुषेवासौकदायातोभवानिति
क्रियतेकिंनुपूर्णानामपूर्णैरस्मदादिभिः २१ अथापिब्रूहिनोब्रह्मन्जन्मैतच्छोभनंकुरु सतुविस्मि
तउत्थायतूष्णीमन्यमगाद्गृहं २२ तत्राप्यचष्टगोविंदंलालयंतंसुतान्शिशून् ततोन्यस्मिन्गृहेपश्य
न्मज्जनायकृतोद्यमं २३

अपवर्गरूपं किंच अतिदुर्लभंतथाब्रह्मादिभियोगेश्वरैरपिहृदिविचिंत्यांकिंच संसारकूपेपतितानामुत्तरणायावलं
बंआश्रयरूपंभूतंतवांघ्रियुगलंमयादृष्टंअतःकृतार्थोस्मितथापितवस्मृतिर्यथास्यात्तथाऽनुगृहाणेतितत्रस्थापत्नेवति
मंचरामीति १८ १९ अथोदीव्यंतमित्यादौददर्शेतिशेषः २१ २२ रामः रामः रामः रामः राम रामः रामः रामः
६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मुक्तादामविलंबाः विधिधानिधिंबनानि विघंते येषु तैः मयापुत्तमैः परिस्पते भूषितैः २० ईश्व समीपस्थपतीनां भोपग्नि निवृषिपैः
यांते २१ अनुसवं सर्वकालं आत्मना समानानि गुणरूपवयांसि सुवेषालंकारस्त्र यस्य तेन दासीसहस्रेण युतपाणिं हिरण्या
सह २२ श्रीयः रुक्मरपाः पर्यंकतः अर्वाविधात् उपवेशयामास १४ आविभूतश्चाविभः दधारम्पधः विभूदितिरा त्रं तवातप

वितानेनिर्मिते त्वष्ट्रा मुक्तादामविलंबिभिः दंतेरासनपर्यंके मयापुत्तमपरिस्कृतैः १० दासीभिर्निष्ककंठीभिः — नि २
सुवासोभिरलंकृतं पुंभिः सुकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ११ रत्नप्रदीपनिकरद्युतिभिस्तमध्यान्तं विवि
त्रमलभीमु चिरस्ताडिनीश न्कलनिपत्रहिहितागरु धूलमश्चैर्निर्यांति सौख्यघनकुहृपदन्तदतः १२ तस्मिन्
समानगुणरूपवयः सुवेषदासीसहस्रयुतयानुसवं गृहिण्या विपादद्रतीवमरव्यजनेन रुक्मदंडेन साल्व
तपतिं परिवीजयंत्या १३ तं संनिरीक्ष्य भगवानस्वहस्तांत्विनः श्रीपर्यंकतः सकल धर्मवतावरिष्ठः आननम
तपतिं परिवीजयंत्या १३ तं संनिरीक्ष्य भगवान्स्वहस्तात्त्विनः श्रीपर्यंकतः सकलधर्मवतावरिष्ठः आनम्य
पादयुगलं शिरसा किरीटजुष्टेन सांजलिरलीकिपाद्यासने स्व १५ तस्या जनितमवर्णातदपःस्वमूर्ध्नि बिभ्र १५
न्महत्तरोपित्सलापतिर्हि धूक्तायादेवकृतिपगुरूनाम धुर्कं तस्येवय धर्मराशो यमरोघतीर्थं
रतद्धमन रोषितस्ल्लापतिर्हि पुरुदायदेव मितिपगुरूनामयुक्तं तस्येवयथाराधोसमुदाय तीर्थं २५
संपूज्य देवक्रुषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन वाण्याभिभाष्य मितया मृत
मिष्टया तं प्राह प्रभो भगवते करवाम हे कि २६
वसंपूज्याभिभाष्य व प्राह सुत्तरेणान्वयः कथंभूतः यस्यवरणशौचं गंगाख्य शोषतीर्थं सः अतः एवंजगद्गुरुतरोपि
सतां धर्मभर्तापतित्वा द्वन्नकरोदित्यर्थः सतां पतित्वे हेतुः ब्रह्मण्यदेव इति पद्रमगुणाक्षतं नाम तस्येवप
तो युक्तं समं जसंम्भुतस्तस्मिन्प्रवर्तनाये वमाचरणमित्यर्थः २५ अभिभाष्य दिष्ट्यात्वदागमनमित्यादिप्रिय

मु॰क्रा॰ ६९

भा॰ पु॰ ६५ एकोनसप्ततितमे गार्हस्थ्यं प्रतिमंदिरं कृष्णस्य नारदो दृष्ट्वा विस्मितोगान्नतः स्तवन् १ दिदृक्षयामुनिर्येनाह विक्रमितिः
अष्टसहस्रस्त्रीः उद्वाह इत्यर्थः नारदः समागात् २ ताश्चाह नारदोमुनिर्दृष्ट्वा सः ईक्षाद्भुतकुसुमः नाराणसि माभुभरवोमग्नः
पुष्पानस्तु वृद्धिनाना मलीनां कुलानि तैर्नादितां ३ पुरिततत्प्रापत्यु ८ नहामक रतैः ग्रस्वायंते प्रकारान्तइतित्र्या
तं स्वरारत्नमयापरिकरायेषु तैः ५ पतंगः प्रबलंगः पतीकाप सुतेषु जेषकोरतस्मात वा यस्मात ६ तस्यामभवेपि

श्रीशुक उवाच नरकं निहितं श्रुत्वा तथोद्वाहं च योषितां कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः १ चित्रं
बतैतदेकेन वपुषा युगपत्पृथक् गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् २ इत्युत्सुको द्वारवतीं देव
र्षिर्द्रष्टुमागमत् पुष्पितोपवनारामद्विजालिकुलनादितां ३ उत्फुल्लेन्दीवराम्भोजकल्हारकुमुदोत्पलैः
घुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ४ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः महामर — ना
कतप्रष्ठैः स्वर्णरत्नपरिच्छदैः ५ विभक्तरथ्यापथचत्वरापणैः शालासभाभी रुचिरां सुरालयैः
संसिक्तमार्गांगणवीथीदेहलीं पतत्पताकाध्वजवारितातपां ६ तस्यामन्तःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः
हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ७ तत्र षोडशभिः सद्मसहस्रैः समलंकृतं विवेशैकतमं शौरेः
पत्नीनां भवनं महत् ८ विष्टब्धं विद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा

९

स्पयैर्लोकपालैरचितं ७ षोडशभिः सप्तसहस्रैः समलंकृते ततः पुरं विवेश तत्र वतस्यशौरेः पत्नीनां भवनेषु एकतमं विवे
शेत्यन्वयः यत्र स्वकौशलं त्वष्ट्रा दर्शितमित्यंतपुरभवनयोर्विशेषणं ८ तदनु व पुराधिपति चतुर्भिर्विष्टब्धमिति वि
द्रुमस्तंभैर्विष्टब्धं विष्टब्धं वैदूर्यमयानि फलकोत्तमानि स्तंभाग्र पाणिच्छादनानि तैः इंद्रनीलमयैः कुड्यादिभिर्भोप
लक्षितं जगत्या भूमिकया च इंद्रनीलमय्यानहतात्विट् यस्याः तया ९ रामः रामः रामः रामः रामः रामः रामः — रामः ६५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

158

लांगलाग्रेण राष्ट्रं क्षिप्तवानतः प्राकारमूले निखातेऽद्य हृदि यं समुत्पाद्य ४१ ४२ जिजीविषव इत्यपक्षपाधिक्यं सोढव्यं ४३ ४४ ४५
रोषशयनं कशिपुविशेषपर्यंके परिशिष्यमाणो वः स च त्वमेवेति वा ४६ अस्मात्तु कोपस्य तव यमनुचितत्वमाह । कोपस्तस्य

लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ४१ जलयानमिवाघूर्णं
गंगायां नगरं पतत् आकृष्यमाणमालोक्य कौरवाः जातसंभ्रमाः ४२ तमेव शरणं जग्मुः सकुटुम्बा जिजीविषवः सलक्ष्मणं पुरस्कृत्य साम्बं प्रांजलयः प्रभुं ४३ राम रामाखिलाधार प्रभावं न विदाम ते मूढानां
नः कुबुद्धीनां क्षन्तुमर्हस्यतिक्रमं ४४ स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः लोकान्क्रीडनकानीश क्रीडतस्ते वदन्ति हि ४५ त्वमेव मूर्ध्नीदमनन्त लीलया भूमण्डलं बिभर्षि सहस्रमूर्धन् अन्ते च यः स्वात्मनिरुद्धविश्वः
शेषे द्वितीयः परिशिष्यमाणः ४६ कोपस्ते ऽखिलशिक्षार्थं न द्वेषान्न च मत्सरात् बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः ४७ नमस्ते सर्वभूतात्मन्सर्वशक्तिधराव्यय विश्वकर्मन्नमस्तेऽस्तु त्वां वयं शरणं गताः ४८ दुर्योधः
श्रीशुक उवाच एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः प्रसादितः सुप्रसन्नो माभैष्टेत्यभयं ददौ ४९ दुर्योधनः पारिबर्हं कुंजरान् षष्टिहायनान् ददौ च द्वादशशतान्ययुतानि तुरंगमान् ५० रथानां षट्सहस्राणि
रौक्माणां सूर्यवर्चसां दासीनां निष्ककण्ठीनां सहस्रं दुहितृवत्सलः ५१ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनन्दितः ५२ ततः प्रविष्टः स्वपुरं हलायुधः समेत्य बन्धूननुरक्तचेतसः
शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ५३ अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमं समुन्नतं दक्षिणतो गंगायामनुदृश्यते ५४ इति श्रीभागवते महापुराणे दशमस्कन्धे हस्तिनापुरकर्षणं नामाष्टषष्टितमोऽध्यायः
सुव्यक्तं दृश्यते गंगाया मन्तु दृश्यते ५४ वेपमानाः अपनं पुरं ये ४८ विश्वकर्मन्हे अनन्त यस्य सर्वमिति संबोधनं ४७
विनाशने नयत इति यः कोपः पाठान्तरे संबोधनं ४७

भा॰ पु॰ ६७

नन्वन वं प्रुमिश्रो मनः क्षिप्तवान् श्रिताः उन्नद्धकण्ठोमदो येषां तेषु वीक्ष्यपुरुषं वा कं अस्मात् दुर्जनाः २९ ३० नाना धनमिजनाद्भिन्नः
नद्धाते यां दृष्ट्वा अश्वमः प्रकर्षेण रामयनी तत्पालकुट्टः दण्डः ३१ दुर्भाषानस्त्रवाक्यशब्दान् ३३ दुर्मर्षरामनुस्मृतिकं दृष्ट्वा नोमसे
नरेन्द्रनिविष्टः आशापथितुं समर्थः ३४ अहो ध्याः श्रीकसमधिछिपतीति कुपितत्वाहस्तु धर्मेन्मादि दर्भिः शितिभिः ३५ ३६ नोऽस्तु

श्रीशुक उवाच नन्वयं धुम्रियो लिन्दल्लदासे भरतर्षभ आज्ञापयामं दुर्योधन सभ्याः पुरमाविशन् २९
इष्टाकुरुणां दौर्शील्यमज्ञात्वावाच्यानि वाच्यतः अवोचन्कोपसंरब्धो दुष्प्रेक्ष्यः प्रहसन्मुहुः ३० नूनं नानामदोन्नद्धाः शान्तिं नेच्छन्त्यसाधवः तेषां हि प्रशमो दण्डः पशूनां लगुडो यथा ३१ अहो यदून्सुसंरब्धान्कृष्णं च कुपितं शनैः सान्त्वयित्वाहमेतेषां शममिच्छन्निहागतः ३२ त इमे मन्दमतयः कलहाभिरताः खलाः तं मामवज्ञाय मुहुर्दुर्भाषान्मानिनोऽब्रुवन् ३३ नोग्रसेनः किल विभुर्भोजवृष्ण्यन्धकेश्वरः शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ३४ सुधर्माक्रम्यते येन पारिजातोऽमराङ्घ्रिपः आनीय भुज्यते सोऽसौ न किलाध्यासनार्हणः ३५ यस्य पादयुगं साक्षाच्छ्रीरुपास्तेऽखिलेश्वरी स नार्हति किल श्रीशो नरदेवपरिच्छदान् ३६ यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थं ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ३७ भुञ्जते कुरुभिर्दत्तं भूखण्डं वृष्णयः किल उपानहः किल वयं स्वयं तु कुरवः शिरः ३८ अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनां असंबद्धा गिरो रुक्षाः कः सहेतानुशासिता ३९ अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयं ४०
नमैः मौलिमुकैः उत्तमाङ्गैः उत्तमः मौलिभिः शितिवा उपासिता नृतीर्थानि येषां गिरिभिः तेषामपि तीर्थं यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्य
तीर्थत्वनिमित्तादिकं च ब्रह्माभवः श्रीश्चाहमपि उद्वहेम कपश्च तावद्यस्य कलायाः अंशस्य कलाः अंशस्य कलाः अंशाः ३७ मत्तानां नामिव
मद्यादिना रुक्षाः परुषाः अनुशासिता स्वपदे प्रभुः सन् ३८

159 दश॰ ६७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नमुरुवमर्दयित्वासत्कृत्यमंगलपाराणायः उपायनहस्ताः १८ अहाम्यपि पुरोगमुः १९ २१ यतपूर्यंदुत्युग्रसेनवाक्यमत्थ्ये
सहेमप्याक्कनमानीयसमर्च्यपतेतिशेषः २२ वीर्यप्रभावःशौर्यंउत्साहः बलोउत्साहः बलसत्वैनेरुक्तंदुष्प्रूरबलंकथं

तेःनिष्प्रीतास्तमाकर्णवद्याप्राणमंस्तु हृतमं नमर्दयित्वाऽभियघुः सर्वेमंगलपाराणायः १८ तंसंगम्यययान्यायं
गामर्घ्यंवन्यवेदयन् तेषांयेतत्प्रभावज्ञाःप्ररोगमुः सिरसावलं १९ वृष्णिकुरुशालिनः ... इवसमनाम
यं परस्परं स्वपाराणमाववभाषे ऽविकत्थवचः २० उग्रसेनःक्षितिशेषाय द्वश्राज्ञापयदमुः तद्व्यग्रदधियःकृत्वा
कुरुभ्यंमाबिलंबितं २१ यद्यूयंबहवस्त्वेकजित्वा धर्मेणधार्मिकं अबध्नाताऽथ तन्मृत्ये वंधुनामैक्यका
म्यया २२ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमंवचः कुरवोबलदेवस्यनिशम्योचुःप्रकोपिताः २३ अहोमहच्चि
त्रमिदंकालगत्यादुरत्यया आरुरुक्षत्युपानद्वैशिरोमुकुटसेवितं २४ एतेयौनेनसंबद्धाः सहशय्यासनाः
शनाः वृष्णयस्तुल्यतांनीता अस्मद्दत्तनृपासनाः २५ चामरव्यजनेशंखमातपत्रं चपांडुरं किरीटमासनंशय्यां
भुंजंत्यस्मदुपेक्षया २६ अलंयदूनांनरदेवलांछनैर्दातुःप्रतीपैःफणिनामिवामृतं येनप्रसादोप
चिताहिपाद्‌वामाज्ञापयंत्यद्यगतत्रपावतः २७ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः अदत्तम
वरुंधीतसिंहग्रस्तमिवोरणः २८

अत्मनःशक्तेःसमंअनुरूपं २२ उपानत्पादरक्षाशिरआरोढुं इच्छति हीनाअस्माभिर्ज्ञापयंतीत्यर्थः २४ अस्मेवप्रपं
चःएतदुतिचतुर्भिःयौनेनसम्बन्धेनवैवाहिकेन २५ किंचचामरव्यजनेइतिभुंजातिउपभुंजतइत्यर्थः अस्मदुपेक्षयाप्र
त्यक्षमनभिमत्य २६ अलमिति अतःपरंतान्यपहरिष्यामइत्यर्थः २७ अपवरुंधीतस्वीकुर्यात उतरणमेषः २८ रामः

धार्तियाम्यांसिसुराशार्ङ्ग्यांशीसुसंयताः घाराणायमादिभिर्दमिताः ४ कुरुवृद्धोभीष्मेनानुमोदिनीः यदेतेइत्यर्थः ५ ६
करोग्रिशीर्षेघातं ७ अन्यत्र असहन अचिंत्यस्यभगवतोऽर्भकः अचिंत्यस्यासावर्भश्चेतिवा ८ ९ तत्ययर्थयति

निग्रहीतं सुतंकृत्वा पद्य्यांनी ... हत्तमन्यः भग्नदर्पाः समं यांतिप्राणा द्रवसुसंयताः ४ इतिक
र्णःशलोभूरियज्ञकेतुःसुयोधनः सांबमारेभिरेवद्धुंकुरुवृद्धानुमोदिताः ५ दृष्ट्वानुधावतःसांबो
धार्तराष्ट्रान्महारथः प्रगृह्यरुचिरंचापंतस्थौसिंहइवैकलः तंतेजिघृक्षवःकुद्धास्तिष्ठतिष्ठेतिभा
विणः आसाद्यधन्विनोवाणैःकर्णाग्रणःसमाकिरन् ७ सोपविद्धःकुरुश्रेष्ठकुरुभिर्यदुनंदनः
नामृष्यत्तदचिंत्यार्भःसिंहःक्षुद्रमृगैरिव ८ विस्फूर्ज्यरुचिरंचापंसर्वान्विव्याधसायकैः कर्णादीन्
षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् १० चतुर्भिश्चतुरोवाहानेकैकेनचसारथीन् रथिनश्चमहेष्वा
सांस्तस्यतेभ्यपूजयन् ११ तंतुतेविरथंचक्रुश्चत्वारश्चतुरोहयान् एकस्तुसारथिंजघ्नेविच्छेदान्यः
शरासनं १२ तंबध्वाविरथीकृत्यकृच्छ्रेणकुरवोयुधि कुमारंस्वस्यकन्यांचस्वपुरंजयिनोऽविशन्
१३ तच्छ्रुत्वानारदोक्तेनराजन्संजातमन्यवः कुरून्प्रत्युद्यमंचक्रुरुग्रसेनप्रचोदिताः सांत्वयित्वातुतान्
रामः संनद्धान्वृष्णिपुंगवान् नैच्छत्कुरूणांवृष्णीनांकलिंकलिमलापहः १४ जगामहास्तिनपुरंरथेनादि
त्यवर्चसा ब्राह्मणैःकुलवृद्धैश्चवृतश्चंद्रइवग्रहैः १५ गत्वागजाह्वयंरामोबाह्योपवनमास्थितः उद्धवंप्रे
षयामासधृतराष्ट्रंबुभुत्सया १६ सोभिवंद्यांबिकापुत्रंभीष्मंद्रोणंचवाह्लिकं दुर्योधनंचविधिवद्राममागतं
मब्रवीत् १७

चतुर्भिश्चतुरश्चत्वारोपीस्तानुसंधेयाः तत्कर्मतेसमानिनेदतं १० ११ स्वस्यदुर्योधनस्यकन्यांवनितांचेतिसेषः १२ १३ यतःक
लिनैच्छत्ततःसांत्वयित्वाजगामेति १४ १५ धृतराष्ट्रप्रतिबुभुत्सयातिअभिप्रायजिज्ञासयेत्यर्थः १६ विधिवदभिवंद्य १७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अरुरुजन्ताडयामास २३ जत्रौकंठबाहुमूले २४ टंकाः सनोपविवरगिरितत्सहितः २५ २६ जगतोव्यतिकरंनाशवहतीति
तथानं २७ इतिदशमेसप्तषष्टितमः अथ अष्टषष्टितमे सांबनिरुद्धकौरवेषुच तदिमोक्षायरामेणगजाह्वयविक

नू २

पुनरन्यंसमुत्क्षिप्यकृत्वानिष्पत्रमोजसा तेनाहनत्सुसंक्रुद्धस्तंबलःशतधाच्छिनत् २० ततोन्येनरुषाज 162
घ्नेतंचापिशतधाच्छिनत् एवंयुध्यन्भगवताभग्नेभग्नेपुनःपुनः आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनं २१
ततोमुंचच्छिलावर्षंबलस्योपर्यमर्षितः तत्सर्वंचूर्णयामासलीलयामुशलायुधः २२ सबाहूतालसं
काशौमुष्टीकृत्यकपीश्वरः आसाद्यरोहिणीपुत्रंताभ्यांवक्षस्यरूरुजत् २३ यादवेंद्रोपितंदोर्भ्यांत्यक्त्वा
मुशललांगले जत्रावभ्यर्दयत्क्रुद्धःसोपतद्रुधिरंवमन् २४ चकंपेतेनपततासटंकःसवनस्पतिः पर्व
तःकुरुशार्दूलवायुनानौरिवांभसि २५ जयशब्दोनमःशब्दःसाधुसाध्वितिचांबरे सुरसिद्धमुनीं
द्राणामासीत्कुसुमवर्षिणां २६ एवंनिहत्यद्विविदंजगद्व्यतिकरावहं संस्तूयमानोभगवाञ्जनैःस्व
पुरमाविशत् २७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्विविदवधोनामसप्तषष्टितमोध्यायः
श्रीशुकउवाच दुर्योधनसुतांराजन्लक्ष्मणांसमितिंजयः स्वयंवरस्थामहरत्सांबोजांबवतीसुतः १ कौ
रवाःकुपिताऊचुर्दुर्विनीतोयमर्भकः कदर्थीकृत्यनःकन्यामकामामहरद्बलात् २ बध्नीतेमंदुर्विनी
तंकिंकरिष्यंतिवृष्णयः येस्मत्प्रसादोपचितांदत्तांनोभुंजतेमहीं ३

धरां १ रामचरित्रान्तरंविरूपयन्नाह दुर्योधनसुतामितिसमितिंजयः संग्रामजित् १ ३ नोस्माकंमहीं
अस्माभिर्दत्तांभुंजते भूपतयइतिभावः ३ रामः रामः रामः रामः रामः रामः रामः रामः रामः रामः ॥

भा० दु० अथधात्वपिदधेपेशस्कारीभ्रमरः ७ ८ प्रभिन्नंमत्तं १० ११ जात्यास्वभावेनैवचापलंयासांता १२ हेलयामासअव
६२ गतेनिरीक्षतेनिरीक्षमाणरामस्यनमना दृष्टमर्षः १४ आस्फालयत् योषितांवासांस्याकृष्यपाटितवान्विप्रचक्रेए

पुरुषान्योषितोदुष्टःक्ष्माभृद्द्रोणीगुहासुसः निक्षिप्यचाप्यधाच्छैलैःपेशस्कारीवकीटकं ७
एवंदेशान्विप्रकुर्वन्दूषयंश्चकुलस्त्रियः श्रुत्वासुललितंगीतंगिरिंरैवतकंययौ ८ तत्रापश्यद्य
दुपतिंरामंपुष्करमालिनं सुदर्शनीयसर्वांगंललनायूथमध्यगं ९ गायंतंवारुणींपीत्वामदविह्व
ललोचनं विभ्राजमानंवपुषाप्रभिन्नमिववारणं १० दुष्टःशाखामृगःशाखामारूढःकंपय 163
द्रुमान् चक्रेकिलकिलाशब्दमात्मानंसंप्रदर्शयन् ११ तस्यधार्ष्ट्यंकपेर्वीक्ष्यतरुण्योजाति
चापलाः हास्यप्रियाविजहसुर्बलदेवपरिग्रहाः १२ ताहेलयामासकपिर्भ्रूक्षेपैःसंमुखादिभिः
दर्शयन्स्वगुदंतासांरामस्यचनिरीक्षतः १३ तंग्राव्णाप्राहरत्क्रुद्धोबलःप्रहरतांवरः सवंच नू
यित्वाग्रावाणंमदिराकलशंकपिः १४ गृहीत्वाहेलयामासधूर्तस्तंकोपयन्हसन् निर्भि
द्यकलशंदुष्टोवासांस्यास्फालयद्बलं कदर्थीकृत्यबलवान्विप्रचक्रेमदोद्धतः १५ तंतस्याविनयं
दृष्ट्वादेशांश्चतदुपद्रुतान् क्रुद्धोमुशलमादत्तहलंचारिजिघांसया १६ द्विविदोपिमहावीर्यःशा
लमुद्यम्यपाणिना अभ्येत्यतरसातेनबलंमूर्ध्न्यताडयत् १७ तंतुसंकर्षणोमूर्ध्निपतंतमचलोयथा प्र
तिजग्राहभगवान्सुनंदेनाहनच्चतं १८ मुशलाहतमस्तिष्कोविरेजेरक्तधारया गिरिर्यथागैरिकयाप्रहा
रंनानुचिंतयन् १९

चमपकृतवान् १५ १६ शालंवृक्षं १७ सुनंदेनमुशलेनततःअहनिनिस्पर्धःतंवानरं १८ मस्तिष्कंमस्तकावयवविशेषःगै रामः
रिकधातोहितयाधातुनानुचिंतयन्अगणयन् १९ ६२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४२ इतिदशमेचत्वारिंशोध्यायः सप्तचत्वारिंशेनमेराम्पोगिरीरैवतकेमदात्तस्वैरं युवतिभिः क्रीडन्तवधीद्विविदंरवलं का
लिंदीवि दारणानंतरं रामचरितेद्विविदवधपर्यन्तंसंगतमप्यनुक्तान्मूलेनाविन्त्वेनपौंड्रकवधादिनिरूपणदानीनंदप्रसं
ति भूपोहमित्यादिना रामचरितम्पवशेषमपाद्भुतः कर्मत्वेहेतुः तत्रवानंतन्त्वेतत्राप्यमप्रपन्नमिति १ नरकस्यसरवीति 164

दम्धावाराणसींसर्वांविशेषात्कंसुदर्शनं भूयः पार्श्वमुपानिष्टन्तस्मात्क्लिष्टकर्मिणः ४२ पठवं
श्रावयेन्मर्त्यउत्तमश्लोकविक्रमं समाहितोवाश्रृणुयात्सर्वपापैःप्रमुच्यते ४३ इतिश्रीभागवतेमहा
पुराणेदशमस्कंधेपौंड्रकादिवधोनामसप्तषष्ठितमोध्यायः राजोवाच भूयोहंश्रोतुमिच्छामिरा
मस्याद्भुतकर्मणः अनंतस्याप्रमेयस्ययदन्यत्कृतवान्प्रभुः १ श्रीशुकउवाच नरकस्यसखाकश्चिद्
द्विविदोनामवानरः सुग्रीवसचिवःसोथभ्रातामैंदस्यवीर्यवान् २ सख्युःसोपचितिंकुर्वन्वानरोराष्ट्र
विप्लवं पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ३ क्वचित्सशैलानुत्पाट्यतैर्देशान्सम
चूर्णयत् आनर्तान्सुतरामेवयत्रास्तेमित्रहाहरिः ४ क्वचित्समुद्रमध्यस्थोदोर्भ्यामुत्क्षि
प्यतज्जलं देशान्नागायुतप्राणोवेलाकूलेन्यमज्जयत् ५ आश्रमानृषिमुख्यानांकृत्वाभग्न
वनस्पतीन् अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ६

हरिरामयोरेकैकस्मात्सुग्रीवस्यसचिवत्वोक्तितस्यमंत्रबलं मैन्दस्यभ्रातेति रामायणेप्रतिप्रसिद्धत्वेनवीर्याधिक्यमुक्तमिति २
सख्युर्नरकस्यअपचितिंप्रत्युपकारंराष्ट्रविप्लवोनाशोयथाभवतितथापुरादीनदहदितिसंबंधः ३ क्वचित्क्वचिदि
तिक्वचित्सहितद्वितीयार्थ ४ तस्यसमुद्रजलंबाहुभ्यामुत्क्षिप्यवेलायाःकूलेवर्तमानान्देशान्सावयामास
इति ५ आश्रमान्भग्नवनस्पतीन्कृत्वा अग्नीन्दूषयत्शकृन्मूत्रादिकंतत्यजे ६

अभिचरन्नग्निं यदि कुर्वन्ति द्विजाः इति नियमः तं प्रतापमिव बाणः रावणः क्रोधेन समः अंगारोष्ठ अतिलोहितनयनः ३२
दंष्ट्राभिरुग्रैर्भ्रुकुटीदण्डोग्रकठोरक्रूरआस्यं यस्य सः जितिमंत्रैर्विहरन् ३३ दिशः प्रदहन् ३४ ३५ बाहीति बाहीत्याकुरितिरोषः

इत्यादिष्टस्तथाचक्रे कृत्यायाभिचरन्मुनी ततोग्निरुत्थितःकुण्डान्मूर्तिमानतिभीषणः तप्तताम्रशिखाश्म
श्रुरंगारोद्गारिलोचनः ३२ दंष्ट्रोग्रभ्रुकुटीदण्डकठोरास्यःस्वजिह्वया आलिहन्सृक्विणीनग्नोविधुन्व 165
न्स्त्रिशिखंज्वलत् ३३ पद्भ्यांतालप्रमाणाभ्यांकंपयन्नवनीतलं सोभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दि
शः ३४ तमाभिचारदहनमायान्तंद्वारकौकसः विलोक्यतत्रसुःसर्वेवनदाहेमृगायथा ३५ अक्षैःसभा
यांक्रीडन्तंभगवन्तंभयातुराः त्राहित्राहित्रिलोकेशवह्नेःप्रदहतःपुरं ३६ श्रुत्वातज्जनवैक्लव्यंदृष्ट्वास्वानां
सू॰ ४ चसाध्वसं शरण्यःसंप्रहस्याहमाभैष्टेत्यविताऽस्म्यहं ३७ सर्वस्यान्तर्बहिःसाक्षीकृत्यांमाहेश्वरींविभुः
विज्ञायतद्विघातार्थंपार्श्वस्थंचक्रमादिशत् ३८ तत्सूर्यकोटिप्रतिमंसुदर्शनंजाज्वल्यमानंप्रलयानल
प्रभं स्वतेजसाखंककुभोथरोदसीचक्रंमुकुन्दास्त्रमथाग्निमार्दयत् ३९ कृत्यानलःप्रतिहतःसरथांग
पाणेरस्त्रौजसासनृपभग्नमुखोनिवृत्तः वाराणसींपरिसमेत्यसुदक्षिणंतंसर्त्विग्जनंसमदहत्स्व
कृतोऽभिचारः ४० चक्रंचविष्णोस्तदनुप्रविष्टंवाराणसींसाट्टसभालयापणां सगोपुराट्टालककोष्ठ
संकुलांसकोशहस्त्यश्वरथान्नशालां ४१

३६ अहमाविलंतस्मिन्नुक्षिप्स्यामीति ३७ ३८ रोदसीवप्रकाशयदिति शेषः यद्वा स्वतेजसाखादीन्प्रतिनाज्वल्यमानानांप्रत्यर्थं
प्रकाशमानमित्यर्थः आर्दयत्अपीडयत् ३९ आदितोग्निर्यत्कृतवान्तदाहकृत्यानलइति सहर्त्विग्भिः जनैश्चवर्तमा
नांअभिचर्यते नेनाभिचारः कृत्यानलः ४० अट्टादिसहितांप्रदाहंवा ४१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आयोधनं रणस्थानं असृग्रिणावखंडितैः आक्रीडं भूताक्रीडनं विकल्पान्ते रुद्रस्य क्रीडास्थानमिव १८ २० गिरेः शृङ्गं पक्षोति
२१ प्रधयं किमिदमिति निपश्चात् कस्यमिति भाष्यकस्य वेति संशयिरे संशयं कृतवन्त इति २५ २६ संस्थाविधिं और्ध्वदेहिकं याम्य

आयोधनं तद्रथवाजिकुंजरद्विपत्खरोष्ट्रैररिणावखंडितैः बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपते
बो रिवोल्बणं १८ अथाह पौंड्रकं शौरिर्भो भो पौंड्रक यद्भवान् दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते १९ त्याज
यिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतं व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगं २० इति क्षिप्त्वा शितैर्बाणै
र्विरथीकृत्य पौंड्रकं शिरोऽवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः २१ तथा काशिपतेः कायाच्छिर उत्कृत्य प
त्रिभिः न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः २२ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः द्वारकामा
विशत्सिद्धैर्गीयमानकथामृतः २३ स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबंधनः बिभ्राणश्च हरे राजन्स्व
रूपं तन्मयोऽभवत् २४ शिरः पतितमालोक्य राजद्वारे सकुंडलं किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः २५
राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् २६ सुदक्षिण
स्तस्य सुतः कृत्वा संस्थाविधिं पितुः निहत्य पितृहंतारं यास्याम्यपचितिं पितुः २७ इत्यात्मनाभिसंधा
य सोपाध्यायो महेश्वरं सुदक्षिणोऽर्चयामास परमेण समाधिना २८ प्रीतोऽविमुक्तो भगवांस्तस्मै
वरमदाद्विभुः पितृहंतृवधोपायं स वव्रे वरमीप्सितं दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजं अभिचा
रविधानेन स चाग्निः प्रमथैर्वृतः साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः ३०

परिवर्तिनिः कृतिं आत्मनाभिसंधाय पृष्ट्वा ध्यवस्य २८ सुदक्षिणासुदारः २९ वरमदात् वरणीयं सुकृतवान् इत्यर्थः ऋत्विजं ऋ
[illegible] इतिष्कृतेः अब्रह्मण्ये प्रयोजित कृत्ये सम्प्रयोजितो भविष्यतीति सूचितं ३०॥

भा० द० ७ हे मूढ उत्स्रक्ष्ये त्वयि प्रक्षेप्स्यामि यैः सह त्वमेवं विकत्थसे [illegible]
६० क्षेप्स्यामि इत्यर्थः ८ मां शरणं [illegible] सुदर्शनादिभिः [illegible]
[illegible] तत्र न [illegible] शरणं माम्

वासुदेवोऽवतीर्णोऽहमेक एव न चापरः भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज ५ यानि त्वमस्मच्चिह्नानि मौढ्या
द्बिभर्षि सात्वत त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं ६ श्रीशुक उवाच कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्प
मेधसः उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ७ उवाच दूतं भगवान्परिहासकथामनु उत्स्रक्ष्ये मूढ चिह्नानि
यैस्त्वमेवं विकत्थसे ८ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः शयिष्यसे हतस्तत्र भविता शरणं शुनां ९ इति दू
तस्तमाक्षेपं स्वामिने सर्वमाहरत् कृष्णोऽपि रथमास्थाय काशीमुपजगाम ह १० पौंड्रकोऽपि तदुद्योगमुपलभ्य महार
थः अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतं ११ तस्य काशीपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप अक्षौहिणीभि
स्तिसृभिरपश्यत्पौंड्रकं हरिः १२ शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितं बिभ्राणं कौस्तुभमणिं वनमा
स लाविभूषितं १३ कौशेयवाससी पीते वसानं गरुडध्वजं अमूल्यमौल्याभरणं स्फुरन्मकरकुंडलं दृष्ट्वा त
मात्मनस्तुल्यं वेषं कृत्रिममास्थितं यथा नटं रंगगतं विजहास भृशं हरिः १५ शूलैर्गदाभिः परिघैः श
क्त्यृष्टिप्रासतोमरैः असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिं १६ कृष्णस्तु तत्पौंड्रककाशिराजयोर्बलं ह्
गजस्यंदनवाजिपत्तिमत् गदासिचक्रेषुभिरार्दयद्भृशं यथा युगांते हुतभुक्पृथक्प्रजाः १७ श्री श्री

योऽभविता सि ८ काशीमिति पौंड्रकस्य पितामित्रपुरे वस्थानात् १० ११ पार्ष्णिग्राहः पृष्ठतो रक्षकः १२ १३ गरुडः राम:
कृत्रिमो ध्वजो यस्य तं अमूल्यान्यमौलिशिरोभरणानि यस्य तं १६ गजस्यंदनानि चतुरंगबलं मर्दितवान् पृथक् प्रजाः ६०
चतुर्विधभूतग्राममिव युगांताग्निरिति १७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२७ विजगाह अवगाहतं कृतवान् २८ उत्तीर्णाय निर्गताय असितांवरादिनि कांतिर्द्ददौ कांतिर्लक्ष्मीः यद्योक्तं वै
एवमेव रूपाप्रहितं वास्मै मालामम्लानपंकजेसमुद्रामेत्यावश्येनीलेलक्ष्मीर इयरपत्नेति हरिवंशे च बलं प्रति लक्ष्मीया
क्यजातरूपमयं वै कुंडलं वत्त भूषणं आहिपयाः अस्मै दिव्यं अवराभूषणं देवमाप्रतिग्र ह्यैपाशीर्भूषणं कियाः

पश्यमां भगवतो भगवन्नाम जानती मोनुमर्हसि विश्वात्मा प्रपन्नां भक्तवत्सल: २७ ततो व्यमुंचद्यमुं-
नां याचितो भगवान्बलः विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट् २८ कामं विहृत्य सलिलादुत्तीर्णाया
सितांबरे भूषणानि महार्हाणि ददौ कांतिः शुभां स्रजां २९ वसित्वा वाससी नीले मालामम्लानमुच्य कांच-
नीं रेजे स्वलंकृतो लिप्तो माहेंद्र इव वारणः ३० अद्यापि दृश्यते राजन् यमुनाकृष्टवर्त्मना बलस्यानंतवी-
र्यस्य वीर्यं सूचयतीव हि ३१ एवं सर्वा निशा याता एकेव रमतो व्रजे रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयो-
षितां ३२ इति श्रीभागवते महापुराणे दशमस्कंधे बलदेवविजये यमुनाकर्षणं नाम पंचषष्टित-
मोऽध्यायः श्रीशुक उवाच नरदेवे गते रामे करूषाधिपतिर्नृप वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहि-
णोत् १ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतं २ दूतं च प्रा-
हिणोन्मंदः कृष्णायाव्यक्तवर्त्मने द्वारकायां यथा बालो नृपो बालकृतोऽबुधः ३ दूतस्तु द्वारकामेत्य स-
भायामास्थितं प्रभुं कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत् ४
मित्यादि २९ वसित्वा परिधाय आमुच्य कंठे निधाय चंदनादिभिर्लिप्तः ३० ३१ एकैव एकेव निशा यथा माधुर्यैर्विला-
सैः ३२ इति दशमे पंचषष्टितम वृत्तपुंसषष्टितमे काशीं गत्वा हन्योंड्रकं हरिः तन्मित्रं च ततो दग्धं सुदर्शन वधा-
... बालैर्मैनः २ बालकृतो नृपः बालैर्नृपत्वेन क्रीडायां परिकल्पितः ३४ ॥

यदि ते कर्णमस्पृशमित्यस्य संदेहो संदेहं वचनं यदि चेत्तः प्रमाणं स्यादिति वत् कर्णपथं नूनं प्राप्तः स्यादित्यर्थः १० किंच वि-
त्विति पूर्वेषां भूतानां नाम्नो गुरुः साक्षिणस्ते अविदितं किंतु न किंचित् ११ १२ १३ ऋतव्रतेभ्यः सद्भ्यो वारेभ्यः तपसा ख्याताः
प्रख्याताश्च ते ब्रह्मशीव वदान्यास्च तु दाराः अध्यापनाशीलाश्च ते संतश्च तेभ्यः १४ पूर्वं वापी कूपादि चरितं कृतं १५ एवं

नृग उवाच नृगो नाम नरेंद्रोऽहमिक्ष्वाकुतनयः प्रभो दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशं ९
किं नु तेऽविदितं नाथ सर्वभूतात्मसाक्षिणः कालेनाव्याहतदृशो वक्ष्येऽथापि तवाज्ञया १० यावत्यः सिक-
ता भूमेर्यावत्यो दिवि तारकाः यावत्यो वर्षधाराश्च तावतीरददं स्म गाः ११ पयस्विनीस्तरुणीः शीलरू-
पगुणोपपन्नाः कपिला हेमशृंगी न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहं १२ स्व-
लंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो
द्विजपुंगवेभ्यः १४ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरौप्यशय्याः वासांसि रत्नानि
परिच्छदान्रथानिष्टं च यज्ञैश्चरितं च पूर्तं १५ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने संपृक्ता
विदुषा सा च मया दत्ता द्विजातये १६ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तं ममेति प्रतिग्राह्याह
नृगो मे दत्तवानिति १७ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ भवान् दातापहर्तेति तच्छ्रुत्वा
मेऽभवद्भ्रमः १८ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां १९

वर्तमानस्य समसंकटं विचिदापन्नं भ्रंशरवित्याह कस्य चिदिति द्विजमुख्यस्य प्रतिग्रहनिवृत्तयस्य संपृक्ता मिलि-
सा
तः अविदुषा ब्राह्मणस्येयमित्यजानता १६ १७ प्रतिग्राही प्रतिग्रहीता अर्कं दानेति स्वामिनो अर्कं अपहर्तेति अभद्रमः भ्रा-
कुलोऽभवमित्यर्थः १८ तदा उभावपि प्रत्येकमनुनीतौ प्रार्थितौ कथं तदाह गवामिति सार्द्धेन १९ रामचंद्रेभ्यो नमः ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰
५७

२० अपरः प्रतिग्राही दुराग्रहोऽयं च्युतक्षं त्वयोक्तं अन्यदपि गवामयुतं यदि ददासि तदपीमां विहाय नेच्छामीत्युक्त्वाऽगा॰
त्यक्त्वा यथाविसृष्टः २१ एतस्मिन्नंतरे इति इतः पूर्वं वा पाभावान्तेनु समयोऽइति भावः २२ उताहो इत्येकं पदं अथवा पूर्वम॰
अमितियमस्य स्वस्य वाक्यं पश्ये पश्यामि २३ देहे वयपूर्वं अशुभं भुंजे इति मयोक्ते समयः पयेनुः प्राह २४ दुर्घटेन श्रीकृष्ण
दर्शनेन विस्मितः सन्नात्मन्यममभिनंदति सत्वमिति हे विभो स त्वं मम साक्षात्पथः लोचनगोचरः सन् कथं साक्षात्प्रत्यक्षो

भवंतावनुगृह्णीतां किंकरस्यापि जानतः समुद्धर नौ नां कृच्छ्रात्पतंतं निरये प्रभो २० नाहं प्रतीच्छे वै राज
न्नित्युक्त्वा स्वाम्यपाक्रमत् नान्यद्गवामप्ययुतमिच्छामीत्यपरो ययौ २१ एतस्मिन्नंतरे याम्यैर्दूतैर्नीतो यमा॰
लयं यमेन पृष्टस्तत्राहं देवदेव जगत्पते २२ पूर्वं त्वमशुभं भुंक्ष्व उताहो नृपते शुभं नांतं दानस्य धर्म॰
स्य पश्ये लोकस्य भास्वतः २३ पूर्वं देवाशुभं भुंज इति प्राह पतेति सः तावदद्राक्षमात्मानं कृकलासं पतन्
प्रभो २४ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः २५
स त्वं कथं मम विभोऽक्षिपथः परात्मा योगेश्वरैः श्रुतिदृशामलहृद्विभाव्यः साक्षादधोक्षज उरु
व्यसनांधबुद्धेः स्यान्मेऽनुदृश्य इह यस्य भवापवर्गः २६ देवदेव जगन्नाथ गोविंद पुरुषोत्तम नारा
यण हृषीकेश पुण्यश्लोकाच्युताव्यय २७

सीत्यर्थः किमत्राश्चर्यं तदाह परः आत्मा अतएव योगेश्वरैरपि श्रुतिदृशा उपनिषत्सु चक्षुषा अमले हृदि विभा॰
व्यः चिंत्यः यतोऽधोक्षजः अक्षजमैंद्रियं ज्ञानं तदधः अर्वागेव यस्मात् सः यस्येह भवापवर्गो भवतस्य भ॰ — रामः ५७
वांधत्वमसात् उरु व्यसनेन कृकलासभवदुःखेनांधबुद्धेः स्वल्पमम एतच्चित्रमित्यर्थः २६ २७ रामः रामः ॥

मे

उद्दिश्य भार्गवं कृष्ण संबोधयन्ननुज्ञापयति अनुजानीहीति देवलोकेऽपि वर्तमानस्यात्मनो मनसः संनिधिं प्रार्थयते य
क्वापीति यदा अस्य सदा विषयो यस्य तथाभूतं भूयादिति २८ आत्मनमस्यति नम इति सर्वभावाय सर्वस्वभावो जन्म येन त
स्मै ब्रह्मणे शोकहेत्वेप्य विकाराय कुतः अनंतशक्तये अनंता मायाख्या शक्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयो योगेन तु पा
दानत्वमुक्तं श्रीकृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तं कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्र

अनुजानीहि मां कृष्ण यांतं देवगतिं विभो यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदं २८ नमस्ते सर्वभावा
य ब्रह्मणेऽनंतशक्तये कृष्णाय वासुदेवाय योगानां पतये नमः २९ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौ
लिना अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां ३० कृष्णः परिजनं प्राह भगवान्देवकीसुतः ब्रह्मण्य
देवो धर्मात्मा राजन्याननुशिक्षयन् ३१ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि तेजीयसोऽपि किमुत राज्ञामी
श्वरमानिनां ३२ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ३३
हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति कुलं समूलं दहति ब्रह्मस्वारणिपावकः ३४ ब्रह्मस्वं दुरनुज्ञातं
भुक्तं हंति त्रिपूरुषं प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ३५

सत्कृष्ण इत्यभिधीयते तस्मै ते किं च योगानां इष्टापूर्तादिकर्मणां पतये फलदात्रे अयं भावः एवंभूतं त्वां विहाय
गंतुमनिच्छुरपि गमिष्यामि त्वद्दत्तकर्मफलभोगायेति २९ ३१ मनागीषदपि भुंक्ते सद्यो अग्निसदृशतेजीयसः
अतितेजस्विनोऽपि दुर्जरा ३२ किं च विषादपि घोरमित्याह हिनस्तीति संसर्गसंसर्गेणात्मारकत्वादग्निमुत्पातात्स्यात्तदपि
नेत्याह वह्निरिति समूलमिति वह्निर्मूलान्यवशेषयति ब्रह्मस्वलक्षणारणिजः पापपावकः कुलं तदपि समूलमिति ३४

प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ३५

ब्रह्मस्वं दुरनुज्ञातं यथावद्भुक्तं हंति त्रिपूरुषं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा.टी. येब्रह्मस्वमभिमन्यंते वा छ्यंतितेनिरयमेवाभिमन्यंते अतो बालिशा मूढाः आत्मपापंन वक्षत इति ३६ अपिचगृह्णंतीति ३७
५८ गृध्वा अभिकांक्ष्य ४० प्रणमेनमामि ४२ नकेवलमर्थवादविभीषिकेयं किंतु प्रत्यक्षमित्याह ब्राह्मणार्थ ४३ इति दशमे चतुः

राजानो राजलक्ष्म्या चनात्मपातं प्रवक्षते निरयं येऽभिमन्यंते ब्रह्मस्वं साधु बालिशाः ३६ गृह्णंति यावत 172
५२ तःपांशूकंदतामश्रुबिंदवः विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ३७ राजानो राजकुल्याश्च तावतो
ऽब्दान्निरंकुशाः कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ३८ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च
यः षष्टिवर्षसहस्राणि विष्ठायां जायते कृमी ३९ न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नृपाः परा
जिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ४० विप्रं कृतागसमपि नैव द्रुह्यत मामकाः घ्नंतं बहु शपंतं वा
नमस्कुरुत नित्यशः ४१ यथाहं प्रणमे विप्राननुकालं समाहितं तथा नमत यूयं च योऽन्यथा मे स
दंडभाक् ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ४३ ए
वं विश्राव्य भगवान्मुकुंदो द्वारकौकसः पावनः सर्वलोकानां विवेश निजमंदिरं ४४ इति श्रीभाग
वते महापुराणे दशमस्कंधे नृगोपाख्यानो नाम चतुःषष्टितमोऽध्यायः शुक उवाच बलभद्रः कु
रुश्रेष्ठ भगवान्रथमास्थितः सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं १ परिष्वक्तश्चिरोत्कंठैर्गो
पैर्गोपीभिरेव च रामोऽभिवाद्य पितरावाशीर्भिरभिनंदितः २ चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः
इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ३

षष्टितमे पंचषष्टितमे रामस्त्वकेगोकुलमागतः रमयामास गोपीभिः कालिंद्याकर्षणं महत् १ रामस्य चरितं रामः
चित्रं कालिंद्याकर्षणादि यत् पौंड्रकादि कृष्णस्य पश्चादुक्तं मनःपरं २१ आशीर्भिरभिनंदितो बभूव २ तदाह चिरमि ५८

भा.टी. ननु देवकीनंदनस्य कथमेवंभूतत्वं तत्राह नानाभावैरिति सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्या
५९ द्यवतारैर्देवादीन्बिभर्षि पालयसि तत्र लोकसेतून्वर्णाश्रमधर्मान् तद्धर्मतदनुष्ठातृन्साधून्तद्रांत्वेन उन्मार्गान्
दैत्यादीन्हंसि संसि एवमेतद्यदिनवजन्म भूमेर्भारहरणाय लीलावतारो यं न कस्यापि त्वं तनयः इत्यर्थः २७ अतो ज्ञानतश्च

नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि हंस्युन्मार्गान्हिंसया वर्तमानान्जन्मैतत् 173
ते भारहाराय भूमेः तप्तोऽहं ते तेजसा दुःसहेन शांतोग्रेणात्युल्बणेन ज्वरेण तावत्तापो देहिनां तेंघ्रिमू
लं नो सेवेरन्यावदाशानुबद्धाः २८ श्रीभगवानुवाच त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयं
यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयं २९ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः बाणस्तु रथ
मारूढः प्रागाद्योत्स्यन् जनार्दनं ३० ततो बाहुसहस्रेण नानायुधधरोऽसुरः मुमोच परमक्रुद्धो बा
णांश्चक्रायुधे नृप ३१ तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना चिच्छेद भगवान्बाहून् शा
खा इव वनस्पतेः ३२ बाहुषु छिद्यमानेषु बाणस्य भगवान्भवः भक्तानुकंप्युपव्रज्य चक्रायुधमभा
षत ३३

भिर्भवेष्वहं तं मां तप्तं रक्ष मात्रा येन हतमोहमिति तेजसा त्वत्स्वष्टे न ज्वरेण शांतोग्रेण शीतज्वरेण परसंतापकरस्य
युक्त एव तापइति चेत् तः आह तावदिति सेवायां प्रवृत्तानामनुचितइति भावः हे त्रिशिरः व्येतु अपयातु मदीयात्काल
कः सन्स्मर्यवित्वरः काश्चावां त्वां नामाह यो नावितिनौ आवयोरिमं संवादं यः स्मरेत्तस्य त्वत्तो न भयं भवेत् रामः
त्वया भयं नोत्पादनीयमित्यर्थः ३३ ५९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

माहेश्वरः समाक्रंदन् युयुधे २३ २४ आत्मानं परमशक्तिमंतं मन्यमानः शीकसंतापयित्वं प्रवर्तनः स्वयमेव तत्प्रसन्नं
नं परमेश्वरं ज्ञात्वा स्तुवन् नमस्करोति नमामीति त्वां अनंतशक्तिं नमामि कुतः परेषां ब्रह्मादीनामीशं तत्र हेतुः स
र्वात्मानं सर्वस्यात्मानं त्वा अनंतं चितारात् कुतः केवलं शुद्धं ज्ञप्तिमात्रं चेतान्यच्च न तदेव सर्वं चेतयति त्वेन परमेश्वरत्व
मुक्तं किंच विश्वस्य स्थित्यादि हेतुत्वादपीत्याह विश्वोत्पत्तीमि नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह यत्तद् ब्रह्मेति
यत्तद् ब्रह्म तदेव त्वमित्यर्थः किं तद् ब्रह्मेत्यत आह ब्रह्मलिंगं ब्रह्मशब्देन लिंग्यते द्योत्यते इति तत्कुतः प्रशांतं सर्व

माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ माहेश्वरः समाक्रंदन् वैष्णवेन बलार्दितः २३ अलब्ध्वाभय
मन्यत्र भीतो माहेश्वरो ज्वरः शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः २४ ज्वर उवाच नमामि त्वानंतश
क्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रं विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद् ब्रह्म ब्रह्मलिंगं प्रशांतं २५
कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः तत्संघातो बीजरोहप्रवाहस्त्वन्मा
यैषा तन्निषेधं प्रपद्ये २६

विक्रियारहितत्वात् न साक्षात् प्रभवाम इति भावः २५ किंच यावत्सविशेषं वस्तु तत्र वयं प्रभवामः त्वयि तु स
र्वविशेषातीते न कस्यापि प्रभुत्वं किंतु त्वमेव सर्वप्रभुरिति ज्ञप्तिमात्रत्वं विलक्षणत्वमस्तीति कालादीति कालः
क्षोभकः कर्मनिमित्तं तत्र दैवं फलाभिमुखं कर्म अभिव्यंजकं दैवं स्वभावः तत्संस्कारः जीवस्तद्वान् द्रव्यं भूतसूक्ष्म
क्षेत्रं प्रकृतिः प्राणः सूत्रं आत्मा अहंकारः विकार एकादशेंद्रियाणि महाभूतानि चेति षोड
शकः तत्संघातो देहः एतस्य च बीजरोहप्रवाहः रोहो अंकुरः देहो बीजरूपं कर्म ततो अंकुररूपो दे
हः ततः पुनः कर्मेति प्रवाहः एवा त्वन्मायातस्या निषेधं अपोहाय तल्लिंगं त्वां निषेधावधिभूतं प्र

१२ प्रत्यस्त्रैः शमयामाह ब्रह्मास्त्रस्येति नैजं नारायणास्त्रं १३ १४ शिखिना मयूरेणा वाहनेन १५ तयोरनीकानि हतनाथानि येषां ना

आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणं कृष्णशंकरयो राजन् प्रद्युम्नगुहयोरपि ७ कुंभांडकूपकर्णाभ्यां
बलेन सह संयुगः सांबस्य बाणपुत्रेण बाणेन सह सात्यकेः ८ ब्रह्मादयः सुराधीशा मुनयः सिद्धचार
णाः गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ९ शंकरानुचरान् शौरिर्भूतप्रमथगुह्यकान् डाकि
नीर्यातुधानांश्च वेतालान् सविनायकान् १० प्रेतमातृपिशाचांश्च कुष्मांडान् ब्रह्मराक्षसान्
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ११ पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्ङ्गि
णे प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः १२ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतं आ
१३ ग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च १३ मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितं बाणस्य पृ
तनां शौरिर्जघानासिगदेषुभिः १४ स्कंदः प्रद्युम्नबाणौघैरर्द्यमानः समंततः असृग्विमुं
चन् गात्रेभ्यः शिखिनापाक्रमद्रणात् १५ कुंभांडः कूपकर्णश्च पेततुर्मुसलार्दितौ दुद्रुवुस्त
दनीकानि हतनाथानि सर्वतः १६ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षणः कृष्णमभ्यद्रवत्सं
ख्ये रथी हित्वैव सात्यकिं १७ धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै एकैकस्मिन् शरौ द्वौ द्वौ
संदधे रणदुर्मदः १८ तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः सारथिं रथमश्वांश्च हत्वा शं
खमपूरयत् १९ तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया
ततस्तिर्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः बाणश्च तावद्विरथश्छिन्नधन्वाविशत्पुरं विद्राविते भूतग
द्यतनान्यंग शृणुष्व गदतो मम विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये भूमेर्भारायमा

णानामसुराणां क्षयाय च ४० अवतीर्णो यदुकुले गृह आनकदुंदुभेः वदन्ति वासुदेवेति वसु

देवसुतं हि मां ४१ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः अयं च यवनो दग्धो राजंस्ते ति

ग्मचक्षुषा ४२ सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः

४३ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुं ४४

शुक उवाच इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वितः ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्म

रन् ४५ मुचुकुंद उवाच विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् सुखाय

पे नाभजन्ता ना संसार मद्भिः प्रपंचयन्नस्तौति विमोहित इति हे ईश योषित पुरुषश्च इति द्विविधो राम ७

प्ययं जनः त्वदीयया मायया विमोहितः अतो ऽनर्थदृक् अर्थं परमार्थं सुखरूपं त्वां न पश्यति तथा अतः स्वेन भ

जति परस्परं जीवितः सन दुःखानामेव प्रभवा ये गृहेषु गृह इष्वेव सज्जन इति ४६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेजः मूर्तिः प्रभावोदीप्तिर्वा २९ सर्वज्ञापरितोषादाहमन्यइति पुरुषर्षभंश्रीविष्णुंगुहाध्वांतंस्वंतमः ३०।३१

किंस्वित्तेजस्विनांतेजोभगवान्‌वाविभावसु सूर्यःसोमोमहेंद्रोवालोकपालोऽपरोपिवा २९
मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभ यद्बाधसेगुहाध्वांतंप्रदीपःप्रभयायथा ३० 248
शुश्रूषतामव्यलीकमस्माकंनरपुंगव स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ३१ वयंतुपुरु
षव्याघ्रऐक्ष्वाकाःक्षत्रबंधवः मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो ३२ चिरप्रजागरश्रांतो
निद्रयापहतेंद्रियः शयेस्मिन्विजनेकामंकेनाप्युत्थापितोऽधुना ३३ सोपिभस्मीकृतोनून
मात्मीयेनैवपाप्मना अनंतरंभवान्‌श्रीमाल्लक्षितोऽमित्रशातन ३४ तेजसातेविषह्येण
भूरिद्रष्टुंनशक्नुमः हतौजसोमहाभागमाननीयोसिदेहिनां ३५ एवंसंभाषितोराज्ञाभ
गवान्भूतभावनः प्रत्याहप्रहसन्वाण्यामेघनादगभीरया ३६ श्रीभगवानुवाच जन्म
कर्माभिधानानिसंतिमेऽगसहस्रशः नशक्यंतेनुसंख्यातुमनंतत्वान्मयापिहि ३७ क्वचि
द्रजांसिविममेपार्थिवान्युरुजन्मभिः गुणकर्माभिधानानिनमेजन्मानिकर्हिचित्‌ ३८
वयंत्विति वंशख्यातिप्रायत्यावहुवचनं नेयहंमुचुकुंदइतिप्रोक्तइतियुवनाश्वोमांधातुःपिताअतोःमांधा
[illegible] नया

[illegible]

भा·द·उ·
६
मन्प्रजाकोऽन्यकालयेदितिनिवेदितमाह कालइति कालयतेइतस्ततश्चालयति १९ तस्यकेवलस्य २०
गुहायांप्रविष्टःशयानेस्म २१।२२।२३।२४।२५।२६ धर्षितानाभिभूताऽदुर्धर्षप्रधृष्ट २७ विपिनेऽरण्ये पत

कालोबलीयान्बलिनांभगवानीश्वरोव्ययः प्रजाःकालयतेक्रीडन्पशुपालोयथापशून्‌ १९ ब
ह्वच्छशाविभङ्गतेकृतेकेवलपभधनः एकएवेश्वरस्तस्यभगवान्विभुरव्ययः २० एवमुक्तेसवैदे
वानभिवंद्यमहायशाः अशायिष्टगुहाविष्टोनिद्रयादेवदत्तया २१ स्वापयंतंयमुत्सुमध्येबोधये
त्वामचेतनः सत्वयादृष्टमात्रस्तुभस्मीभवतुतत्क्षणात्‌ २२ यवनेभस्मसान्नीतेभगवान्सात्वत
र्षभः आत्मानंदर्शयामासमुचुकुंदायधीमते २३ तमालोक्यघनश्यामंपीतकौशेयवाससं श्रीव
त्सवक्षसंभ्राजत्कौस्तुभेनविराजितं २४ चतुर्भुजंरोचमानंवैजयंत्याचमालया चारुप्रसन्नवदनं 249
स्फुरन्मकरकुंडलं २५ प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणं अपीव्यवयसंमत्तमृगेंद्रोदारवि
क्रमं २६ पर्यपृच्छन्महाबुद्धिःतेजसातस्यधर्षितः शंकितःशनकैराजादुर्धर्षमिवतेजसा २७ मुचुकुं
दउवाच कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके २८ ॥
विपिनेऽरण्येतत्रापिगिरेर्गह्वरेदुःप्रवेशस्थानेतत्रापि उरुकंटकेपद्मपलाशसदृशाभ्यांपद्भ्यांविचरसीति २८ रामः
६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

को नाम स पुमान् ब्रह्मन् कस्य किंवीर्य एव च कस्माद्गुहां गतः शिष्ये किंतेजो यवनार्दन २३ श्रीशुक उवाच ५

गा३

९ तं शयानमच्युतं मत्वाताडयदिति १० ११ तस्य रुष्टस्य दृष्टिपातेन संदीप्तोयः स्वदेहजो तेन १२ यवनमर्दयति हिनस्तीति तथा सकस्य वंश्यः किंवीर्यः कीदृक्स भगवान् किंतेजः कस्य वीर्यं पुत्र दृष्टे च शिष्ये शयित १३ स मा

एवं क्षिप्तोऽपि भगवान् प्राविशद्गिरिकंदरं सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं १९ नन्वसौ

ते दूरमानीय शेते मामिह साधुवत् इति मत्वाच्युतं मूढस्तं पदा समताडयत् २० स उत्थाय 250

चिरं सुप्तः शनैरुन्मील्य लोचने दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितं २१ स तावत्त-

स्य रुष्टस्य दृष्टिपातेन भारत देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् २२ श्री

राजोवाच स इक्ष्वाकुकुले जातो मांधातृतनयो महान् मुचुकुंद इति ख्यातो ब्रह्मण्यः ५१

सत्यसंगरः २४ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे असुरेभ्यः परित्रस्तैस्तद्रक्षां सो-

ऽकरोच्चिरं २५ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् राजन् विरमतां कृच्छ्राद्भवान्नः

परिपालनात् २६ नरलोके परित्यज्य राज्यं निहतकंटकं अस्मान् पालयतो वीर कामास्ते

सर्व उज्झिताः २७ सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः प्रजाश्च तुल्यकालीया नाधु-

ना संति कालिताः २८

सगरो युद्धप्रतिज्ञा यस्य सः २४ २५ गुहं कार्त्तिकेयं स्वःपालं स्वर्गपालके सेनान्यं २६ उज्झितास्त्यक्ता गताः इत्यर्थः २७ किंच सुता इति तुल्यकालीयाः समानकालीनाः कालिताः विचालिताः २८

भा०द०उ० ५

राकपंचाध्याततमे ऽहं मुचुकुंददृष्ट्या हरिः यवनं मुचुकुंदेन कृतः समन्वकंपतः १ यवनेंद्रस्तात्कालयवना-

द्युद्धमिषणात् हरिर्गिरेः तेरंपालनाय पलायनाय ध्यागाग्र्यः यथा तेन ऽद्रुत्त कस्तदा पादवे रूपह-

सिता कुंडो सो श्रीमहेंद्रप्रशाध्ययदुभीमसापुत्र वर कांतकुजितं हानं तदुच्छ्रतं २ नित्यप्रमुदितमिति

श्रीशुक उवाच तं विलोक्य विनिःक्रांतमुज्जिहानमिवोडुपं दर्शनीयतमं श्यामं पीतकौशे-

यवाससं १ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं पृथुदीर्घचतुर्बाहुं नवकंजारुणे-

क्षणं २ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं मुखारविंदं बिभ्राणं स्फुरन्मकरकुंडलं

३ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुं-

दरः ४ लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति निरायुधश्चलन् पद्भ्यां योत्स्येऽने-

न निरायुधः ५ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखं अन्वधावज्जिघृक्षुस्तं दुरापम-

पि योगिनां ६ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे नीतो दर्शयता दूरं यवनेशोऽद्रिकं-

दरं ७ पलायनं यदुकुले जातस्य तव नोचितं इति क्षिपन्ननुगतो नैनं प्राप हताशुभः

मुखारविंदं बिभ्राणं ३ ४ नारदोक्तैर्लक्षणैरयं प्रमाण्यो वासुदेव एव नान्यो भवितुमर्हति अप्र-

यं च निरायुधः अतो नैनं पद्भ्यामेव चलन्निरायुधोऽहं योत्स्यामि ५ इति निश्चित्य तं पराङ्मुखं प्राद्रवंतम-

न्वधावदित्यन्वयः आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ७ अहताशुभः क्षीणकर्मा ८ श्री

राम ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंचनगरगृहादौ वास्तोष्पतीनां देवानां देवगृहैः वलभिश्च दृष्टालिका भिश्च निर्मितं यदु देवगृहे यान्निराजग
हैः तत्सघाभूमान ५४ पारिजातं च श्री हरिणोत्पुत्स्थापयामास इति सुकुपुरी स्थितं वादानुस्वभावित्वाद् इति देवाः म
नेधर्मः षडुर्मि पासादिभिः षडूर्मिभिः ५५ निधिपतिः कुवेरः अष्टौ का पान्निधीन् पद्मश्च वमहापद्मा मत्स्य कूर्मा
हि

वास्तोष्पतीनां च गृहैर् वलभीभिश्च निर्मितं चातुर्वर्ण्यजनाकीर्णं यदु देवगृहोल्लसत् ५४
सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते ५५ श्या
मैककर्णान्वरुणो हयान्शुक्लान्मनोजवान् अष्टौ निधिपतिः कोशान्लोकपालो निजो
दयान् ५६ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते
नृप ५७ तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः प्रजापालेन रामेण कृष्णः समनुमंत्रि
तः निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ५८ इति श्रीभागवते महापुराणे दश
मस्कंधे दुर्गप्रवेशनं नाम पंचाशत्तमोऽध्यायः

नृपैकः नीलोमुकुंदः पंचस्वश्च निध्यायो षष्ठे प्रकीर्तिताः इति प्रसिद्धान् निजोदयान् निजविभूती ५६ य
च्च वसिद्धादयो भगवता स्वाधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति ५७
यथाकालयवनेन न वेत्ति नचसोननः तथा योगप्रभावेन नीत्वा तमन्त्र स्थित्वप्रजाः पालय अहंप
जे इति समनुमंत्रितः ... इति दशमे पंचाशत्तम ५०

भा०द०उ
४

हरिजिनं दुःखंडमयतः यवनजरासंधाभ्यां ४६ तदाह द्वयेनानिरुंधे निरुणद्धि ४७ अस्यमनेन ४८ ४९ समुद्रमध्ये दुर्गमत
न्मध्ये नगरं कृत्स्नाद्भुतं सर्वाश्चर्यमयं अचीकरत्कारयामास ५० त्वष्टा विश्वकर्मा तदीयं शिल्पनैपुण्यं चक्रियादौ
शालं तदाहसाद्वेद्वाभिः रथ्यानिः रथ्याराजमार्गपुरतः वाथ्याउपमार्गाः पश्चिमतः उभयतोपि चत्वराणि प्रांगणानि

तं दृष्ट्वा चिंतयत्कृष्णः संकर्षणसहायवान् अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ४६ यवनो
ऽयं निरुंधेऽस्मानद्य तावन्महाबलः मागधोऽप्यद्य वा श्वो वा परश्वो वागमिष्यति ४७ आ
वयोर्युध्यतोरस्य यद्यागंता जरासुतः बंधून्वधिष्यत्यथ वा नेष्यते स्वपुरं वली ४८ तस्माद
द्य विधास्यामो दुर्गं द्विपददुर्गमं तत्र ज्ञातीन्समाधाय यवनं घातयामहे ४९ इति संमंत्र्य भ
गवान् दुर्गं द्वादशयोजनं अंतःसमुद्रे नगरं कृत्स्नाद्भुतमचीकरत् ५० दृश्यते यत्र हि
त्वाष्ट्रं विज्ञानं शिल्पनैपुणं रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितं ५१ सुरद्रुमलतो
द्यानविचित्रोपवनान्वितं हेमशृंगैर्दिविस्पृग्भिः स्फटिकाट्टालगोपुरैः ५२ राजतारकु
टैः कोष्ठैः हेमकुंभैरलंकृतैः रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थलैः ५३

तन्मध्ये कोष्ठाः ततोप्यंतः स्ववर्णभवनानि तदुपरि स्फटिकाट्टालिकाः तदुपरि हेमकुंभाः इव वहुभूमिकं
तथा वास्तु गृहादि निर्माणं उद्यानं नंदनतिकृष्य निर्मितं ५१ सुराणां द्रुमलताश्च येषु तान्युद्यानानि विचि
त्रोपवनानि च तैरन्वितं हेममयानि शृंगाणि येषां तैः दिविस्पृग्भिः रत्नैः स्फाटिका अट्टालोऽपरि ततभूमिकाः गोपु
राणि पुरद्वाराणि तैः निर्मितं निःसरेणान्वयः ५२ तत्राकुटै रजतैश्च अगारकुटं च पीतहोलंतां आर्थानिर्मितैः कोष्ठैः अग्रशालान्

राम: ४

प्रत्युद्यतैर्मथुरावासिभिर्जनैरुपसंगम्याभिलिखिता ३७ वदापुरोपुरं प्रविशन्निशंखवाद्यनिनेदुः ३८ कथं भवती
पुरस्तदा इति कुमारगामिनिति ... घोषेणानिर्दुर्निनादितां कौतुकेनोत्सवेन ... सर्वेनोव ...
तोरणानि पश्यतां ३९ निवीयमानः विकीर्णः मार्गः प्रविवेशेति विपरिणामानुषंगः ४० आयोधनं रणभूमिः

माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः उपगीयमानविजयः सूतमागधवन्दिभिः ३७ शं
खदुंदुभयो नेदुर्भेरीघोषपटस्वनाः वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ ३८ सिक्तमार्गा
हृष्टजना पताकाभिरलंकृता निर्घुष्टं ब्रह्मघोषेण कौतुकाबद्धतोरणा ३९ निचीयमा
नो नारीभिर्माल्यदध्यक्षतांकुरैः निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ४० आयो
धनगतं वित्तमनन्तं वीरभूषितं यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः ४१ एवं सप्तदशा
कृत्वस्तावत्यक्षौहिणीबलः युयुधे मागधो राजा यदुभिः कृष्णपालितैः ४२ अक्षिण्वं
स्तद्बलं सर्वं वृष्णयः कृष्णतेजसा हतेषु स्वेष्वनीकेषु त्यक्तोगादरिभिर्नृपः ४३ अष्टादशमसं
ग्रामे आगामिनि तदन्तरा नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ४४ रुरोध मथुरामेत्य तिसृ
भिर्म्लेच्छकोटिभिः नृलोके चाप्रतिद्वन्द्वो वृष्णीन्श्रुत्वात्मसम्मितान् ४५

... वित्तं वीराणां भूषणं ४१ तावति इति छेदः तावति पराजयेवर्तमानेपि अक्षौहिणी बलं यस्य स त
... ४२ ... ४३ अष्टादशमे ... सम्मितान् ४५

भा० द० उ० ३ तद्बलं स्वयं प्रणीतं ... गंभीरं ... यतः दुरंतपारं ... अतलं पार ... निषेधे ...
... निरवधि ... किंच ... लि तत्वतः लयदेवं ... कर्मोक्त ...
विक्रीडितं ननु पराक्रमः २८ ... हस्ति ... सदृ वां तमिति ...
नि ... अनुकरोति निमग्नानुविधत्ते ... किं ... यस्य ...

स्थिर २ वलं तदंगार्णवदुर्गभैरवं दुरंतपारं मगधेन्द्रपालितं क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्ज
गदीशयोः परं २९ स्थित्युद्भवांतं भुवनत्रयस्य यः समीहितेऽनन्तगुणः स्वलीलया न तस्य
चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ३० जग्राह विरथं रामो जरासंधं म
हाबलं हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ३१ बध्यमानं हतारातिं पाशैर्वारु
णमानुषैः वारयामास गोविन्दस्तेन कार्यचिकीर्षया ३२ स मुक्तो लोकनाथाभ्यां व्रीडितो
वीरसंमतः तपसे कृतसंकल्पो वारितः पथि राजभिः ३३ वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतै
रपि स्वकर्मबंधप्राप्तोयं यदुभिस्ते पराभवः ३४ हतेषु सर्वानीकेषु नृपे बार्हद्रथे ... उपेक्षि
तो भगवता मगधान्दुर्मना ययौ ३५ मुकुंदोप्यक्षतबलो निस्तीर्णारिबलार्णवः विकीर्य
माणः कुसुमैस्त्रिदशैरनुमोदितः ३६

धं वधमानं वारयामासेति ३१ ३२ ३३ पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैः वाक्यैः नयनैः नीति
भिः प्राकृतैर्लौकिकैः तत्र लौकिकन्यायमाह स्वकर्मेति द्विभिः ... कृत्वा तेमहतः पराभवः केवलं कर्मबंधेन प्राप्तः
... अनस्ययानलज्जितव्यमिति ३४ बार्हद्रथो जरासंधः ३५ मुकुंदोपि ... बलं यस्य सः तं सेवामृत ...

[illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰ पौरादिभिरः सघतः अभिमुखमागत्य सत्कृतः ५२५३ इतिपञ्चमेत्रिपञ्चाशत्तमः वसुदेवहितमेकं प्रान्तगंपादाद्मनोवपन्
५६ वृक्षस्वरूहारिद्याघोत्याराज्ञोदग्नानशिक्षयत् १ विभूतिभाग्यभोगादिमदोन्नद्धमनोरथान् अन्वशासदधृत्तक्रमाते

सराजधानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वरां विवेशशंखानकदुंदुभिः स्वनैः रभ्युद्यतः
स्यवि॰ पौरसुहृद्द्विजातिभिः ... यशःकरराजसंयुगं संस्मरेत्प्रातरुत्थाय ... स्यात्पराजयः
५३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेरुक्मिनिरुद्धनयनंनामत्रिपञ्चाशत्तमोऽध्यायः श्रीशुकउवाच
एकदोपवनंराजन्जग्मुर्यदुकुमारकाः विहर्तुंसांबप्रद्युम्नचारुभानुगदादयः १ क्रीडित्वासुचि
रंतत्रविचिन्वंतःपिपासिता जलंनिरुदकेकूपेददृशुः सत्वमद्भुतं २ कृकलासंगिरिनिभंवीक्ष्यविस्मि
ताःकृतुस्तस्योद्धर्तुंकृपयादन्ततुकाः ४ नेमागणार्हविदाश्रुतोभगवान्विश्वभावनः वीक्ष्यजहा
रवामेनतंकेरणसलीलया ५ सउत्तमश्लोककराभिमृष्टोविहायसद्यः कृकलासरूपं संतप्त
चामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक् ६ पप्रच्छविद्वानपितन्निदानंजनेषुविख्यापयि
तुंमुकुंदः कस्त्वंमहाभागवरेण्यरूपोदेवोत्तमंत्वांगणयामिनूनं ७ दशामिमांवाकतमेनकर्म
णासंप्रापितोस्यतदर्हसुभद्र आत्मानमाख्याहिविविस्तनांनोयन्मन्यसेनःक्षममत्रवक्तुं ८ श्रीशु
कउवाच इतिस्मराजासंपृष्टःकृष्णेनानंतमूर्तिना माधवंप्रणिपत्याहकिरीटेनार्कवर्चसा ९

गोचारप्रसंगतः २ पिपासिताः जलंविचिन्वंतःसत्वंतःसत्वंजीवं २ तंचकृकलासंवीक्ष्य ३ चर्मभिःचर्ममयैः पाशैः समः
तांतवैःतंतुमयैश्च ५ संतप्तंचामीकरंसुवर्णंतद्वद्वर्णोयस्यसः अद्भुतानिअलंकारांबरस्रजोयस्यसःस्वर्गीदेवोवभूवेति ६ ५६
यतःपदिक्षमंयोग्य ८ ९

257

भा.द. ५८

२५ नानाविधेषु नुनयेषु कोविदः २६ मधुवैत्रंमाधवं श्रीरामं गोपीनां रतिमिति स्त्रीक्रीडासमये ऽनुत्पन्नानाम निवाला
नां वान्यासमित्यभियुक्तप्रसिद्धः २७ पूर्णाचंद्रस्य कलाभिर्मरीचिभिरामृष्टं उज्ज्वलं कौमुदीगंधवाहं लीनां गंधवातेन
सेविते यद्वा कौमुदीशब्देन चंद्रिका सितानि कुमुदानि लक्ष्यंते कुमुदगंधवाने इत्यर्थः २८ वारुणी सुधया सहोत्थः

इति प्रहसतं शौरे जल्पितं चारुवीक्षितं गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः २५ संकर्षणस्ताः
कृष्णस्य संदेशैर्हृदयंगमैः सांत्वयामास भगवान्नानानुनयकोविदः २६ द्वौ मासौ तत्र चावात्सीन्म
धुं माधवमेव च रामः क्षपासु भगवान्गोपीनां रतिमावहन् २७ पूर्णचंद्रकलामृष्टे कौमुदीगंध
वायुना यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः २८ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात् पतं
ती तद्वनं सर्वं स्वगंधेनाध्यवासयत् २९ तं गंधं मधुधाराया वायुनोपहृतं बलः आघ्रायोपगतस्तत्र
ललनाभिः पपौ समं ३० उपगीयमानो गंधर्वैर्वनिताशोभिमंडले रेमे करेणुयूथेशो माहेंद्र इव वारणः
नः ३१ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया बिभ्रत्स्मितमुखांभोजं स्वेदप्रालेयभूषितं ३२ स आजुहा
व यमुनां जलक्रीडार्थमीश्वरः निजं वाक्यमनादृत्य मत्त इत्यापगां बलः अनागतां हलाग्रेण कुपितो विच
कर्ष ह ३३ पापे त्वं मामवज्ञाय यन्नायासि मयाहुता नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीं ३४ एवं
निर्भर्त्सिता भीता यमुना यदुनंदनं उवाच चकिता वाचं पतिता पादयोर्नृप ३५ राम राम महाबाहो न जाने तव
विक्रमं यस्यैकांशेन विधृता जगती जगतः पते ३६

नाम स्त्रिया २९ ३० क्षीबा मत्तः ३१ स्वेद एव प्रालेयं हिमं तेन भूषितं ३२ मत्तो ऽयमित्यनागतां आपगां नदीं
२३ आहूताऽऽहूता यदस्मान्नागच्छसि तस्मात्त्वां नेष्ये गमिष्यामि ३४ चकिता कंपिता ३५ एकांशेन शेषाख्ये
न ३६ रामः ५८

स्वामेव भक्त्या आह अहमिति ४१ भगवतो भजनीयत्वे हेतुं च दर्शयन् ...
त्वमाह सुहृदात्मदैवं सुहृत् हितप्रवर्तकत्वात् आत्मा च सर्वान्तर्यामित्वात् एवंभूतं दैवं ईश्वरं त्वां न वान्यो भजनीयोऽस्तीत्य

यस्त्वा विसृज्य मर्त्य आत्मानं प्रियमीश्वरं विपर्ययेंद्रियार्थार्थं विषमत्यमृतं त्यजन् ४२ अहं ब्रह्मा
ऽथ विबुधा मुनयश्चामलाशयाः सर्वात्मनाप्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरं ४३ तं त्वा जगत्स्थित्युदयांतहेतुं
समं प्रशांतं सुहृदात्मदैवं अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवं ४४ अयं ममेष्टो दयितो
ऽनुवर्ती मयाऽभयं दत्तममुष्य देव संपाद्यतां तद्भवतः प्रसादो यो हि ते दैत्यपतौ प्रसादः ४५ श्रीभगवा
नुवाच यदात्थ भगवंस्त्वं नः करवाम प्रियं तव भवता यद्व्यवसितं तन्मे साध्वनुमोदितं ४६ अवध्योऽयं
ममाप्येष वैरोचनसुतोऽसुरः प्रह्लादस्य वरो दत्तो न वध्यो मे तवान्वयः ४७ दर्पोपशमनायास्य प्रवृ
क्णा बाहवो मया सूदितं च बलं भूरि यच्च भारायितं भुवः ४८ चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामरः
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ४९ इति लब्ध्वाऽभयं कृष्णं प्रणम्य शिरसासुरः प्राद्युम्निं
रथमारोप्य सवध्वा समुपानयत् ५० अक्षौहिण्या परिवृतं सुवासःसमलंकृतं सपत्नीकं पुरस्कृत्य
ययौ रुद्रानुमोदितः ५१

ह अनन्यमेकं समानाधिकरहितं तत्कुतः जगतामात्मानं च केतं आश्रयं अधिष्ठानं ४४ स्वयं भक्तिमहात्म्यस्य भक्तस्याभि
वनाशास्तेऽयमिति दैत्यपतौ प्रह्लादे ४५ ४६ वैरोचनो बलिर्मंद्रके सत्सु तावत् किं च प्रह्लादाय ते अन्वयो वंश्या ४७
तर्हि किमिति एवं कृतं तत्राह दर्पोपशमनायेति ४८ अनुगृह्णाति चत्वार इति ४९ सवध्वा सह उषया ५० रुद्रानुमोदितः
इति तदभिप्रेतस्य बाणानुजंस्य कृतत्वात् ५१

स्तौ

भा.द.पू. १२७

नतु सुहृदादि परिष्वंग संप्रसाद्ययो जीवधर्माः कथमीश्वरे संगच्छंते अत आह नतस्येति दयितः प्रियः सुहृ
त्तमो हितः नतद्विपरीतो अप्रियः तद्विपरीतो द्वेष्यः एतत्सर्वं व्यतिरिक्त उपेक्षित दयितादयो न संति सत्यं तथो
भक्ताभजते तत्र च यथा ये भक्तास्तथा भजते ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भगवद्वचनात् अ

न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा तथापि भक्तान्भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः २२ किं वाग्रजो माव नतं यदूत्तमः स्वयं परिष्वज्य गृहीतम
ञ्जलौ गृहं प्रवेश्याप्तसमस्तसत्क्रियं संप्रक्ष्यते कंसकृतं स्वबंधुषु २३ श्रीशुक उवाच इति संचि

द जु

तयन् कृष्णं श्वफल्कतनयोऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २४ पदानि तस्या
खिललोकपालकिरीटजुष्टामलपादरेणोः ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जय
वांकुशाद्यैः २५

261

विषमत्वेपि भक्तेभ्य एवं फलं ददात्यत्र दृष्टांतः यद्वत्सुरद्रुमेति २२ किंवेति यो मयांजलिः करि
ष्यते तस्मिन्नेव गृहीतं मां आप्तानि समस्तानि मधुपर्कादि सत्कारादीनि येन तं मा २३ स तु मार्गमपि न वे
द तथापि रथेन प्राप्त इति २४ अखिलैर्लोकपालैः किरीटैर्जुष्टा अमला पादरेणवो यस्य तस्य क्षितिकौतुकानि

राम: १२७

गोपवृद्धांश्च विधिवद्यविष्ठैरभिवंदितः यथावयो यथासख्यं यथासंबंधमात्मनः ४ समुपेत्या
सनगोपालान् हास्यहस्तग्रहादिभिः विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ५ कच्चिद्भ्यामनामयं
स्वसुप्रेमगद्गदया गिरा कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ६ कच्चिन्नो बांधवा राम सर्वे
कुशलमासते कच्चित्स्मरत नो राम यूयं दारसुतान्विताः ७ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सु
हृज्जनाः निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः गोप्यो हसंत्यः पप्रच्छू रामसंदर्शनादृताः क
च्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ९ कच्चित्स्मरति वा बंधून् पितरं मातरं च सः अप्यसौ मातरं
स्वाकं मनुसत्कामहाभुजः १० मातरं पितरं भ्रातॄन् पतीन्पुत्रान्स्वसॄनपि यदर्थे जहिम दाशार्ह दुस्त्यजा
न्स्वजनान्प्रभो ११ ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषि
तं १२ कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः गृह्णन्ति वै चित्रकथस्य सुंदरः
स्मितावलोकेच्छसितस्मरातुराः १३ किं नस्तत्कथया गोप्यः कथाः कथयतापराः यात्यस्माभिर्विना कालो
यदि तस्य तथैव नः १४

260

सः किमिति कृतस्तत्राहुः कथं न्विति वल्कुबहुत्वात् नानाविधानि वाक्यानि १२ तत्रान्याऽऽहुः कथं नु गृह्णंतीति अन्या
ऽऽहुः गृह्णंति वा इति चित्रकथस्य चित्रकथानकोपि वस्या किं वसु दुरस्मितं यस्मिन्स्तेनावलोकनेन उच्छ्वसितः क्षुभितो यः
स्मरः तेनानुरागः १३ अपराऽऽहुः किमिति कालस्तावत्स्यस्य वास्माकं च यात्ये वा किं तु नेस्यासुखेनास्माकं तु दुःखेनेत्येतावानेव

स्वेनेति धर्मसेतूनां पालयिता अमरवर्याणां सुखकर्त्ता १३ त्रैलोक्येति कांतेनेत्रवतां महोत्सवं श्रायाः ईप्सितास्पदं रूपं धानं तमीप्सुरदूत्या
मीति उवसः सुदर्शनाः प्रभातसमयाः सुदर्शनाः सज्जन्यः शुभसूचिका बभूवुरित्यर्थः १४ अथेति दर्शनानंतरं सपदि तत्क्षणमेव रथाद्
वतीर्णः सन्प्रधानपुरुषयो रामकृष्णयोः धुराणां योगिभिरप्यात्मलाभाय केवलं धियैव धृतं नमस्यामि आभ्यां सह अनयोः सखीन्

सचावतीर्णः किल सात्वतान्वयेसु सेतुपालामरवर्यशर्मकृत यशो वितन्वन्नु जन्यास्तु धुरोगायंति दे
वायदेशे च मंगलं १३ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं रूपं दधानं श्रियईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः १४ अथावरूढः सपदीशयोरथात्प्रधानपुंसोश्चरणं स्व
लब्धये धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन्वनौकसः १५ अप्यंघ्रिमूले पतितस्य
मे विभुः शिरस्यधास्यन्निजहस्तपंकजं दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृ
णां १६ समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेंद्रतां यद्वा विहारे व्रजयोषितां श्रमं स्प
र्शेन सौगंधिकगंध्यपानुदत् १७

गोपांश्च नमस्यामीति १५ अपीति अधास्यद् धास्यतीति हि भावयति दत्ताभयमिति सार्द्धेन १६ बलिना पदत्रयपरिमितभूदानसमये त
स्य हस्ते उदकं निहितं कौशिकः इंद्रेणापि कदाचिन्निचयं विहितमिति ज्ञातव्यं मुमुक्षूणां संसारभयनिवर्त्तकं सकामानामभ्युदयप्र
दं चेत्युक्तं अनुरक्तानां परमसुखदं चेत्याह यद्वा विहारे रासक्रीडायां सौगंधिकस्य गंध इव गंधो यस्य तत् सौगंधिकगं
धि ॥ १७ ॥ श्री गोपालो जयतितराम् ॥ श्रीरामः पातु ॥ श्रीकृष्णः सर्वापद्धरो भवतुतराम् ॥ श्रीराधापद श्रीराम
११६

एवं परमानुग्रहं संभाव्य पुनरप्यसंभवमाशंक्य परिहरति यद्यप्यहं कंसेन प्रहितस्तस्य दूतस्तथापि मामयं
मितिबुद्धिं न उपेष्यतीत्यर्थः यतो विश्वदृक् सर्वज्ञः अतो मम चेतसां बहिश्च अंतश्च यदीहितं चेष्टितं एतदपि वे ११४
त्ति अंतर्यामी नित्यज्ञानेनेक्ष्यते अयंभावः चेतसो बहिर्वर्त्ति सममनुवर्त्तते अंतस्तु तत्स्वमेव तदेतत् सोहृदि
स्थोपि जानातीति १८ अप्यंघ्रीति यदि अंघ्रिमूले चरणोपांते अवहितं संयतं कृपामृतेनार्द्रया दृशा मां दृष्ट्वा

न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोपि विश्वदृक् योंतर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा १८ अप्यंघ्रिमूलेवहितं कृतांजलिं मामीक्षितासस्मितमार्द्रया धिया सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंक ऊर्जितां १९ सुहृत्त
मं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेथ मां आत्मा हि तीर्थीक्रियते तदैव मे बंधश्च
कर्मात्मक उच्छ्वसित्यतः २० लब्ध्वांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेक्रूर ताततेत्युरुश्रवाः
तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् २१ ॥

सखिलकल्मषः परां मुदं वोढा प्राप्स्यामीति १९ अथ मां परिरप्स्यते आलिंगयिष्यति तदा तदैव अस्य मे देहः तीर्थीकृ
तः पवित्रीकरिष्यति आश्लेषादालिंगनात्कर्मात्मकः कर्मबंधश्च उच्छ्वसिति श्लथो भविष्यति अतो ९ ताडयतिरहितदेवनिरस्त
हीतः २० ततो नोतातेति वक्ष्यते तदा सफलजन्मानः अन्यथा तज्जन्मैव नभवतीत्याह महीयसा श्रीकृष्णेन यो

भा॰ द॰ पू॰
२२५

अतोऽनया प्रशस्त्या एवममाद्यं मंगलं न हं ध्रुवमेवेति ज्ञायते भवो जन्म सफलं जातमिति यद्यतो नमस्करिष्यामीति ६ अंभो
लनाशेस्तूचकांतरमाह कंसेति वतेति आश्चर्येति खलः कंसोपि ममात्यंतमनुग्रहमकृत कृतवान् यतो मुनाप्रहितो
हरेरङ्घ्रिपद्मं द्रक्ष्यामीति पूर्वं प्रवरीषाद्यस्तमःसंसारं अतरन् तीर्णाः ७ । अङ्घ्रिपद्मं विभावयति वस्त्रादिभिरर्चि
तमिति परमैश्वर्यमाह श्रियाचेति सौभाग्यातिशयं मुनिभिर्भक्तसहितैरिति परमपुरुषार्थत्वं गोचरं रणायेति कृपाल

ममाद्य मंगलं नष्टं फलवाञ्चापि मे भवः यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजं ६ कंसो बताद्यास्कृत
मेत्यनुग्रहं द्रक्ष्ये ऽङ्घ्रिपद्मं प्रहितोमुना हरेः कृतावतारस्य दुरत्ययं तमः पूर्वेतरन्यन्नखमंडलत्विषा ७
ग्रा यदर्चितं ब्रह्मभवादिभिःसुरैः श्रिया च देव्या मुनिभिः ससात्वतैः गोचारणायानुचरैश्चरद्वने यद्गोपिकानां
कुचकुंकुमांकितं ८ द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं मुखं मुकुंदस्य गु
डालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ९ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावतारायभुवो निजेच्छया
लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः १० ॥

तं ८ मनोरथं करोति द्रक्ष्यामीति शोभमानौ कपोलौ नासिका च यस्मिंस्तत्स्मितसहितः अवलोको यस्मिन्न रुणकंजवल्लोचने यस्मिन्
गुडालकावृतं च कोपाहं तदानीमेव शुभसूचकं दृष्टांतिह प्रत्याह पुरदक्षिणमिति ९ पुनरध्यवसेयति अप्यद्येति ईयुषः प्राप्तवतः ला
वण्यधाम्नः अयत्तस्य विष्णोः यद्वा विष्णोर्लावण्यं युक्तं येद्य वपुस्तस्यापि मे दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मह्यं मम दृशो
रामः २२५

यद्दृशिते त्वादि चतुर्भिः कुलकं तत्रैव शंका न चास्मदादिकं नीवक्तव्यादिचमेत्त कृतप्रणीय मानस्य
कर्थविष्णुत्वमिति आशंक्य ज्ञाकत्रयेणा याकुर्वन्न चतुर्थेन महे द्रक्ष्यामीति मनोरथं कुर्वन्न्याह ईक्ष
तेत्यादि ईक्षणमात्रकर्तासत्सतोः कार्यकारणयोः ईक्षणमात्रेण कर्तापि अहं रहितः अहंकारहीनः
आपाद्रितमोभिदाभ्रमः तमः स्वाज्ञानं ततो भिदा भेदः ततो भ्रमः अभिनिवेशादि अपास्ताऽपाकृता
स्तमादयो यस्मिन्सः कुतएव तत्राह स्वतेजसा चित्स्वरूपसाक्षात्कारेण स्वमायया स्वाधी

यद्दृशितानहं रहितो यासत्सतोः स्वतेजसापास्ततमो भिदाभ्रमः स्वमायया त्मन् रचितैस्त
मायया ईक्षया प्राणाक्षधीभिः सदनेष्वभीयते ११ यस्याखिलामीवहभिः सुमंगलैर्वाचो विमि
श्रा गुणाजन्मकर्मभिः प्राणंति शुंभंति पुनंति वै जगत्या स्तद्विरक्ताःशवशोभनामताः १२

नमायया तदीक्षया प्राणाक्षधीभिः सह वै आत्मन आत्मनि स्वस्मिन्नेव रचितैर्जीवैः सदनेषु देहावने
जोपीव देहेषु लीलया कर्माणि कुर्वन्न शक्त इव अभियतेऽभिमुखेन प्रतीयते ११ ननु सर्वथाहंकारादि र
हितस्य लीलादिः कुतइत्याशंक्य परानुग्रहार्थत्वात्संयेनाह यस्येति सुमंगलैः गुणाः करुणादयो
जन्मानि कर्माणि तैर्विमिश्रा युक्ता वाचः जगत्प्राणंति जीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति १२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ १९८

१ मन्यस्य

ननु त्रिकालज्ञस्त्वं कथं मत्प्रपंचं न जानासि वेत्तत्कथं मद्गुरुग्रवाहं ब्रवीषि नत्राह त्वामिति ईश्वरं वशयितारं स्वाश्रयं अन्यस्याश्रयं ।। २२।२३
स्वतः आत्ममायया आत्मादीनां मायया विनिर्मिताः अशेषविशेषमहदादयो यादवरूपावाकल्पना येन तं धुर्य्यं श्रेष्ठं त्वां नतोस्मि
ति २४।२५।२६ ननु नारदेन व्योमवधो न हृदः स्तत्कथं तद्वध प्रसक्तिरिति तत्राप्यते प्रातरेव केशिवधानंतरं नारदो हमंगीत्युप

त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमद्यात्तमनुष्यविग्रहं नतो
स्मि धुर्यं यदुवृष्णिसात्वतां २७ शुक उवाच एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः प्रणिपत्याभ्य
नुज्ञातो ययौ तद्दर्शनोत्सवः २५ भगवानपि गोविंदो हत्वा केशिनमाहवे पशूनपालयत्पालैः प्री
तैर्व्रजसुखावहः २९ एकदा ते पशून्पालाश्चारयंतो ऽद्रिसानुषु चक्रुर्निलायनक्रीडाश्चोरपालाप
देशतः ३७ तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ।।
३८ मयपुत्रो महामायो व्योमो गोपालवेषधृक् मेषायितानपोवाह प्रायश्चोरायितो बहून् ३९
गिरिदर्यां विनिःक्षिप्य नीतं नीतं महासुरः शिलया पिदधे द्वारं चतुःपंचावशेषिताः ३० तस्य तत्कर्म
विज्ञाय कृष्णः शरणदः सतां गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ३१ स निजं रूपमास्थाय

नत्तीर्थं यथावृषभार्या यतनाद्व्योमहतः यह्व्योमवधः पूर्वमेव कृतोपि विशेषधारिप्रसंगादत्रोच्यते केचित्तु नः शंखचूडवधात्पूर्वमेवएतं
तितमाह एकदेति ३७।३८ मेषवत्कल्पिता आत्मनयं चोरवदाचरितः सन्नयो वाह ३९ उपलक्ष्य निनाय ३७ पिदधे छादितवान् ३० शरणादः १९

पशुमारोयथाभवतितथा ३२ धुविजोपेस्तयमानोउपरि विमानिकैर्देवैरिति ३४ इतिदशमेऽष्टात्रिंशोऽध्यायः ३७ अष्टात्रिंशे यथाध्यायेऽक्रूरो गो
कुलंगतः तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसंस्कृतः १ प्रातः केशिवधे वृत्ते हादश्यां निर्गते मुनौ ततो व्योमहते क्रूरः सायं गोकुलमागमत्
शतदेवं नारदेन कंसवधादि कार्ये विज्ञापिते श्रीकृष्णः सोममथुरां गंतुमुद्यतोवर्तते तदाक्रूरोपि गोकुलमगादित्याह अक्रूरोपीति १।२ अक्रूरो

तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं नि
र्भिद्य गोपान्निःसार्य कृच्छ्रतः स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं ३४ इति भागवते दशमे सप्तत्रिं
शत्तमोध्यायः ३७ शुक उवाच अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्थाय प्रययौ नं
दगोकुलं १ गच्छन्पथि महाभागो भगवत्यंबुजेक्षणे भक्तिं परामुपगत एवमेतदचिंतयत् २ किं मया
चरितं भद्रं किं तप्तं परमं तपः किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवं ३ ममैतद्दुर्लभं मन्य उत्तमश्लोकद
र्शनं विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ४ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनं ह्रियमाणः काल

निसंभावनयान्यअर्हते योग्याय ३ अस्य उत्तमस्य दर्शने भवमाशंक्य पुनः संभावयति ममैतदिति द्वयेन विषयात्मनो विषयाविष्टचित्तस्य शूद्र
जन्मनः यस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ४ यद्वा मैवं किं त्वधमस्य जीवस्यापि मम स्यादेवकुत इत्याह यथा हि
यमाणानां तरणानां मध्ये कश्चित्कदाचित्तरति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरतीति संभवतीति ५ नद्या

267

266

भा॰द॰पू॰ ११३

कर्कटिकाफलपक्कसदृशाद्धृदीर्यमाणस्य देहान्व्यसोर्विगतप्राणाद् विस्मितो गर्वरहितोऽयत्नेन हतारिर्यिनसः ९ कंसायक्रूरमादिश्यतद्दह
स्यादिपेशुनैः कंसघातादि समस्य कार्यमावेदन्मुनिस्तदाह देवर्षिरित्यादिना न चायं सत्वकः किंतु सर्वसुहृदित्याह भागवतप्रवरेति
१० अस्मद्द्रहस्य वैरिणः कंसे सूचितवानिति माशंकीरित्याह कृष्णेत्यादिना कृष्ण कृष्ण त्वमीश्वरो भूभारदैत्यसंहाराय यावतीर्णोसि अ
तस्तदनुरूपाचरणेन विश्वं परिपालयेति तत्र त्वयि तावद्भ्यशंके वनास्तीत्याह अप्रमेयात्मन्परिच्छेत्तुं स्वरूपयोगेश अचिंत्यप्र
भाव जगदीश्वर विश्वनियंतः वासुदेव सर्वभूतेषु वर्तमानो खिलावास सर्वस्याश्रय सात्वतांप्रवर श्रेष्ठ प्रभो सर्वशक्ते ११ कथमेवं स्यो

तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनव
र्षैर्दिविषद्भिरीडितः ९ देवर्षिरुपसंगम्य भागवतप्रवरो नृप कृष्णमक्लिष्टकर्माणं रहस्येतदभाष
त १० कृष्ण कृष्णाप्रमेयात्मन्योगेश जगदीश्वर वासुदेवाखिलावास सात्वतां प्रवर प्रभो ११ त्वमात्मा सर्वभू
तानामेको ज्योतिरिवैधसाम् गूढो गुहाशयः साक्षी महापुरुष ईश्वरः १२ आत्मनात्माश्रयः पूर्वं मायया ससृजे
गुणान् तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः १३॥

तमेवेत्तानां तरएको ऽनुस्यूत आत्मा अंतरं नुस्यूतत्वे दृष्टांतः एधसां काष्ठानामंतर्ज्योतिरग्निरिवेति भूतेषु स्थितोपि तेर्न दृश्यत इत्याह गूढ इति अत्र हेतवः गुहाशयः बुद्धेरप्यंतरः किंच साक्षी न हि साक्षी दृश्यत इत्यर्थः अपिच महापुरुषो परिच्छिन्नः तेन ज्ञायस इत्यर्थः तर्हि सर्वान्
तरत्वं किं प्रमाणमत आह ईश्वर इति न हीश्वरो... जीवानां प्रवृत्तिर्घटत इत्यर्थः १२ अहमीश्वरः
...त्यस्य ...आत्मनेति ... स्वतेजसा ... तव ...

प्रस्तुतमाह स त्वमिति भुवं भर्तॄणां धारयंतीति ... २४ । २५ ...
श्रोहनिकंसादींस्त्वया निहतान्द्रक्ष्यामीति प्रख्यापनप्रकारविशेषः २६ तस्येति तस्यानुगतदनंतरं शंखः पाञ्चजन्यो वधद्... भवि
निर्देशमात्रमेतन्नत्वानंतर्यं विवक्षितं २७ भार्यया सह... २८ ... सन्कालः कः शिष्यतीति अ

स त्वं भूधरभूतानां दैत्यप्रमथरक्षसाम् अवतीर्णो विनाशाय सेतूनां रक्षणाय च २४ दिष्ट्या ते निहतो दैत्यो लील
यायं हयाकृतिः यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं २५ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनं कंसं च
निहतं द्रक्ष्ये परश्वोऽहनि ते प्रभो २६ तस्यानु शंखयवनमुराणां नरकस्य च पारिजातापहरणमिंद्रस्य च पराज
यं २७ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं नृगस्य मोक्षणं शापाद्द्वारकायां जगत्पते २८ स्यमंतकस्य च मणे
रादानं सह भार्यया मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः २९ पौंड्रकस्य वधं पश्चात्काशीपुर्याश्च दीपनं दं
तवक्रस्य निधनं चैद्यस्य च महाक्रतौ ३० यानि चान्यानि वीर्याणि द्वारकामावसन्भवान् कर्ता द्रक्ष्याम्य
हं तानि गेयानि कविभिर्भुवि ३१ अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसा
रथेः ३२ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछितम् स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं

भगवंतमीमहि ३३ ...
मुख्यः विश्वस्य भस्मारत्यवास्य एवं विज्ञाप्य कृताभिनंदनं भगवंतं नमस्यति द्वयेन विशुद्धविज्ञानमिति केवलज्ञानैकमूर्तिः अत एव स्वसंस्थ
या सम्यक् स्वरूपे स्थित्यैव परमानंदरूपया समाप्ताः सर्वार्था येन तं अमोघवांछितमिति ननु वीचेदस्ति दुर्निवारा संसृतिः स्वतेजसा चिच्छ
क्त्या नित्यं निरतो मायाकार्यरूपो गुणप्रवाहो यस्मात्तं अतो भगवंतं निरतिशयैश्वर्यं ईमहि शरणं व्रजामीति॥ ३३॥ श्रीरामायनमः॥

निम्न १

नष्टकंटका: नष्टशत्रुः ननु कतिपयासु हृद्धेन नष्टकंटका: कथं स्यात्तत्राह जरासंध इति ३५।३६।३७ तव स्वस्ति मनीषितं विचारितं साधु सम्यक् स्वावद्यमरणांतमार्जनं मार्जकं तथाप्येतावानभिनिवेशेन कार्य इति भविष्यत्सूचयन्नाह सिद्ध्यसिद्ध्योरिति ३८ पुरुषकारस्य व्यभिचारमाह मनोरथानिति ३९।४०। इति दशमे टीकायां ३६ सप्तत्रिंशे हते केशिन्यथ स्तुतो भाविकर्मभिः नारदेन स्तुतः कृष्णोऽन्यो मासु

ततश्चैषा मही मित्र भवित्री नष्टकंटका: जरासंधो मम गुरुर्द्विविदो दयितः सखा: ३५ शंवरो नरको बाणो मय्येव कृतसौहृदाः तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ३६ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३७ अक्रूर उवाच राजन्मनीषितं साधु तव स्वावद्यमार्जनं सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ३८ मनोरथान्करोत्युच्चैर्जनो दैवहतानपि युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ३९ शुक उवाच एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ४० इति श्रीभागवते दशमे षट्त्रिंशः ३६ शुक उवाच केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः सटावधूताभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः १ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहांबुदोपमः दुराशयः कंसहितं चिकीर्षुर्व्रजं सनंदस्य जगाम कंपयन् २

रमथा वधीत् । वृषवेषासुरं यद्वत्केशिनं हयवेषिणं कंसप्राणसखं हत्वा कंसविसुमिवाकरोत् केशीति सभाकृ यदि तिस्त्रीयेनान्वयः महाहयः सन्महीं निर्जरयन् त्रयन्विदारयन्नित्यर्थः सटाभिः केशरैर्विधूतानि नीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् हेषितैरश्वजाति

राम: ११२

तद्धेषितैरीरितानि कुर्वन् ... पुच्छल्लोमभिर्विघूर्णिताः परिभ्रामिता अंबुदा येन आजौ संग्रामे ...
व्रजसमीपमाजुहाव स च केशी तन्निशम्य मृगेंद्रवन्नादमकरोत् ३ ततः स केशी हरिं दृष्ट्वा मुखेन खं पिबन्निव व्यादाय मुखं विहत्यामिमुखमा
गात् किंच अत्यमर्षरोगात् कुपितोऽत्यंतमसह्यमानो वा प्रत्यक्पद्भ्यां जघान दुरासदो अन्यैरभिभवितुमशक्यो दुरत्ययः उद्धतः सन्नुल्लंघितक्रमः

तं त्रासयंतं भगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णितांबुदं आत्मानमाजौ मृगयंतमग्रणीरुपाह्वयत्स व्यनदन्मृगेंद्रवत् ३ स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः ४ तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ५ स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिं सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन्प्रवेशयामास यथोरगं बिले ६ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ७ समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं विसृजन्क्षितौ व्यसुः ८॥

...हेतुः प्रचंडवः ४ तद्धननं वंचयित्वा हननाय प्रसारितयोः पदयोर्हस्ताभ्यां प्रगृह्य परिविध्य भ्रामयित्वा व्यवस्थितस्तथैव स्थितो वभूव ५ व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्यधावत् सोऽपि हरिर्हसन्नुत्तरं सव्यं भुजं निवेशयन्नेव हसन् यथोरगं विले शेते ६ चर्वणात्प्रागेव भुजस्पर्शमात्रस्य दंता निपेतुः ... अयो लोहं स्पृशतीति स्पृशः यथा तप्तमयोति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र लोके त्रिविधा जना मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये अत्र न कस्याप्यल्पं प्रत्यय इत्याह निवृत्ततर्षैरिति गततृष्णैर्मुक्तैः पीय-
मानः मुमुक्षूणामयमेवौषध इत्याह भवौषधादिति विषयिणां परमो विषयोऽयमेवेत्याह श्रोत्रमनोभिरामादिति अपगता पुरुषं
स्मात् आत्मनेऽहंतीति पशुघ्नस्तस्मात् पशुघातिन इति वा ४ किंच अस्मत्कुलदैवतं सः अतस्तत्कथैव नित्यं श्रोतव्येत्याशयेना-
नाह पितामहा इति अमरान् जयन्तीति तैः देवव्रतो भीष्मस्तदादैरतिरथैः तिमिङ्गिलैः दुरत्ययं वत्सपदमिव अत्यल्पं त-

निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्ना-
त् ४ पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं
स्म यत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं संतानबीजं कुरुपाण्डवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्च
मे यः शरणं गतायाः ६ वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः प्रयच्छतो मृत्युमुतामृतं च मायाम-
नुष्यस्य वदस्व विद्वन् ७ ॥

॥ त्वा तुच्छीकृत्वा तरन्न्स्म यः श्रीकृष्णः वज्ञ[illegible] येषां ते तस्य वीर्याणि वदस्वेति सत्तीयश्लोकगतेनान्व-
यः ५ न केवलं पाण्डवानेवारक्षदिदं मम शरीरमपि योऽरक्षदिति या नित्याह द्रौण्यस्त्रविप्लुष्टमिति द्रौणेरश्वत्थाम्नोऽस्त्रेणाद्दग्ध-
मिदं मच्छरीरं कुरूणां च पाण्डवानां च संतानस्य निदानं मम मातुः कुक्षिं प्रविष्टो धृतचक्रो यो जुगोपेति ६ अखिलदेहभाजां सर्वेषां प्रा-
णिनामन्तर्बहिश्च पूरुषरूपेण कालरूपेण चाशाभिप्रायेण बहुवचनं मृत्युं संसारं उत अपि अमृतमपि प्रयच्छतो वीर्याणि वदस्व

मत्स्यं मम निदर्शितः विधात्रा नारदेन [illegible]
दुर्मेकदाय २६ अर्थतं तत्त्वतः अर्थसिद्धान्तं जानातीति २७ दानपते हे अक्रूर [illegible]

रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः भवद्भ्यामिह संप्राप्तौ हन्येते मल्ललीलया २३ मञ्चाः क्रियन्तां विवि-
धा मल्लरंगपरिश्रिताः पौरा जानपदाः सर्वे पश्यन्तु स्वैरसंयुगं २४ महामात्य त्वया भद्र रंगद्वार्युपनीयतां
८२ द्विपः कुवलयापीडो जहि तेन ममाहितौ २५ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि विशसन्तु पशून् मेध्या-
न्भूतराजाय मीढुषे २६ इत्याज्ञाप्यार्थतन्त्रज्ञमाहूय यदुपुंगवं गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच
ह २७ भो भो दानपते मह्यं क्रियतां मैत्रमादृतः नान्यस्त्वत्तो हिततमो विद्यते भोज वृष्णिषु २८ अतस्त्वा-
सा माश्रितः सौम्य कार्यगौरवसाधनं यथेन्द्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः २९ गच्छ नन्दव्रजं तत्र सु-
तावानकदुन्दुभेः आसाते ताविहानेन रथेनानय माचिरं ३० निसृष्टः किल मे मृत्युर्देवैर्वैकुण्ठसंश्र-
यैः तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः ३१ घातयिष्य इहानीतौ कालकल्पेन हस्तिना यदि मु-
क्तौ ततो मल्लैः पातये वैद्युतोपमैः ३२ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् तद्बन्धून्निहनिष्यामि वृ-
ष्णिभोजदशार्हकान् ३३ उग्रसेनं च पितरं स्थविरं राज्यकामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम
२९।३० तौ मे मृत्युर्नितरां सृष्टः वैकुण्ठसंश्रयैः विष्णुसंश्रितैर्देवैः ३१ किंच तत्राह घातयिष्य इति कालकल्पेन मृत्युतुल्येन वैद्युतोपमैः शानि

गततृष्णैर्मुक्तैः [illegible] ॥ ७ ॥ [illegible]
हन्येते इति [illegible] ३२।३३।३४।३५ श्रीकृष्णनन्दन [illegible]

273

272

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰स्कं॰ २

ननु बलं गदं सारणं चंदुमेदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयदिति रोहिण्यास्तनयो रामः प्रोक्तः। वसुदेवं कथामहे
पुत्रानजीजनत् कीर्त्तिमंतं सुषेणं च भद्रसेनमुदारधीः। ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति पुनर्दे
वक्यागर्भसंबंधस्तत्रैवोक्तः स कुतो घटत इत्याक्षेपः ८ कस्मादिति भगवतः कंसभयशंकासंभवादित्यर्थः ९ मातुर्भ्रातरं कंसं मध्याहत्या

रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया देवक्यागर्भसंबंधः कुतो देहांतरं विना ८ कस्मान्मुकुंदो भगवा
न्पितुर्गेहाद्व्रजं गतः क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतांपतिः ९ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः
भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं १० देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः यदुपुर्यां सहावात्सी
त्पत्न्यः कत्यभवन्विभोः ११ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं १२
नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं १३ सूत उवाच एवं निश
म्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमा
रभत भागवतप्रधानः १४ श्रीशुक उवाच सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम वासुदेवकथायां ते यज्जाता

नैहं अहासा हा तं कस्मादवधीत १०।११।१२। ननु दुस्त्यजं पीडितस्य तव कुतः श्रवणादरस्तत्राह नैषेति त्यक्तोदकस्यापि
मम जीवनं हरिकथामृतं पानं निमित्तं तदुपरमे सद्य एव जीवितं न स्यादिति भावः १३ एवं साधुवादं समीचीनं प्रश्नं भागवतप्रधानः भागवते रामः २

अवधारितां

२७४

२९। तत्र तावत्प्रथमं भगवदवतारकारणमाह भूमिरित्यादिभिर्नवभिः श्लोकैः दृप्तनृपव्याजाये दैत्यास्तेषामनीकशतानामयुतैर्यो भूरि
भारस्तेनाक्रांता १७। विभोरंतिके उपस्थिता सती १८ स्वयं चाघमस्ततत्रासमं ताद्दवं कंसुरं च आसादिकेश्वरूपेणास्वंतरवर्त्तित्वेन चिंतित

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा १६ भूमिर्दृप्तनृपव्याजदै
त्यानीकशतायुतैः आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमुखी खिन्ना क्रंदंती करुणं
विभोः उपस्थितांतिके तस्मै व्यसनं स्वमवोचत १८ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह जगाम सत्रिन
यनस्तीरं क्षीरपयोनिधेः १९ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः
२० गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामा
शु तथैव माचिरं २१ पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदुर्व्या भरमीश्वरेश्वरः स्व
कालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रि
यः २३ वासुदेवकलानंतः सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ श्रीराम

र्जुंकेयस्तंतादृशं २० पौरुषीं पुरुषस्य भगवतः गां वाचं मे मत्तः आशु शृणुत माचिरं अविलंबितं तथैव विधीयतामित्ये
ति २१ विज्ञापनात् पुरैव पुंसा ईश्वरेण अवधृतो ज्ञातः धराया ज्वरस्तापः।२२।२३।२४॥ श्रीरामः

२७५

भा० द० पू०
२

देवकीगर्भसंकर्षणाय यशोदा मोदि कार्यार्थे यशोदायां संभविष्यति २५ ॥ २६ मोजेद्रवंधना ...
यावदध्यायसमाप्ति मथुरां आवसन् विषयान् देशान् २७ सूर्यया नवोढाया प्रयाणे प्रयाणार्थे २९ रश्मीन् प्रग्रहीत ३० पारिबर्हं उपस्करं ...

विष्णोर्माया भगवती यया संमोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ शुक उवाच इत्यादिश्यामर
गणान्प्रजापतिपतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २६ शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुरा
ञ्छूरसेनांश्च विषयान्बुभुजे पुरा २७ राजधानी ततः साभूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं संनिहितो हरिः २८ त
स्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् २९ उग्रसेनसुतः कंसः स्वसुः प्रियचिकी
र्षया रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ३० चतुःशतं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं
सार्द्धं रथानां च त्रिषट्शतं ३१ दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहि
तृवत्सलः ३२ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समम् प्रयाणप्रक्रमे तावद्वरयोः सुमंगलं ३३
पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ३४ इत्युक्तः स खलः
पापो भोजानां कुलपांसनः भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ३५ ॥ ॥ ३३ ॥ आभाष्येति रे कंसेति

सम्बोध्य हन्ता हनिष्यति ३४ कुलपांसनः कुलदूषणः आरब्ध उद्युक्तः कचे केशबन्धे ३५ श्रीगोपालाय नमः

रामः
३

नृशंसं क्रूरं महाभाग इत्ययं भावः स्वजन्मनि हर्षेण देवैरानकदुंदुभिघोषणाद्भाविभगवद्वतारेण आशंक्य प्रतीकारता संभवतीति सांत्व
यन्स्तुत्या कृपा विषयत्वेनोपपत्तिभिश्च साममार्गेण संबोधयन् ३६ सामभेदाभ्यां संबोधयन् तत्र साम पंचविधं भेदो द्विविधस्तदुक्तं सं
बंधलाभोपकृतिः ... भेदो गुणकीर्तनं साम पंचविधं भेदो दृष्टादृष्टभयं वचः तत्र श्लाघनीयगुणेति गुणकीर्तनं भगिनीति संबंधक
थनं पुत्रिकोपमेत्यभेदं कथ्यानि हन्यादिति स्त्रीवधनिंद्यत्वाय शोल्लीभं दर्शयति उद्वाहपर्वणीति संतानवृद्ध्युपकारं दर्शयति।
३७ मरणभयेन हन्मीति चेत्तत्रापि मरणस्यापरिहरणीयत्वाद्देहांतरस्यावश्यंभावित्वात्तत्रापि च भोगप्रेमास्पदत्वादीनामविशेषा

तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभाग उवाच परिसांत्वयन् ३६ वसुदेव उवाच श्लाघनी
यगुणः शूरैर्भवान्भोजयशस्करः स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ३७ मृत्युर्जन्मवतां वीर देहेन
सह जायते अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ३८ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः देहांत
रमनुप्राप्य प्राक्तनं त्यजते वपुः ३९ ॥ ॥ तद्भयेन पापाचरणमयुक्तमित्यभिप्रेत्याह मृत्युर्जन्मवतामित्यादि देहेन

सहेति विधात्रा ललाटे लिखितत्वादिति तत्रापि कालविलंबार्थं हन्मीति चेत्तत्राह अद्य चेति अवश्यंभाविनि मरणे विलंब
मात्राय पापाचरणमयुक्तमिति भावः ३८ किं च अस्मिन्देहे गते यदि देहांतरं न स्यात्तदा युज्येत पापे नापि तत्पालनं न नु तद
स्तीत्याह देहे पंचत्वमापन्ने इति आपन्ने प्राये कर्मवशाद् ... तत एव प्रथमं देहांतरं प्राप्य पश्चात्पूर्वं वपुस्त्यजति ३९ ॥

भा.द.पू. ४

अत्र दृष्टांतः व्रजन्निति एकेनाग्रतो निहितेन पदान्तरमुत्क्षिपति एवं देही देहान्तरं गृहीत्वा पूर्वं त्यजति
गच्छतीति तद्वदत्र च स्वीकारपरित्यागो नात्यंतभिन्नविषयाविति स्पष्टं दृष्टांतरमाह यथा तृणजलौकेति तृणान्तरमवष्टभ्य पूर्वं
तृणं त्यजति एवं कर्मपथे वर्तमानो न्योजीवोपि जन्ममृत्युभयादीनि याति नाम स्मृतिमात्रतः विनश्यति न मृत्तिके सायपरमा
त्मने ४० देहविषयावेव स्वीकारपरित्यागौ दर्शयितुं दृष्टांतरमाह स्वप्न इति दृष्टं राजादिदर्शने श्रुतं इंद्रादिश्रवणाताभ्यामा

व्रजंस्तिष्ठन् पदैकेन यथैवैकेन गच्छति यथा तृणजलौकैवं देही कर्मगतिं गतः ४० स्वप्ने
यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः दृष्टश्रुताभ्यां मनसानुचिन्तयन् प्र
पद्यते तत् किमपि ह्यपस्मृतिः ४१

हितसंस्कारेण मनसा तदेवानुचिंतयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमप्यनिरुक्तं पश्यति तत्क्षणान्तरं च तदेवाहमिति
प्रपद्यते मन्यते ततश्च जाग्रद्देहापगतस्मृतिर्भवति पुरुषायथेति जाग्रत्यैवदर्शयितुं दृष्टांतरमाह मनोरथेनेति अत्रापि दृष्टश्रुताभ्यामि
त्यादि सर्वं योज्यं तथा च वक्ष्यति जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः जन्मत्वात्मतया पुंसः सर्वभावेन भूरिदे विषयस्वीकृतिं प्राहुर्य
था स्वप्नमनोरथैः स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसावित्यादि तद्वदत्रापि कर्मवशाद्देहांतं प्राप्य प्राक्तनं त्यजतीति ४१ रामः ४

ननु विचित्रदेहहेतूनां कर्मणां सत्त्वाद्देहविशेषप्राप्तौ किं कारणमत आह यत इति देहस्य पंचत्वसमये पंचसु गुणेषु भूतेषु मायारचितेषु माय
या नानादेहरूपेण रचितेषु दैवेन फलाभिमुखेन कर्मणा चोदितं नानाविकारात्मकं मनो यं यं देहं देवतिर्यगादिरूपं प्राप्य धावति धावत्सन्
यं यमाप अभिनिवेशेन प्राप्नोति तत्र तत्र सो देही जायते ननु मनसः कर्तृत्वात्तदेव जायतां न त्वकर्ता आत्मेत्यत आह प्रपद्यमान इति तदेवाह
मिति प्रपद्यमानस्तेन सह जायत इति ४२ ननु सत्यं भविष्यत्येव किमपि देहमोहमात्रं तथाप्यस्यातिप्रियस्य राजदेहदेहस्य रक्षणीयाद्दे

यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ४२
ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ४३
तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयं ४४॥

येत्तत्राह ज्योतिरिति अदश्चन्द्रादिज्योतिः उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदके च पार्थिवेषु तैलघृतादिषु च प्रतिबिंबे न
स्थितं समीरस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते यथा एवं स्वमायया रचितेषु गुणेषु देहेष्वसौ रागेणानुगतः प्रविष्टो मुह्यति अभि
निवेशं प्राप्नोत्ययं भावः आत्मनस्तु वदेहाद्यध्यासेन जन्मादिकं सह तेन जायत इति ततश्चान्योन्यधर्माध्यासाद्यथा देहधर्माः
कार्श्यादय आत्मनि प्रतीयंते एवमात्मधर्माः प्रेमास्पदत्वादयोपि देहादिष्विति राजसूकरदेहयोर्विशेषाभावाद्व्यर्थो मृत्युप्रतीकार इ
ति ४३ एवमुक्तं सामोपायमुपसंहरन्भेदमाह तस्मादिति परत इति अभिद्रुह्यमानात्तत्संबंधिनश्चयमाद्वापि इहामुत्र च भयमिति भेदो दर्शितः ४४

भा·द·पू·
५

पुनः साममाह स्वेति पुत्रिकोपमा दारुमयी वा चेतनप्राया ४५ बोध्यमान उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादाननुवर्तते।
४६ आनकदुंदुभिरिति पदं महाभाग इत्यत्रो अभिप्रायं प्रतिव्योढुं प्रतिकर्तुमित्यर्थः इदं च वक्ष्यमाणमपत्यार्पणं अन्वपद्यत ज्ञातं
न ४७ ननु खलोयमेतन्न मन्यते त्याशंक्याह स्वयमेव मृत्युरिति ४८ तस्मादुपेक्षादोषपरिहाराय एवं करिष्यामीत्याह प्रदायेति मृ
त्यवेवं सायन्निदमपि नैव न्याय्यमित्याशंक्याह सुता इति अस्यां यदि मे सुता एव न स्युः दायद्वाविद्धवतु जीवंतु ताव द्वेदेवतदं

एवात वानुजा बाला कृपणा पुत्रकोपमा हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सलः ४५ शुक उवाच एवं स
सामभिर्भेदैर्बोध्यमानोपि दारुणः न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ४६ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यान
कदुंदुभिः प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ४७ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यद्यसौ न
निवर्तेत नापराधोस्ति देहिनः ४८ प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमां सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत
१तो तं चेत् ४९ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ५०॥ १तदा स्वयमेव म्रियेत न

तदानिं किंचिदन्याय्यं ४९ यदि च सुता भविष्यंति न चायं म्रियेत तदा मत्पुत्रा देवास्य मरणमिति विपर्ययो वा किं न स्यात् ननु प्रौढस्य कंस
स्य तव बालकानां च मृत्युः स्यात् तत्राह गतिरिति धातुरस्यास्त्वामष्टमो गर्भो हंतेत्युक्तवतः अत इदानीं मया त्वार्पितेपि प्रतिवैवमेव तथा सत्युप
स्थितो मृत्युः संतानं निवर्तेत निवृत्तः पुनः कालांतरे आयते तदा नापराधो ममेत्यर्थः अथवा मत्पुत्रादुपस्थितो मृत्युरस्या वधाद्यो निवर्ते रामः
५

नः २

प्राणिनामहं च दुर्वितर्क्यमिति सदृष्टांतमाह अग्नेरिति वनेरदृष्टान्यदहन्नग्निः सन्निहितानपि परसान्परित्यज्य कदाचिद्दूरस्थानपि दहति ग्रामे
न गृहान्वा न त्वस्य प्राणादृष्टव्यतिरेकेण किंचिन्नियामकमस्ति यथा एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभाव्य अचिंत्यः ५१ यावदात्मनिदर्शनं स्वप
स्त्रीबधि विचार्य ५२ तस्य विश्वासाय विकसितमुखांभोजः प्रहसन्नब्रवीत् ५३ यद्यथा शरीरवागाद्धृत थाहि निश्चितं अस्याः सकाशात्ते

अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोन्यन्न निमित्तमस्ति एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ५१
एवं विमृश्य तं पापं यावदात्मनिदर्शनं पूजयामास वै शौरिर्बहुमानपुरःसरं ५२ प्रसन्नवदनांभोजो नृशंसं निरपत्र
पं मनसा दूयमानेन प्रहसन्निदमब्रवीत् ५३ वसुदेव उवाच न ह्यस्यास्ते भयं सौम्य यद्वै साहाशरीरवाक् पुत्रान्स
मर्पयिष्येऽस्या यतस्ते भयमागतं ५४ शुक उवाच स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् वसुदेवोपि तं प्री
तः प्रशस्य प्राविशद्गृहं ५५ अथ काल उपावृत्ते देवकी सर्वदेवता पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ५६
कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः अर्पयामास कृच्छ्रेण सोनृतादतिविह्वलः ५७ ॥ श्रीरामः

भयं नास्ति यतो येभ्यः पुत्रेभ्यस्ते भयमुपस्थितम् अहमेव दास्ये तु ते अन्योन्यापेक्षया सर्वेप्यष्टमा भवेयुरित्युक्तं तेनास्याः पुत्रान्
समर्पयिष्ये ५४ निववृते निवृत्तस्तद्वाक्यसार उपपत्तिः तज्ज्ञ इति ५५ अथेति प्रसूतिकाले प्राप्ते सर्वे सर्वात्मा भगवा
नेव देवता यस्याः सा तथा सर्वदेवतामयीति वा भगवदाश्रयत्वात् ॥ ५६ ॥ ५७ ॥ श्रीरामो जयतितरां सर्वोपरि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·पू· ९

न्त्यविपुत्रं कथं समर्पितवानित्यपेक्षायामाह किं दुःसहमिति साधूनां सत्यसंधानां पुत्रलालनसुखापेक्षा कथं त्यक्तेति अत आह विदुषा
मिति भगवानेव तत्त्वं नान्यदिति जानतामित्यर्थः ननु स्वयं नीते सति कंसो बालं न हन्यादिति मत्वा नीतवानिति किं न स्यादिति नेत्याह

किं दुःसहं नु साधूनां विदुषां किमपेक्षितं किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ५८ दृष्ट्वा समत्वं तच्छौरेः सत्ये
चैव व्यवस्थितिं कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ५९ प्रतियातु कुमारोयं न ह्यस्मादस्ति मे भयं अष्टमा
२५ त्तु युवयोर्गर्भान्मृत्युर्मे विहितः किल ६० तथेति सुतमादाय ययावानकदुंदुभिः नाभ्यनंदत तद्वाक्यमसतो
ऽविजितात्मनः ६१ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ६२॥
सर्वे वै देवताप्राया उभयोरपि भारत ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ६३ एतत्कंसाय भगवाञ्छशंसाभ्ये
त्य नारदः भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ६४ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति देवक्या गर्भ
संभूतं विष्णुं च स्ववधं प्रति ६५ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे जातं जातमहन्पुत्रं तयोरजनशंक
या ६६ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ६७ श्रीगोपाल

किमकार्यमिति ननु देवकी कथं पुत्रं तत्याज तत्राह दुस्त्यजमिति चित्ते धृत आत्मा हरिर्यैस्तेषां ५८।५९।६०।६१ कंसस्य यशां
ति देवकार्यानुगुणा न भवंतीति नारदस्य प्रत्यवस्थानं तदाह नंदाद्या इत्यादि त्रयेण ६२ उभयोर्वसुदेवनंदकुलयोः ६३ वधोद्यमं देवकृतमिति शेषः
ती

282

६८।६९ इति दशमे टीकायां १ द्वितीये कंसघातायदेवक्या गर्भगो हरिः ब्रह्मादिभिः स्तुतः साचसांत्विता निरूप्यते। यदुभिः सह विरुध्यते युक्तं
तमेव विरोधप्रपंचयति त्वरया देवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवेशं वक्तुं प्रलंबेत्यादि सार्धत्रयेण महाशनो घासुरः।१।२।३। अनु

आत्मानमिह संजातं जानन्प्राग्विष्णुना हतं महासुरं कालनेमिं यदुभिः स व्यरुध्यत ६८ उग्रसेनं च पितरं यदुभोजां
धकाधिपं स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ६९ इति भागवते दशमे ... नाम १ श्रीशुक उवाच
प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमा ७
दिभिर्युतः यदूनां कदनं चक्रे बली मागधसंश्रयः २ ते पीडिता निविविशुः कुरुपंचालकेकयान् शाल्वान्विद
र्भान्निषधान्विदेहान्कोशलानपि ३ एके तमनुरुंधाना ज्ञातयः पर्युपासते हतेषु षट्सु बालेषु देवक्या औ
ग्रसेनिना ४ सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते गर्भो बभूव देवक्या हर्षशोकविवर्धनः ५ भगवानपि वि
वि२ श्वात्मा विदित्वा कंसजं भयं यदूनां निजनाथानां योगमायां समादिशत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं रो
हिणी वसुदेवस्य भार्यास्ते नंदगोकुले ७ अन्याश्च कंससंविग्ना विवरेषु वसंति हि देवक्या जठरे गर्भं शेषाख्यं

संधानात् अनुवर्तमानाः ४ धाम कल्ला देवस्य सप्तमो गर्भो बभूव किं तद्धामेत्यत आह यमनंतमिति हर्षशोकविवर्धनः आनंदरूपत्वात् तीर्णत्वाद्धर्षः सर्वगर्भसाधा
रणदृष्ट्या च शोक इति ५।६ ननु सा गोकुले किमित्यास्ते अत आह न केवलं सैवान्यापीति विवरेषु लक्ष्यस्थानेषु जठरे संतं ननु गर्भ आह व्यमाणः क

283

भा॰द॰पु॰ ७

किमर्थमेवं कार्यमित्यत आह अथेति अनंतरमेवेत्यर्थः अंशभागेनेति अंशैः शक्तिभिः भजतेत्यधिति [illegible] सर्वानुग्रहादि [illegible] त्यंशभागं तेन परिपूर्णेन रूपेणेत्यर्थः यद्वा अंशेन ज्ञानैश्वर्यबलादिभिर्भाजयति योजयति स्वीयानिति [illegible] नेति यद्वा अं शेन पुरुषरूपेण मायाभागो भजनं ईक्षणं यस्य तेन यद्वा अंशेन मायया गुणावतारादि रूपाः भागा भेदा यस्य तेन यद्वा अंशा एव मत्स्य कू र्मादिरूपाः भागाः भजनीयाः न तु साक्षात्त्वरूपं तेन अथवा अंशैर्ज्ञानादिभिर्भजनमनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणे

तत्संनिकृष्य रोहिण्या उदरे संनिवेशय अथाहमंशभागेन देवक्याः पुत्रतां शुभे ९ प्राप्स्यामि त्वं यशोदायां नंदप

२सि त्न्यां भविष्यसि अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं नानोपहारबलिभिः सर्वकामवरप्रदां १० नामधेयानि कु

र्वंति स्थानानि च नरा भुवि दुर्गेति भद्रकालीति विजया वैष्णवीति च ११ कुमुदा चंडिका कृष्णा माधवी कन्यकेति

४त्वं च माया नारायणीशानी शारदेत्यंबिकेति च १२ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि रामेति लोकरमणाद्ब

लभद्रं बलोच्छ्रयात् १३ संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १४

यज्ञभुगपि ते बुभुजे बालानामिव केलिर्यस्य सः तदाह उदरवस्त्रयोर्मध्ये वेणुं बिभ्रद्धारयन् इति सर्वत्र संबंधः वाम इति कक्षे पाणौ वा विशेषणं मृ
सृणं स्निग्धं दध्योदनकवलं तदुचितानि बिल्वादि फलानि अंगुलीषु संधिषु करोतिके वसर्वाभिमुखो मध्ये इति तत्र स्वस्य परितः उपवि
ष्टान्सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः स्वर्गे स्वर्वासिनि जने आश्चर्येण पश्यति सति लोके जनमध्ये बुभुजे ११ श्रीरामाय नमः॥ रामः
४२

१२ भी भयं भयहेतुभ्यो भयं अस्य पास्य यद्वा अस्य विश्वस्य भियोऽपि भयं श्रीकृष्णः आशात् भोजनात् अस्मिन्पादे त्वराधिक्यमार्षं १३ अद्रिषु
तद्दरीकुञ्जेषु लतादिपिहितोदरविवरेषु संकटस्थानेषु १४ अंभोजन्म पद्मात् जनिर्यस्य स ब्रह्मा तदन्तरे तस्मिन्नवसरे गतः आ
गतस्तच्छिद्रं प्राप्तो वा अदः पि मंजु मनोहरं महित्वं महिमानं द्रष्टुं तस्य वत्सानितः स्थानाद्वत्सान्वत्सपांश्चान्यत्र नीत्वा स्वयं तिरो ३ न्य

भारतैवं वत्सपेषु भुञ्जानेष्वच्युतात्मसु वत्सास्त्वन्तर्वने दूरं विविशुस्तृणलोभिताः १२ तान्दृष्ट्वा भयसंत्रस्ता
नूचे कृष्णोऽस्य भीभयं मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहं १३ इत्युक्त्वाद्रिदरीकुञ्जगह्वरेष्वात्म
वत्सकान् विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ १४ अंभोजन्मजनिस्तदन्तरगतो मायार्भकस्येशितुर्द्र ३ न्य
ष्टुं मञ्जु महित्वमन्यदपि तद्वत्सानितो वत्सपान् नीत्वान्यत्र कुरूद्वहान्तरदधात्खेऽवस्थितो यः पुरा दृष्ट्वा
घासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयं १५ ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् उभावपि वने कृष्णो
विचिकाय समन्ततः १६ क्वाप्यदृष्ट्वान्तर्विपिने वत्सान्पालांश्च विश्ववित् सर्वं विधिकृतं कृष्णः सहसावजगा
म ह १७ ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च उभयायितमात्मानं चक्रे विश्वकृदीश्वरः॥ १८॥

बभूव प्रभवतः श्रीकृष्णस्य १५ उभावपि वत्सान्वत्सपांश्च विचिकाय अन्वीक्षितवान् १६ विधिकृतं ब्रह्मणा कृतं १७ उभयायितं वत्स
वत्सपालरूपेण वर्तमानमित्यर्थः अयं भावः यद्यहं स्वीयमायया तान्वत्सान्वत्सपान् ब्रह्मणः समीपादानयामि तर्हि तन्मातॄणां विषादः स्यात् यदि तानेव आनयामि तर्हि ब्रह्मणो मोहो न स्यादिति ततः

... वत्सहरणे ... १८

भा॰ द॰ स्क॰ ४२

तदेव दर्शयति । यावदिति । वत्सपानां वत्सकानां चाल्पकवपुः प्रमाणमनतिक्रम्य एव सुपर्यापि योज्यं यद्वा यावद्वत्सपावद्व
पुस्तावत्सर्वस्वरूपो जः श्रीहरिरेवाभावि इति । उत्तरार्द्धेऽपि सर्वं विष्णुमयं जगदिति प्रसिद्धा या गीस्तस्या अङ्गवत्साः गीरे वार्थे सर्वरूपेण प्रत्यक्षा बभू
वेत्यर्थः १९ एवं सर्वात्मा स्वव्रजं प्राविशत्कथं स्वयमात्मैव प्रयोजकः आत्मरूपान्गोवत्सान्निर्गमे अपि स्वयमेवेत्यर्थः आत्मरूपैर्वत्सपैः
प्रतिवार्य इति प्रयोजककर्तापि स्वयमेवात्मविहारैः क्रीडन्निति क्रियाकारकाण्यपि स्वयमेवेत्यर्थः २० तत्र तदात्मनस्तत्तज्ञोपवालरूपोऽभ

यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषाम्बरं ।
यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभौ १९ स्व
यमात्मात्मगोवत्सान्प्रतिवार्यात्मवत्सपैः । क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजं २० तत्तद्वत्सान्पृथङ्नीत्वा
तत्तद्गोष्ठे निवेश्य सः । तत्तदात्माभवद्राजंस्तत्तत्सद्म प्रविष्टवान् २१ तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दो
र्भिः परिरभ्य निर्भरं स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् २२ ततो नृपोन्मर्दनमज्जले
पनालंकाररक्षातिलकाशनादिभिः संलालितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः ॥ २३ ॥

वत् तत्तत्तत्सद्म प्रविष्टः २१ गोपिकामोहनमाह तन्मातरो वेणुरवेण त्वरया उत्थिताः सत्यः सुतान्मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्य
उद्धृत्य पयः सुधासवं पय एव या सुधा आसवस्तद्वदुन्मादकं पाययामासुरित्यर्थः २२ एवं यामयमेन तत्तत्काल क्रीडानि
यमेन सायं गतः प्राप्तः स्वाचरितैः शोभनैर्हरि तैर्वा मातॄः प्रहर्षयन्ताभिरुन्मर्दनादिभिरुपलालित इति ॥ २३ ॥ श्रीः

द॰ स्क॰ ४२

323

गवां मोहनमाह गाव इति परिहृता आहूतास्तैः संगताश्च तान् २४ एतावन्तं वत्सरं स्नेहस्यापि दुर्निवारमासीदित्याह गोगोपीनामि
ति गवां गोपीनां चास्मिन्श्रीकृष्णे मातृता उपलालनादिरूपा पुरोवदेवासीत्किंतु स्नेहर्द्धिकां विना स्नेहाधिक्यं त्विदानीं विशेष इत्य
र्थः आसु गोपीषु हरेस्तोकता च वालभावतापि पूर्ववदेवासीत्किंतु मायया विना ममेयं माता अहमस्याः पुत्र इति मोहं विनेत्यर्थः २५
स्नेहर्द्धिमेव दर्शयति व्रजौकसामिति यथा श्रीकृष्णे यशोदानंदनेः स्वपुत्रेभ्यः स्नेहाधिक्यं पूर्वमासीदिदानीं स्वतोकेष्वपि तथैवाव

गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसंगतान् । स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लि
हंत्यः स्रवदौधसं पयः २४ गोगोपीनां मातृतास्मिन्सर्वा स्नेहर्द्धिकां विना । पुरोवदास्वपि हरेस्तोक
ता मायया विना २५ व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहं । शनैर्निःसीम ववृधे यथा कृष्णे त्वपू
र्ववत् २६ इत्थमात्मात्मनात्मानं वत्सपालमिषेण सः । पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः २७ ए
कदा चारयन्वत्सान्सरामो वनमाविशत् । पंचषासु त्रियामासु हायनापूरणीष्वजः २८ ततो विदूराच्चरतो गा
वो वत्सानुपव्रजं । गोवर्द्धनाद्रिशिरसि चरंत्यो ददृशुस्तृणं २९ ॥

वति २६ एवमात्माप्यात्मीकृत्य वत्सपो भूत्वा तत्रापि वत्सानां पालानां मिषेणात्मानमात्मना पालयन्क्रीडयन्नित्यर्थः २७ एतावत्पर्यं
तं रामस्यापि मोहश्चासीत्संवत्सरान्ते कथंचिज्ज्ञातवानित्याह एकदेति पंचषासु पंच वा षड्वा सु त्रिषु हायनस्यापूरणी
षु रात्रिषु शेषास्वित्यर्थः २८ ततो दूरतो गोवर्द्धनशिखरे चरंत्यो गावो व्रजसमीपे चरतो वत्सान्ददृशुः ॥ २९ ॥ श्रीः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा.द.पू. ४३

४।३९।

तदेवसगोव्रजः गवां कलापकलत्स्नेहवशात्तेषां वत्सानां स्नेहेनाकृष्टः एवमस्मृतः आत्मा येन सः जवेनोपद्रुतमगात् ... त्यात्मपदुर्गमार्गोऽतिक्रांतः आत्मपा गोपास्तेषां दुर्गमो मार्गो यस्य स चतया युक्तः अभ्यां मध्ये धावन् द्विपात् इव प्रतीयमानः ककु / द्ग्रीवा यस्य सः उदास्यपुच्छः उन्नमितान्यास्यानि पुच्छानि यस्य सः आस्रुपयः सर्वतः स्नुवंति पयांसि यस्य सः / ... आस्रुपया इत्यपि पाठे स एवार्थः गोव्रज इत्यनेन पदेन वृषभादयोऽप्यनुरित्युक्तं तत्र विशब्दतो धूर्नोचेष्टितमाह समेत्येति गो

दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः । द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैरास्रु
पया जवेन ३० समेत्य गावोऽधो वत्सान्वत्सवत्योऽप्यपाययन् गिलंत्य इव चांगानि लिहंत्यः स्वौध सु
संपयः ३१ गोपास्तद्रोधनायासमौढ्यलज्जोरुमन्युना दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृशुः सुतान् ३२ गो
तदीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् उदूह्य दोर्भिः परिरभ्य मूर्द्धनि घ्राणैरवापुः प
रमां मुदं ते ३३ ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ३४

वर्द्धनस्याधः वत्सवत्यः पुनः प्रसूता अपि ३१ एवं वत्सेषु गवां स्नेहातिशयमुक्त्वा गोपानामपि दर्शयितुमाह गोपा इति
तासां गवां रोधनायासस्तत्र स्वमौढ्यं तेन मौढ्यप्राप्तेन लज्जया सह उरुमन्युना दुर्गमार्गजनितक्लेशेन चाभ्येत्य गोवत्सैः
सह सुतान्ददृशुः ३२ ततश्च तेषामीक्षणोत्थेन प्रेमरसेनाप्लुतानि मग्नान्याशयानि येषां तेऽत एव मन्युरहिताः
न पिताऽपि तु मागताः संतः गतमन्यवः प्रत्युत जातानुरागाः येषां ते मूर्द्धिघ्राणैरवघ्राणैः परमं मुदमापुः ३३ कृच्छ्रात् ततोऽपगताः
यौः

रामः ४३

व्रजस्य रामः प्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणं मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिंतयत् ३५।१ पु.प.१

स्व

प्रेमर्द्धेरौत्कंठ्यमतिशयं मुक्तस्तनेष्वपत्येषु वीक्ष्य हेतुमजानन्नचिंतयत् ३५ चिंतामेवाह द्वाभ्यां किमेतदिति वासुदेवे यथापु
राप्रेम तथा सुतेष्वपि व्रजस्य प्रेम वर्द्धते किमेतदद्भुतमिति किंच सात्मनः मत्सहितस्य मम तेषु प्रेमकारणं किमिति भावः ३६ के
यं माया देवानां वा नराणां वा असुराणां वा कुतो वा कस्मात्प्रयुक्ता तत्रान्यमाया न संभवति यतो ममापि मोहो वर्तते अतः प्रा
यशो मत्स्वामिनः श्रीकृष्णस्यैव मायेयमस्त्विति संभावयति ३७ सवयसान्सखीनपि वयुनेन ज्ञानेन चक्षुषा वैकुंठं श्री

किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि व्रजस्य सात्मनस्तोकेष्वपूर्वं प्रेम वर्द्धते ३६ केयं वा कुत आ
याता दैवी वा नार्युतासुरी प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी ३७ इति संचिंत्य दाशार्हो शा
वत्सान्सवयसानपि सर्वानाचष्ट वैकुंठं चक्षुषा वयुनेन सः ३८ नैते सुरेशा ऋषयो न चैते त्व
मेव भासीश भिदाश्रयेऽपि सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ३९ तावदे
त्यात्मभूरात्ममानेन त्रुट्यनेहसा पुरोवदाब्दं क्रीडंतं ददृशे सकलं हरिं ४०॥

कृष्णस्य स्वरूपमात्मानं ... कृष्णमेवापश्यत् ३८ एवं श्री
... ऋषीणामंशाः ... इति तावदहं वेद्मि इदानीं तु न तथा किंतु अस्मिन्भिदाश्रयेऽपि त्वमेव भासि अत त्वं तत्
... कथं त्वमिति वद ... निगमात् ... ३९ ततो रामस्य

भा·द·१·
४४

इत्थंचान्यतर्कपदित्याह द्वाभ्यां यावंत इति मेमा पाशये मन्मायात स्य ४१ मन्मायामोहितेभ्य इतरेकुत्रत्याः ४२ [illegible]
वितर्कपन्मुत्स्यादित्याह एवमिति द्वाभ्यां एवमेतेषु भेदेषु चिरं ध्यात्वा सम्रात्मभूरिति पाठः ४३।४४ ननु मायायाश्रयस्य तत्
स्य कुतो मोह इत्यत आह तम्यामिति महामायाविनि भगवति अन्यमायाच्छादन विक्षेपकत्वाभेदेष्वंतद्वय

यावंतो गोकुले बालाः सवत्साः सर्व एव हि मायाशये शयाना मे नाद्यापि पुनरुत्थिताः ४१ इत एतेत्र
कुत्रत्या मन्मायामोहितेतरे तावंत एव तत्राब्दं क्रीडंतो विष्णुना समं ४२ एवमेतेषु चिरं ध्यात्वा स आत्म- भेदेषु
भूः सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ४३ एवं संमोहयन्विष्णुं विमोहं विश्वमोहनं स्वये-
व माययाजोपि स्वयमेव विमोहितः ४४ तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि महतीतरमा-
येशं निहंत्यात्मनि युंजतः ४५ तावत्सर्वे वत्सपालाः पश्यतोजस्य तत्क्षणात् व्यदृश्यंत घनश्या-
माः पीतकौशेयवाससः ४६॥ माह तम्यामिति निशायां रात्रौ नैहारं हिमकरं प्रभवं तम इव तन्निहितार्थोपसर्जनस्य

तमसो नैहारमिति विशेषणं छादनं तत्तमो यथा पृथगावरणं न करोति किंतु तत्रैव लीयते यथा च खद्योतार्चिरहनि न
पृथक् प्रकाशनं करोति एवं महति पुरुषे पुंसि अजस्य पुंसः इतरा गौणमाया न तत्र किंचित्करोति किं तु आत्मनि स्व रामः
स्मिन्नेव ऐश्वर्यं सामर्थ्यं निहंतीति ४५ अन्यदप्याश्चर्यमाह तावदिति वत्सपालाः वत्सा वत्सपालाश्च सर्वे प्रत्येकं वि ४५

४७ श्रीवत्सं प्रभायुक्तं लांछनं गदादिना दोः सु येषां तेर त्नमयानि कं बुवत्त्रिधा राशिः कं कणानि पाशि सुयेषां ते च ४८ तथा भूरिवहुलत
न्मार्जितं पुण्यं तद्युक्तैर्जनैरर्पितैः ४९ चंद्रिकाविशदस्मितयुक्तैः सहारुणापांगेन च वर्तमानाये या गास्ते वीक्षितैः स्वकार्थीनां स्वभक्तमनोरथा
नां जः सत्वाः सृष्टिपालकाः इव व्यदृश्यंत सत्ववृद्धिशदस्मितेन पालकाः रजोवृद्धारुणेन स्रष्टारः इव तादृक्कटाक्षेद्योतमाना इत्यर्थः ५० आ
त्मा कुत्स्ना तदादि स्तंपर्यंतैर्नैकार्हैः अनेकार्हैः गुणैः ५१ अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिर्महदादिभिरितिमहत्सूत्रेषोः पृथ

चतुर्भुजाः शंखचक्रगदाराजीवपाणयः किरीटिनः कुंडलिनो हारिणो वनमालिनः ४७ श्रीवत्सांगद
दोरत्नकंबुकंकणपाणयः नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः ४८ आंघ्रिमस्तकमापूर्णास्तु
लसी नवदामभिः कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ४९ चंद्रिकाविशदस्मेरैः सारुणापांगवी-
क्षितैः स्वकार्थानामिव रजःसत्वाभ्यां स्रष्टृपालकाः ५० आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः
नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः ५१ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः चतुर्विंशति-
भिस्तत्वैः परीता महदादिभिः ५२ कालस्वभावसंस्कारकामकर्मगुणादिभिः स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपा-

त्वौपिवत्साश्चतुर्विंशतितत्वैर्जगत्कारणैः ५२ कालादिभिश्च तत्सहकारिभिः तत्र स्वभावः परिणामहेतुः संस्कार उद्बोध-
कः स्वा महिध्वस्तमहिभिर्भगवन्महिम्ना तिरस्कृतस्वातंत्र्यैरुपैः सर्वैरणिमाद्यैः ।५३। सर्वेषां मूर्तिमत्वापि विशेषमाह ।। [illegible]

मा॰द॰पू॰
४५

सत्यज्ञानेति॰ सत्याश्च ज्ञानरूपाश्च तत्रापि तदेकमात्रादिविजातीयसंभेदरहिताः तत्रापि च एकरसाः सदैकरूपा नित्या यद्वा ते य- द्वा सत्यज्ञानादि मात्रैकरसं यद्ब्रह्म तदेव मूर्त्तिर्येषामिति अत एव उपनिषदामप्यज्ञानं से वहकुच दृष्टुयेषां ते वाम पि हि निश्चितं अस्पृष्ट भूरि

माहात्म्या न स्पष्टुं स्पर्शयोग्यं भूरिमाहात्म्यं येषां ते तथाभूताः सर्वे दृश्यंते ते ति ५४ एवं सकृत्सह एकदेशे परब्रह्मणो विशेषणाय स्यति ५५

अतिकुतुकेन आश्चर्येण उद्धत्य हृद्भिः पूरा स्त्य हंस पृष्ठे निपत्य निराकुतुकशब्देन तीयायाः छंदसोलुक् यद्वा उद्धत्य इति छेदः॥

२ विलो॰ऽ१ अतिकुतुकेन उद्धत्य दृष्टिं मीत्य विपर्यस्त स्तस्मिन्निति यावत् पाठांतरे॰ अतिकुतुकेन उद्धत्य क्षुभित स्त्वेषां धाम्नां तेजसा स्तब्ध

सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः अस्पृष्ट भूरि माहात्म्या अपि ह्युपनिषद्दृशां ५४ एवं सकृद्ददर्शाजः परब्रह्मा त्मनोऽखिलान् यस्य भासा सर्वमिदं विभाति सचराचरं ५५ ततोऽतिकुतुकोद्धत्यस्तिमितैकादशेंद्रियः तद्धाम्ना भूदजस्तूष्णीं पूर्देव्यंतीव पुत्रिका ५६ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति च्छाद जो ज्ञात्वा सपदि परमोऽजाजवनिकां॥५७॥

सर्वेन्द्रियो ब्रह्मा

ब्रह्मा निश्चलो भूतः अथ दृष्टांतः पूर्दैवी पुजाधिष्ठात्री काचिद्देवता तस्या अंतिस मीपे पुत्रिका स्वतुमुरवी कनकप्रतिमेव ५६ एवं मोहमनु मुज्जहारेत्याह इतीति ईरोशे इरा सरस्वती तस्या ईशे ब्रह्मणि किमिदमिति मुह्यति पश्चाद्दृष्टुमप्यनीशे सति परमोऽजः श्रीकृष्णः सपदि अजाजवनिकां मायारूपां तिरस्करणीयां यया कृतं दर्शितं तच्छादितिरोधत्त अपसारितवानित्यर्थः अथवा अयं कोऽभिमानी न मे अयं दृष्टु अयोग्य इति तस्योपरि मायां प्रसारितवानिति कमुह्यतिसति अतर्क्ये तर्कागोचरे निजः असाधारणो महिमा यस्य तस्मिन्निति मोहहेतु- रुक्तः दर्शनायोग्यत्वापत्रीणि विशेषणानि स्वप्रमितिके स्वप्रकाशे च तत् सुखचतस्मिन्नतर एवाजातः प्रकृतेः परत्र परस्मिन्नत एवातन्निर

राम॰
४५

अर्वाक् बहिः प्रतिलब्धानि अक्षाणि येन सः परेतवन्मृत उत्थितः यद्वि कथंचित् ऐक्षत निरीक्षत तथा दृष्टी नेत्राणि ५८ जनानामाजीव्यैर्द्रुमाकी र्णां समाप्रियं संततानि आसमंतात् प्रियाणि यस्मिन् तत् ५९ तदाह यत्रेति नैसर्गा दुर्वैराः स्वाभाविकाः प्रतिकार्यौ वैरवंतोऽपि नराः सिंहादयश्च मित्राणीव यत्र सहैवासन् जितस्या वासेन द्रुताः पलायिता रुट्तर्षादयः क्रोधलोभादयो यस्मात्तथाभूतं वृंदावनमपश्यदिति ६० तथा च प रमेष्ठी ब्रह्मा पुराहर्व वदेव ब्रह्म अच ष्टत्र पश्यत् कथंभूतं पशुवंशशिशुत्वनाट्यमुद्वहन्नाट्यमित्यत्र हेतुः अद्वयमित्यादि अद्वयं च

ततोऽर्वाक् प्रतिलब्धाक्षः कः परेतवदुत्थितः कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ५८ सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरः स्थितं वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियं ५९ यत्र नैसर्गदुर्वैराः सहासन्नृ मृगादयः मित्राणीवाजितावासद्रुतरुट्तर्षकादिकं ६० तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं पर मनंतमगाधबोधं वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ६१ दृष्ट्वा त्वरे ण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवाभिपत्य स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं न त्वा मुदश्रुसुजलैरकृताभिषेकं ६२ उत्थायोत्थाय कृष्णस्य चिरस्य पदयोः पतन् आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा

वत्सान् विचिन्वन्तं अनंतं च परितो विचिन्वन्तं परं च शिशुत्वमुद्वहन्तं ब्रह्म च सपाणिकवलमिति नाट्यमेवोद्वहदित्यर्थः ६१ निज धोरणतः स्ववाहनाद्धंसाद्वेगेनावतीर्य दंडवन्नत्वा चतुर्णां मुकुटानां अग्रे रंघ्रियुग्मं स्पृष्ट्वा मुदाश्रुजलैरानंदाश्रुरूपैः सुजलैरभिषेकमकरोत्

भा·द·पू· सर्वे पशवः स कं पोतेर एव गर्ध्या अनुकरणमेतत् इत्यर्थः वा चारेडल श्लोक ६४। इति दशमे टीकायां १३ चतुर्दशे तु तद्दृष्ट्वा स्वीयं गतुद्ध
४६ निश्चयं अनीशः कर्तुमतो वीलुक्तं ब्रह्मा विमोहितः १ स्वकृतापराधेन भिया स कंपतया भगवन्महिमानमनवगाहमानो यथादृष्टमेव
कीर्तयन्नाह· नौमीति· हे ईड्य स्तुत्य ते तुभ्यं नमामीति द्वितीयार्थे चतुर्थी यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव प्रणौमीत्यर्थः अभ्रवपुर्यस्य त
स्मै तडिदंबरं यस्य गुंजाभिरवतंसो कर्णभूषणौ यस्य परिपिच्छं च बर्हापीडं तैर्लसन्मुखं यस्य तस्मै वन्याः स्रजो यस्य तस्मै कवलादिभि
र्लक्ष्मभिः श्रीः शोभा यस्य तस्मै मृदू पादौ यस्य तस्मै पशुपांगजायेति पशुपस्य गोमित्रः पशुपो नंदः पशुपांगाज्जातः पशुपांगजस्तस्मै १ ननु नौ

शनैरथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः कृतांजलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैडते
लया ६४ इति भा० द० बालक्रीडायां ब्रह्ममोहापनोदनं १३ ब्रह्मोवाच· नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरि
पिच्छलसन्मुखाय· वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय १ अस्यापि देव वपुषो मदनु
ग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोपि· नेशे महि त्ववसितुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः २

330 मीति प्रतिज्ञाय किं स्तवनवादमात्रं क्रियते अत आह· अस्यापीति· भो देव अस्यापि सुलभत्वेन प्रकाशितस्यापि तव वपुषः अवतारस्य महिमा
नं अवसितुं ज्ञातुं कोपि कः ब्रह्मा अहमपि न ईशे न शक्नोमि सुलभत्वायुक्तिमाह मदनुग्रहस्य ममानुग्रहो यस्मात्स्वेच्छामयस्य स्वीयानां
या यथेच्छा तथा भवतः तर्हि किमिति ज्ञातुं न शक्यसे अत आह न तु भूतमयस्य चित्यशुद्धसत्वात्मकस्य तदा तव केवलस्यात्मसुखानुभवमात्रस्याव
तारिणो गुणातीतस्य महिमानमंतरेण निरुद्धेनापि मनसा को वा ज्ञातुं समर्थो भवेत् अथवा भूतमयस्यापि तु विराड्रूपस्य तवत्वन्नियम्यस्य वपु टी·मः
षः महि अवसितुं कोनेशे तदा साक्षात्तवैवासाधारणस्य नियम्यनियंतृत्वभेदरहितस्य महिमानं अवसितुं कोपि नेश इति किमु तवक्तव्यमि· २ ४६
पि।

तर्हि अज्ञाः कथं संसारं तरेयुः तत्राह· ज्ञान इति· उदपास्य ईषदप्यकृत्वा सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयां वार्तां स्वस्थान
एव स्थिताः तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणप्राप्तां तनुवाङ्मनोभिर्नमंतः सत्कुर्वंतो ये जीवंति केवलं यद्यपि नान्यत्कुर्वंति
तैः प्रायशः त्रिलोक्यामन्यैरजितोपि त्वं जितः प्राप्तोसि किं ज्ञानश्रमेणेत्यर्थः ३ भक्तिं विना ज्ञानं नैव सिद्ध्यतीत्याह· श्रेयःसृतिमिति·
श्रेयसामभ्युदयापवर्गलक्षणानां सृतिः सरणं यस्याः सरसः स्रवनिर्झराणां तां तेन वनं भक्तिमुदस्य त्यक्त्वा श्रेयसां मार्गभूतामिति वा· तेषां क्ले

ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्तां स्थाने स्थिताः श्रुतिगतां तनु
वाङ्मनोभिर्ये प्रायशोऽजित जितोप्यसि तैस्त्रिलोक्यां ३ श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति
ये केवलबोधलब्धये ० तेषामसौ क्लेशल एव [illegible] शिष्यते
331 नान्यद्यथा स्थूलतुषावघातिनां ४ पुरेह भूमन्बहवोपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया· विबु
ध्य भक्त्यैव कथोपनीतया प्रपेदिरेंजोऽच्युत ते गतिं परां ५ ॥

॰ शं क्लेशः क्लेश एवावशिष्यते· अयं भावः यथा अल्पप्रमाणं धा
न्या १ न्यं परित्यज्य स्थूलधान्यानं तंकरणहीनास्थूलधांभासांस्तुषानवघ्नंति तेषां न किंचित्फलं एवं भक्तिं तुच्छीकृत्य ये केवलबोधाय प्र
यतंते तेषां नमतीति ४ भक्त्यैव ज्ञानं नान्यथेत्यत्र सदाचारं प्रमाणयति· पुरेति· हे भूमन्नीह पूर्वं योगिनोपि संतः यो ज्ञानमप्राप्य पश्चात्त्व
दर्पितेहाः त्वदर्पिता लौकिक्यपि ईहा चेष्टा ये स्ते निजकर्मलब्धया त्वदर्पितैर्निजकर्मभिर्लब्धया तया पिनाईहा च निजानिक
माणि चैनेलब्धया इत्येकं वा पदं कथोपनीतया कथया त्वत्समीपं प्रापितया भक्त्यैव विबुध्य ज्ञात्वा अंजः सुखेनैव तव परां गतिं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गुणात्मन गुणानामात्मनस्ते तव गुणान्विमातुं एतावंत इति गुणयितुं मपि के ईशिरे समर्था बभूवुः इत स्ताहि शेषवार्त्ता कथं
भूतस्य तव अस्य विश्वस्य हिताय पालनाय बहुधा बहुगुणाविष्कारेणावतीर्णस्य ननु कालेन निपुणैः किमशक्यम
त आह· कालेनेति· वा शब्दो विकल्पे सुकल्पैरति निपुणैर्बहु जन्मना कालेन भूपरिमाणं वा विमिताः विशेषेण गणिता भवेयुः
तथा खे मिहिका हिमकणा अपि तथा द्युभासः दिवि नक्षत्रादि किरणपरिमाणं वापि ७ तस्माद्भक्तिरेव संगच्छत इत्याह

गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः
खे मिहिका द्युभासः ७ तत्तेनुकंपां सुसमीक्ष्यमाणो भुंजान एवात्मकृतं विपाकं हृद्वाग्वपुर्भि-
र्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ८ पश्येश मेनार्य्यमनंत आद्ये परात्मनि
त्वय्यपि मायिमायिनि मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छ[illegible]मिवार्चिरग्नौ ९

तत्तेनुकंपामिति· सुसमीक्षमाणः कदा न विष्यतीति· बहुमन्यमानः स्वार्जितं कर्मफलमनाशक्तः सन्भुंजान एव ना तीव तप्ता
दिभिर्य एवं यो जीवेत स मुक्तौ दायभाग्भवति भक्तस्य जीवनमेव निरंकेण लयप्राप्तिवन्मुक्तौ नान्यदुपयुज्यत इति भावः ॥ ८॥ स्वा २
तदेवं स्तुत्वा भगवंतं क्षमापयितुं स्वापराधं निवेदयति· पश्येति· हे ईश मे अनार्य्यं दौजन्यं पश्य यदहं मायिनामपि मायिनि विमोहके त्वयि
स्वमायां प्रसार्य्यात्मैश्वर्यमीक्षितुमैच्छमभिलषितवान् अहो एवं कर्तुं त्वयि अहं कियान् किं विद्यथा महद्भूतान् ज्वालाग्नौ न किंचित् ॥ ९॥
अ १

भा·द·पू·
४७ एवं तावत्सगुणनिर्गुणयोरुभयोरपि ज्ञानं दुर्घटमिति त्वत्कथाश्रवणेनैव त्वत्प्राप्ति र्नान्यथेत्युक्तं इदानीं यद्यपि उभयोरपि विवेक-
णादुर्ज्ञेयत्वमुक्तं तथापि गुणातीतस्य ज्ञानं कथं भवेत· ननु सगुणस्य तव अचिंत्यानंतगुणत्वादिति श्लोकद्वयेनाह· तथापीति·
म हे भूमन् अपरिच्छिन्न अगुणस्य ते महिमा अमलैरंतरात्मभिः प्रत्याहृतैरिंद्रियैर्विबोद्धुं बोधगोचरीभवितुं अर्हति योग्यो भवति· अथ
वा विबोद्धुं ज्ञातुं अर्हति अर्हते शक्यते यद्वा महिमेति महिमानं कश्चिद्बोद्धुमर्हतीत्यर्थः कथं स्वानुभवादात्माकारांतःकरण
साक्षात्कारात् ननु चांतःकरणमपि सविकारमेव विषयीकरोति· इति कथमात्माकारतांतस्येति· अत आह· अविक्रि या
सा १

तथापि भूमन्महिमागुणस्य ते विबोद्धुमर्हत्यमलांतरात्मभिः
अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ६

दिति· विक्रियाविशेषाकारः तद्रहितात् विशेषपरित्यागे एव आत्माकारता इत्यर्थः ननु अंतःकरणसाक्षात्कारविषयत्वेनात्मप्रसंगः स्यादत
आह· अरूपत इति रूपं विषयः अविषयत्वाद् इति विषयत्वमेवात्मनो न फलविषयमतो नायं दोष इति भावः कथं तर्हि स्फूर्तिः अनन्यबोध्या
त्मतया स्वप्रकाशत्वेनैव न त्वन्यथा इदं तदिति विषयत्वेनेत्यर्थः अथवा मा सर्वतो निरंगा लक्ष्मी रर्थ्यं गुणस्य ते महिमानं अमलैरंतरिति रामः
भिरिंद्रियैरपि तथा याहि अवस्तुतः तेन रूपेण विबोद्धुं किमर्हति ना इत्येवेत्यर्थः कथं तर्हि इति तदाह स्वानुभवादिति स्वानुभवादित्यादिना उक्तं ४७

भा॰द॰पू॰ ४८

रजोभुवः रजोजातस्याविजानत अत एव अजावलेपान्धतमोन्धचक्षुषो जगत्कर्त्ताहमिति मदेन ... तमोरूपेणान्धीभूतनेत्रस्यापि तव
त्वत्तः पृथगीशमानिनो अन्यत्र प्रभुत्वेन वर्त्तमानोपि नाथवान् मद्भृत्य एव एषोनुकंप्य इति मत्वा क्षमस्वेत्यर्थः १० ब्रह्माण्डविग्रहस्त्वमपि अस्त्व
एव चेत्तत्राह क्वाहमिति तमः प्रकृतिः महान् अहंकारः खं आकाशं चरो वायुः अग्निर्वार्जलं भूश्च प्रकृत्यादि पृथ्व्यन्तैर्वेष्टितः संवे
ष्टितो योण्डघटः स एव तस्मिन्वा स्वमानेन सप्त वितस्तिकायो यस्य सोहं क्व चते महित्वं कथंभूतस्य ईदृग्विधानि यान्यविगणितानि

अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः अजावलेपान्धतमोन्धचक्षुष एषोनुकंप्यो मयि नाथवानिति १० क्वाहं तमो महदहं खचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः क्वेदृग्विधाविगणिताण्डपराणुचर्य्यावाताध्वरोमविवरस्य च ते महित्वं ११ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनन्तः ॥ १२ ॥

निअण्डानि तएव परमाणवस्तेषां चर्य्यापरिभ्रमणं तदर्थं वाताध्वानो गवाक्षास्तद्वद्रोमविवराणि यस्य तस्य तव त्वयानुकंप्योहमि
ति ११ अपि च गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति लोके अस्तिनास्तिव्यपदेशाभ्यां वा नाचशब्दाभ्यां स्थू
लसूक्ष्मे कार्यकारणे शब्देर्वा भूषितं अभिहितं एतेषां शब्दानां भुवि विषये उषितं स्थितमिति वा सर्वं वस्तु इत्यर्थः हे अधोक्षज तव
कुक्षेर्बहिः किं यदपि किंचिन्मात्रमपि न किंचिदस्तीत्यर्थः अतः सर्वस्य त्वत्कुक्षिगतत्वेन ममापि त्वया मातृवदपराधः सो

रामः ४८

किंच विशेषतोपि त्वत्तो मम जन्म प्रसिद्धमित्याह जगत्त्रयेति जगत्त्रयस्यान्ते प्रलये य उदधीनां संप्लवः संश्लेषस्तस्मिन् उदे
उदके नारायणस्योदरे नाभिस्तस्य नालादजो विनिर्गत इति वाक् सा तावन्मृषा न भवति वै निश्चितं तथापि तु हे ईश्वर त्व
त्तः अहं किं न विनिर्गतः नोत्पन्नोस्मि अपि तु त्वत्त एवोत्पन्न इत्यर्थः १३ तर्हि नारायणस्य पुत्रस्य मम किं माययात आह ना
रायणस्त्वमिति नहीति काक्वा त्वमेव नारायण इत्यापादयति कुतोहं नारायण इति चेदत आह सर्वदेहिनामात्मासि एव
मपि किं नारायणो न भवसि नारं जीवसमूहो अयनमाश्रयो यस्य स तथेति त्वमेव सर्वदेहिनामात्मा वान्नारायण इति भावः

जगत्त्रयान्तोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् विनिर्गतोजस्त्विति वाङ्न वै मृषा किं त्वीश्वर त्वन्न विनिर्गतोस्मि १३ नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी नारायणोङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया १४ ॥

हे अधीश त्वं नारायणः पुनः काकुः अधीश प्रवर्त्तक ततश्च नारस्याय
नं प्रवृत्तिर्यस्मात्तथेति पुनस्त्वमेव असाविति किं च त्वमखिललोकसाक्षी अखिलं लोकं साक्षात्पश्यसि अतो नारमसे जानासीति त्व
मेव नारायणस्य ननु एवं नारायणशब्दव्युत्पत्तौ भवेदेवं तत्त्वन्यथा प्रसिद्धमित्याशंक्याह नारायणोङ्गमिति नराद्भूता ये र्थास्तथा नराज्जा
तेयज्जलं तदयनात् यो नारायणः प्रसिद्धः सोपि तवैवांगं मूर्तिस्तथा च स्मार्यते नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः तस्य तान्ययनं पूर्वं
तेन नारायणः स्मृत इति आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ननु मन्मूर्तेरपरिच्छे

४९

भा॰द॰पू॰ ४९

अपरिच्छेदमेवोपपादयति तच्चेदिति · जगदाश्रयभूतं तव वपुः जलस्थमित्येवं यदि सत्यं स्यात् तर्हि तदेव कमलनालमार्गेण [illegible]
श्यसंवत्सरशतं विचिन्वतापि मया हे भगवन्नन्तर्येऽप्यन्ते तत्र किमिति न दृष्टं अपि किमिति नो व्यदर्शि न दृष्टं तदेव तपः करणा
नन्तरं सपद्येव सुदृष्टं अतो मायैव अतस्त्वन्मूर्तेर्देशविशेषपरिच्छेदः सत्यो न भवतीत्यर्थः १५ अपि च बहिर्जलादिप्रपंचः सत्यः स्यात्तर्हि
तेन तव कुक्षौ दृष्टो भवेन्नतु मायाविलसितं त्वयैव दर्शितमित्याह · श्लोकत्रयेण · हे मायाधमन मायोपशमन अत्रैवावतारे बहिः स्फुटस्यापि ज

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव · किं वा सुदृष्टं हृदि मे तदैव किं नो सपद्येव पुनर्व्यदर्शि १५ अत्रैव मायाध
मनावतारे ह्यस्य प्रपंचस्य बहिः स्फुटस्य · कृत्स्नस्य चान्तर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते · १६ यस्य कुक्षाविदं सर्वं सात्मं
भाति यथा तथा · तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना १७ अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितम् एकोऽसि प्रथमं
ततो व्रजसुहृद्वत्साः समस्ता अपि · तावन्तोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावन्त्येव जगन्त्यभूस्तदमितं ब्रह्माद्वयं शि

तस्य मध्ये जनन्याः प्रदर्शनेन १६ ननु बहिः सत एवान्तर्जठरे प्रतिबिंबो नतु कुतः सर्वस्य मायात्वमत आह · यस्येति · यस्य तव कुक्षौ सर्वमिदं यथा भाति तत्स
र्वं तथापि बहिरपि तथैव भाति किं च सात्मं वत्ससहितं तदिदं त्वयि मायया विना किं घटते अयं भावः त्वयि प्रतिबिंबस्य दृष्टत्वादि विलोमतया प्रतीय
मानत्वात् तदस्ति न वत्सादर्शस्थानीयस्य त्वयि प्रतीतिनिरस्यार्थतः सर्वथा मिथ्यात्वमेवेति १७ अपि च न केवलं जनन्या ममापि तथैव दर्शितमित्या
ह · अद्यैवेति · त्वदृते त्वां विना अस्य विश्वस्य मायात्वं त्वया न मे मम तदद्यैव किं नादर्शितं किंतु दर्शितमेवेत्यर्थः यत आह एकोऽसीत्यादि तत्र तत्र मया
सह अखिलैस्तत्त्वादिभिरुपासितास्तावन्तश्चतुर्भुजा असि जगन्ति ब्रह्मांडादीनि · इति प्रागनुक्रममिति ज्ञातव्यम् ॥१८॥ श्रीरामाय नमः ॥ रामः ४९

५८

ननु त्वस्मिन् तव मया दर्शितं शुद्धमेव चैतन्यं कथं प्रपंचवन्माया इत्युच्यते सत्यं किंतु अद्वितीयस्य त्वयि नानात्वं गुणावतारमत्स्याद्यवतारेष्विव का
र्यवशेन स्वतंत्रमायानिबंधनमित्याह · श्लोकद्वयेन · अजानतामिति · त्वत्पदवीं तव स्वरूपं अजानतां मे अनात्मनि प्रपंचे स्थितः आत्मैव त्वं आ
त्मनैव स्वातंत्र्येण मायां वितत्य भासि कथं जगतां स्रष्टा अहमिव ब्रह्मेव विधाने पालने च एष त्वमिव चान्ते त्रिनेत्र इवेति १९।२०। ननु स्वातंत्र्ये
कथं ऋषिषु मत्स्यादिषु जन्म कथं वा मनाद्यवतारे यज्ञादिकार्पण्यं कथं वा अस्मिन्नेव भयपालनो येदि अत आह · को वेत्तीति ·

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायां · सृष्टाविवाहं जगतो विधान इव त्वमेषो
ऽन्त इव त्रिनेत्रः १९ सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादःस्वपि तेऽजनस्य · जन्मासतां दुर्मदनिग्रहाय
प्रभो विधातः सदनुग्रहाय च २० को वेत्ति भूमन्नहि मा गुणस्य ते योगेश्वरोतीर्भवतस्त्रिलोक्यां · क्व
वा कथं वा कति वा कदेति विस्तारयन्क्रीडसि योगमायां २१ तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्त
धिषणं पुरुदुःखदुःखं · त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत्सदिवावभाति ॥२२॥ अन्वयैः संबो
धनैर्दुर्ज्ञेयत्वमेवाह · भूमन्नित्यादिभिः भवतः ऊतीर्लीलाः को वेत्ति त्रिलोक्यां · क्व वा कथं वा कदा वा कति वेति · अचिंत्यमेवम् एवं योगमायावैभवमि
तिभावः २१ ननु भवदवताराणामचिंत्यो महिमास्तु प्रपंचस्य तु सत्त्वे कथं सत्त्वप्रतीतिरितीमामाशंकां सपरिकरमुपसंहरन् परिहरति · तस्मादिति · अ
सद्धिषणं निरस्तप्रतिभासं त्वय्येवोद्यत उद्भवदपि यन्नश्यत् सदिवेति उपलक्षणमेतत् नित्यमिव सुखमिव चेतनमिव चाधिष्ठानभूतस्य तव गुणेन

भा·द·पु· ५०

त्वमेव तु सत्य इत्याह एकस्त्वं सत्यः आत्मा दृश्यमसत्यं देहेन चात्मा दृश्योतः सत्यः किं च यद्विकारवत्तदसत्यं न च त्वयि जन्मादयो विकाराः संतीत्याह आद्यः कारणं अतो न जन्मादयः आद्यत्वे तु पुराणः पुरातनोपि नवः काल्यात्पूर्वमपि वर्त्तमान इत्यर्थः अत्र हेतुः पुरुष इति तथा च श्रुतिः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति जन्मानंतरास्तित्वलक्षणं विकारं वारयति नित्य इति सनातन इत्यर्थः एभिः अजस्रसुखः अक्षरः अमृत इति चतुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति एतत्सर्वे हेतुः अनंतो ह्यय इति देशा कालपरिच्छेदरहितः वस्तुपरिच्छेदरहितोपि अमृतत्वोपपादनाय चतुर्विधक्रियाफलत्वं वारयति स्वयंज्योतिः निरंजनः उपाधितो मु

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः नित्योक्षरोजस्रसुखो निरंजनः पूर्णोद्वयो
मुक्त उपाधितोमृतः॥२३॥ एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते गु
र्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरंतीव भवानृताम्बुधिं ॥२४॥

ऊ इति पदत्रयेणायं भावः तत्रोक्तान्निरा
द्य इत्यनेनैव निराकृता प्राप्तिरपि क्रियया ज्ञानेन वा भवेत् क्रियया प्राप्तिरात्मपदेनैव निराकृता ज्ञानतः प्राप्तिं वारयति स्वयंज्यो
श्रीहि·२ तिरिति विकृतिरपि तु वा पाकरणेनाव घातेन ...णामिव उपाध्यपाकरणेन भवेत् तन्नासंगत्वात् न संभवतीत्याह मुक्त उ
पाधित इति संस्कारोपि किमिति शयाधानेन मलापाकरणेन वा ...नत्रातिशयाधानं पूर्णत्वेनैव निराकृतम् मलापाक
रणं वारयति निरंजन इति निर्मल इत्यर्थः॥२३॥ तस्मादेवंभूतज्ञानान्मुच्यंत इत्याह एवं ...विधमिति त्वां ये विचक्षते सम्यक् प
श्यंति कथमात्मात्मतया आत्मप्रत्यक्तस्य स्वरूपत्वेन चेत् सुतादिविवेगोणामित्याह सकलात्मनामपि स्वात्मानं केन गुरुरेवार्कस्तस्माल्लब्धा उप रामः ५०

338

भा·द·पु· २२

नन्वं चतीत्यत्र गौतिवेप कंपोयेषुतेस्कंधप्रवालविटपाष्ट्ययोस्तो २७ ककुभः प्रतिसर्वतः स्फुरंतीत्यर्थः यद्वा दिशः प्रकाशयंता
त्यर्थः कुजयोर्हत्वयोः स्थितो ग्रियेया मूर्तिमानुपेतितयोपेत्य विरजसो निर्मदो २८ गोपालबालं मायुर्वं देवांकि मितिपराणावि
ति चेत्तत्राहतुः हे कृष्ण कृष्ण महायोगिन् अचिंत्यप्रभावस्त्वं न बालः किंतु पुरः पुरुषः यत आद्यः कारणभूतस्तत्राविनिमित्तमात्रं
किंतु उपादानमपित्वमेवेत्याशयेनविदुस्तत्रदुः व्यक्ताव्यक्तमिति स्थूलसूक्ष्मविश्वरूपं २९ नियंतापित्वमेवेत्यूचतुः त्वमेकईत

कालेन निःकर्षयता व्रजकृतेन यदा मोदरेणांतरसोत्कलिताङ्घ्रिवंधौ निःपेततुः परमविक्रमितातिवेपस्कंध
प्रवालविटपौ कृतचंडशब्दौ २७ तत्र श्रियापरमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः कृष्णं प्र
णम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म २८ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः
पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः २९ त्वमेकः सर्वभूतानां देहः स्वात्मेंद्रियेश्वरः ३०
त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी त्वमेव पुरुषो
ध्यक्षः सर्वक्षेत्रविकारवित् ३१

देहः असवः प्राणाः आत्मा अहंकारः इंद्रियाणि चैतेषामीश्वरः ३० नन्वस्य कालो निमित्तं प्रकृतिरुपादानं प्रव
त्रा तेजोनोमहत्वविष्णात्मतया परिणामते पुरुषकर्त्ता नियंता वकिमर्हं अत आहतुः त्वमेव काल इत्यादिना सार्द्धेनयंतो
भगवानीश्वरो विष्णुस्त्वं अतः कालो नाम तव लीला प्रकृतिः शक्तिः पुरुषोंशः महाकार्यः अतस्त्वमेव सर्वमित्यर्थः। ३१ रामः २२

339

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंति हिंसापि विनि
वर्त्तते १६

किंच दारिद्र्यं मोहमपि साधयतीत्याह द्वाभ्यां कचतुष्टयेन निरहंस्तंभो निर्गतोऽहंकाररूपस्तंभो यस्मात् १५।१६ युज्यंते स्वजन एव सं
गच्छंते तर्षं तु लसां १७ ननु साधूनामपि धनिक एव प्रियः स्यान्न दरिद्र इति तत्राह साधूनामिति धनेन स्तंभो गर्वो येषां तैः १८ तमो
मदं मत्तानहं तं १९ तमः प्लुतौ तमोव्याप्तौ २० आपति अतो हेतद् इति अनुगृह्णामि स्यातां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात् २१ स्व

दरिद्रस्यैव युज्यंते साधवः समदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आराद्विशुद्ध्यति १७ साधूनां समचित्तानां 340
मुकुंदचरणैषिणां उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः १८ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः
तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः १९ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ न विवाससमा
त्मानं विजानीतः सुदुर्मदौ २० अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रापि मद
नुग्रहात् २१ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः २२
शुक उवाच एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ २३ ऋषेर्भा
गवतमुख्यस्य सत्यं कर्तुं वचो हरिः जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ २४ देवर्षिर्मे प्रियतमो यदिमौ ध
नदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना २५ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ।
आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २६॥ १ लोकतां देवत्वं पुनर्लब्ध्वा मदनुग्रहात् लब्धभक्ती भविष्यत इति २२।२३ प्रस्तु
तमाह ऋषेरिति २४ किमिति सत्यं कर्तव्यं तत्राह देवर्षिरिति यद्गीतस्तत्ततः २५ यमयोः यमलयोः सहजातयोः आत्मनः कृष्णस्य तन्मध्यप्रवेशमात्रे

द॰
भा॰ टी॰
३२

जो व्याप्तिया निषयाः स्तुवतः सेव्यमानस्य पुंसः श्रीमदाद्यो भिजात्यादिर्जनितो मदोऽन्यो वा रजोगुणः रजःकार्यं दानसहवेदि पान
हितया बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किं तु श्रीमदस्यैव किं तदाह यत्रेत्यादिभिः स्त्रिभिः यत्र श्रीमदे स्त्र्यं नश्वरं देहमजरामृत्यु
अजरश्चासौ अमृत्युश्च यथा तथा मन्यमानैः नरदेवभूदेवसंज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितं मन्यदा

नारद उवाच न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ८ ह 341
न्यंते पशवो यत्र निर्दयैरजितात्मभिः मन्यमानैरिमं देहमजरामृत्यु नश्वरं ९ देवसंज्ञितमप्यंते कृमिवि
ड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः १० देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा मातुः पि
तुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं को विद्वानात्मसात्कृत्वा हंति
जंतूनृतेऽसतः १२ असतः श्रीमदांधस्य दारिद्र्यं परमांजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३
यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४॥ १ कृमिसंज्ञितं तन्निरर्थं
यो भूतध्रुक् द्रोग्धा पापेनात्मद्रोहान्निरयो भवति सोऽकिं स्वार्थं वेद न वेदेत्यर्थः १० निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकारणे ११
अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययो यस्य आत्मसात् कृत्वा आत्मेति मत्वा असतो मूढादृते १२ एवं श्रीमदविचेष्टितमुक्त्वा राम
तत्प्रतीकारं निश्चिनोति असत इति परं श्रेष्ठं दारिद्र्यमेव केवलमिति वा कुत इत्यत आह आत्मौपम्येनेति ततो न द्रुह्यतीति भावः १३ सद्दृष्टा ३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्ते वेदस्याप्यन्यमोचकत्वं वक्तुमाह कृष्णस्त्विति २२।२३ इति दशमे टीकायां ९ दशमे पातयद्विंगलं तरायमलार्जुनौ तत्रत्याभ्यां च देवाभ्यां कृष्णः स्तुतिर् ईर्यते १ यद्धि गर्हितं कर्म येन वा देवर्षेर्भगवतोत्तमस्यापि तमः क्रोधस्तदेतत्कथ्यतामिति १।२।३ गंगायामे

कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ २२ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ २३ इति भागवते दशमे गोपीप्रसादो ना ९
म ९ राजोवाच कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः १ शुक उवाच
रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ २ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ३ अंतः प्रविश्य गंगायामंभोजवनराजिनि चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ५ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ७

तन्मध्ये कथंभूते अंभोजानां वनानि येषां राजयस्ताः विद्यंते यस्मिन् ४ अपश्यत दृष्ट्वा च क्षीबाणौ मत्तौ समबुध्यत ५ कृत इत्यत आह दृष्ट्वेति अनुग्रहस्य मदनाशः अर्थः श्रीकृष्णदर्शनं तदर्थमिदं वक्ष्यमाणं न हन्यत इत्यादि ॥ ७ ॥ श्रीगोपालो जयतितरां ॥

भा॰ पु॰ नमत्यलिंगमधोक्षजं आत्मजं मत्वा बबंधेति द्व्यंगुलोनं द्वाभ्यां अंगुलीभ्यां अपूर्णं १५।१६ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्म
३१ यमाप १७ न चैवं स्वातंत्र्यभंग इत्याह एवं संदर्शितेति सेश्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः १९ मत्प्रसादमन्येपि भक्त्या लभं ते इदं त्वतिविचित्रमिति सरोमांचितमाह नेममिति विरिंच्यः पुत्रो भवः स्वात्मापि श्रीर्जायापि २० फलितमाह नायमिति देहिनां देहाभिमानिनां

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा १४ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः द्व्यंगुलोनमभूत्तेन संदधेऽन्यच्च गोपिका १५ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं १६ एवं स्वगेहदामानि यशोदा संदधत्यपि गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् १७ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने १८ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे १९ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् २० नायं सुखापो भगवान्देहिनां गोपिकासुतः ज्ञानिनां चात्मभूतानां यथा भक्तिम

प्रसादीनां ज्ञानिनां निरस्ताभिमानिनामपीति आत्मपोतानामात्मैव पोतस्तरणसाधनं यथा भक्तानां सु१ तामिह २१
खापो यशोदायाः कृष्णबंधने प्रतिज्ञा अयं मया बंधनीय एवेति कृष्णस्य स्वबंधनिवृत्तौ प्रतिज्ञा एवं बद्धा एडा नगेन र ज्यापि किं मां बद्धुं शक्नोति तत्र कृष्ण इति विचार्याह कृपया भक्तानां स्वतंत्र इति तद्विजयभक्तस्य कृत भ्रमादूरीकुर्वन् रामः
मम प्रतिज्ञा यातु स्वभक्तस्येति स्वबंधनं कृतवान् एवं गोपीप्रतिज्ञा कथं ज्ञाता तामाह स्विन्नगात्राया इति ॥ २१ ॥ श्रीः ३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४मृ

तपसा एकाग्रेणाईरितं तदा कारतां नीमिनत एव तत्समं योग्यं प्रवेष्टुं योगिनां मनोपि यं नापतं अथवा अन्वधावत् केवलं न तु आपयतोयोगिनां मनोपि प्रवेष्टुं न समर्थमिति ९ अन्वंचमाना एवं तत्सममनुगच्छंती वृहत्श्चलत्योः श्रोणयाभरेण आक्रांता सत्यागतिर्यस्याः सा विस्त्रंसितान्केशवंधाच्युतैः पुष्पैरनुगमनं यस्याः सा यद्वा जवेन कंपितात् केशवंधात् पुरः पतितानि प्रसूनानि अनुपश्चादुतिर्यस्याः सा पराँशद्दुलवतीयथा मत्यो वेरमहार्णवं निस्सृथ्यगत्या रिवन्ताप श्चादुपनिषन्मार्गमनुसरत्यो न्मानं प्राप्नोति तथा

तां मातरं क्षिप्रसमीस्य सत्वरस्ततो वरूत्थाप ससार भीतवत् गोप्यन्वधावन्नयमापयोगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ९ अन्वंचमाना जननी वृहच्चलच्छ्रोणी भराक्रांतगतिः सुमध्यमा जवेन विस्त्रंसितकेशवं धनच्युतप्रसूनानुगतिः परामृशत् १० कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना। उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ११ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा १२ न चांतर्न बहिर्यस्य न पूर्वं नापि चापरं पूर्वापरं वहिश्चांतः

निजसुतमाप १० किं कुर्वंतमंजनमषिणी अंजती सर्वतः प्रसरंती मषी ययोस्ते अक्षिणी स्वपाणिना कषंतं मर्दयंतं भिषयंती कुत्रस्य १२ अकोविदत्वमेवाहः भीषयंती भयमुत्पादयंती अवागुरत् अभर्त्सयत् ११६ वेष एव छत अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा १२ अकोविदत्वमेवाह नचांतरिति पंचभिः बंधनं वहिः परिहृतेन दाम्नांतरा वृतस्य भवति तथा पूर्वापरविभागवतो वस्तुनः पूर्वो दाम धृत्वा परितः परिवेष्टनेन भवति नत्वेतदस्तीत्याह न चांतरिति किंच व्यापकत्वेन व्याप्यस्य बंधो भवति नच विपरीतमित्याह पूर्वापरमिति किंचन

तर्जनतोयाजगद्ध: १३

अतिरिक्तस्य चाभावान्न बंध इत्याह जेमात इति ॥१३॥

मा·द·पू·
३०

तदाचागायतेतिच कारान्वयः २ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ३ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ५ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरं गतः ६ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ७ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचिस्थितं हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छ

तः रहः एकांते नवनीतमभक्षयत् ६ सुशृतं पक्वं दधिमंथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा दध्यमत्रकं ७ उलूखलांघ्रेः परि वर्तितं तस्योपरि शिचिशिक्ये चौर्येण विशंकितम् चंचलमीक्षणं यस्य तम् ॥ ८ ॥ श्री रामायनमः ॥ नेः ॥ ८ ॥

रामः
३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ययोः प्रसन्नो भवती सीतौ पितरौ अपि यन्नान्वविंदेतां न प्राप्नुवतां कृष्णस्योदारं महद्यशः सा यथा पुरा अर्भकेहितं बाललीलां यच्च कवयो गायं
२८| ति यद्यापि कथयंतं लोकशमलापहं श्रुतं कीर्तितं पठितं सत् लोकानां शमलं पापसमूहमपहरतीति तथाविधं स्वत्य समनुवर्त्तस किं
पुण्यं कृतवान्नंदो यशोदा वा ४८ ब्रह्मण आदेशं गोपालनादिलक्षणं ४९।५० स एवेह तिवाद् द्रोणो जज्ञे स च नंद इति ख्यातः सा च ध

346

पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं गायंत्यद्यापि कवयो यल्लोकशमलापहं ४७ शुक उवाच द्रोणो वसूनां प्रवरो धरया सह भार्यया करिष्यमाण आदेशं ब्रह्मणस्तमुवाच ह ४९ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ५० तस्यात्त्विति वरं दत्वा व्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ५१ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५२ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे भुवि सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५३ इति भागवते दशमे ८ शुक उवाच एकदा गृहदासीषु यशोदा नंदगेहिनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं

रायशोदाभवत् अस्त्वित्युक्तः ५१ गोपगोपीनामपि वस्तु स्वभावादस्त्येव भक्तिस्तयोः पुनर्नितरामासीत् ५२ स्वलीलया पुत्रभावा
नुकारिण्या ५३ इति हृश्शमेटीकायां ८ नवमे प्रथउत्सिक्ते गत्वा गोप्यप्यथ ततरहृतम् विलोकयभाण्डभङ्गादिकं स दाम्ना
बबंध हरिं नन्दस्त्रात्रे तेविश्वं दृष्ट्वा विस्मितचेतसः बंधनं द्व्यंगुलापूर्त्या पूर्णतामन्वदर्शयत् २। स्वयं दधि निर्ममन्थ॥ १॥ श्रीराम

भा.द.पू.
२८

चरमं प्रश्नमाश्रित्य प्रथमपीश्वर इति निश्चित्याह अथो इति चेतः चित्तं चिन्तादिभिः न वितर्कगोचरं जगद्यदा श्रयेदधिष्ठानं येन करणेनाधिष्ठा
यते बुद्धित्वन्नियुक्तान्निदमवितर्क्यं भवतु तत्पदं कीदृशं तत्राह सुदुर्विभाव्यमिदमचिंत्यमित्यर्थः ४२ एवं प्रपंचप्रतीत्योन्नीतत
त्वं पुनर्जीवसंसृतिहेतुमायाश्रयत्वेनोन्नयंत्याह अहमिति यशोदानान्यहं मे सो मम पतिः अमुरव्य व्रजेश्वरस्याखिलवित्तपासती अखि

347

अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतोस्मि तत्पदं ४२ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ४३ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ४४ सद्योनष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथापुरा ४५ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४६ राजोवाच नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४७॥

१ त्वविताधिष्ठात्री अहं स
तीजया एषः कृष्णो मे सुतः गोप्यादयश्च मदीया इतीत्थं कुमतिर्यन्मायया स एव मे शरणमिति ४३ वैष्णवीं स्वीयां ४४ आरोहमुत्सं
गं प्रवृद्धस्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरेवासीत् ४५ मायावलोद्रेकमाह त्रय्येति त्रय्या इंद्रादिरूपेण उपनिषद्भिर्ब्रह्मेति सांख्यैः पुरु
ष इति योगैः परमात्मेति सात्वतैर्भगवानिति उपगीयमानमाहात्म्यं यस्य तं ४६ अतिविस्मयेन पृच्छति नंद इति महोदयः महानुदय उद्भवो यस्य तत् ४७

राम
२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३८

तत्रं तस्मि न्सुखे विश्वं ददृशे ददर्श तत्प्रपंचयति जगज्जंगमं स्थावरं खमंतरिक्षं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रादिसहितं भूर्लोकं वायुः प्रवाहः अग्निर्वैद्युतः इंदुश्चतारकाश्च तत्सहितं ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवान् तानि वैकारिकशब्देन गृहीतमपि देवैर्वेलक्षण्यात्पुनरुक्तं इंद्रियाणि चैतेजसानि मात्रा स्तामसाः शब्दादयः ॥ ३९ एवमेतद्विचित्रं विश्वं सह देवैर्वीक्ष्य चित्रता माह जीवश्च गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारः आशयश्च एते लिंगानां चराचरशरीराणां भेदो यस्मिन्त्रव्रजं च सहात्मानं स्वसहितं वीक्ष्य सूनोस्तनौ अल्पविदारिता

सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नींदुतारकं ३८ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च वैकारिकाणींद्रियाणि मनो मात्रा गुणास्त्रयः ३९ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ४० किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४१ ॥

स्ये शंकामवाप ४० तामाह किं स्वप्न इति परितो विलोक्य विकल्प्याह नायं स्वप्नः तर्हि किं वासुदेवस्य हरेर्माया तथा चेत्किमन्येन पश्यंति तर्हि मदीय एव कश्चिद्बुद्धिभेदो विपर्यासो दर्पणाभुखवत् एवं तर्हि कृत्स्नोपि कथं अतः प्रतीयते अमर्व हि स्वैकरूपेण कथं जगत् प्रतीयते तथा सति बिंबप्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति अथो इति अथवा ममास्य अर्भकस्यापि ततो यः कश्चन अचिंत्यात्मयोगः स्वीय ऐश्वर्यमौत्पत्तिकः स्वाभाविकः ॥ ४१ ॥ श्रीरामो जयतितरां

भा॰द॰पू॰ रेरे चौरेति आक्रुष्टः सन्धार्ष्ट्यानि प्रगल्भ्यानि उशति जल्पति त्वमेव चौरः अहं तु स्वामीत्यादीनि यद्वा उशति कमनीये भाग्ये
२८ वे यद्वा उशति वास्तौ स्वर्चिते गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते एवं स्तेयोपायैर्विरचितकृति कर्म येन स सत्त्वत्समीपे सुनीकः सा
धुरिवास्ते सभयेन येन यस्मिंस्तन्न श्रीयुक्तं मुखं तदालोकिनीभिर्व्याख्यातार्था प्रख्यापितकर्मफला उपालब्धुं अस्तं नैच्छत्
३२ कदाचिदपराधांतरे उपालभतत दातु महदाश्चर्यमभूदिति कथयन्नाह एकदेति उपालभ्य निर्भर्त्स्य भयेन संभ्रांते प्रेक्षणे

एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ३२ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ३३ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ३४ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः वदंति तावका ह्येते कुमारास्तेग्रजोप्ययं ३५ नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ३६ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान्हरिः व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३७

हितैषिणी यस्य तं ३३ अदांतात्मन् चपलगात्र रहः एकांते ३४ नाहं भक्षितवानिति नहि वा स्वंमयाकिं विद्वस्येत मत्कुक्षावादावेवमस्तीति भावः समक्षं प्रत्यक्षं ३५ व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान् ३७ श्यामसिन्धु श्रीरामाय नमो नमः श्रीगोपालो जयतितराम् राम २८

२७।२८। हस्त चाल्यचौर्याणीसहैवाखिलसखानः प्रजल्पंत्यः समागत्य गोप्यो गोपैर्मुदं ययुः १ असमये प्रदोहकाले क्रोशतर्हि संजात हासः स्तेयं चौर्यार्जितं न तु दत्तं तत्रापि स्वादु नेतरत् दधिपयो त्ति किंच भोक्ष्यन् मर्कटान् प्रति विभज्य ददाति तेषां मध्ये तत्र प्रत्येकेनापि ना त्ति चेत्तर्हि तु भांडं भिनत्ति क्वचिद्द्रव्यस्यालाभे सति सगृहान्स्त्यामीत्येवं कुपितो याति यद्वा सगृहाग्रहिणस्तेभ्यः कुपितः तोकां

350

कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २७ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २८ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौ मारचापलं शृण्वंत्याः किल तन्मातुरिति होचुः समागताः २९ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहा
न सः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः। मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्या लाभे सगृहकुपितो यात्युपक्रोश्य तोकान् ३० हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छि द्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३१ ॥ तोकान् पर्यंकादिषु सुप्तान् उपक्रोश्य रोदयित्वा यातीति ३० कल्पितैस्ते ययोगैरित्युक्तं प्रपंचयति हस्ताग्राह्ये इति तुंगशिक्यस्थभांडेषु अंतर्निहितेषु ध्याद्दोवयुनं ज्ञानं यस्य सः छिद्रं रचयतीति हुर छिद्रं रचनादि विवध्वांतयुक्ते गृहे स्वांगमेवार्थप्रदीपं रचयति विशेषतो धृतमणिगणं यर्हि यस्मिन्काले गोप्यो गृहकृत्येषु सु

भा·द·१· वालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः परमानंदमाधत्त व्रजे नंदयशोदयोः १ तत्र सर्गात्मे बदर्शयन्नाह कालेनेति २२ अनु कृष्य पुनःपुनरा
२७ कृष्य सरीसृपंतौ अतिशयेन चलंतौ कथं घोषाः कटिपादभूषणानि किंकिण्यः तेषां प्रघोषेण रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टमनो ययोस्तौ लोकं ततस्ततो गच्छंतमनुसृत्य जितुराणि पदान्यनुगम्य मुग्धवत्प्रभीतवन्मात्रोरंति समीपे उपेयतुर्जग्मतुः २३ तदा च तन्मातरौ

351

कालेन व्रजताल्पेन गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः २२ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः
२३ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म मुखं नि रीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदं २४ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृही तपुच्छैः वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः २५ शृंग्यग्निदंष्ट्र्यसिज लद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि तत्र न तज्जनन्यौ शेकात आपतुरलं

निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः कथंभूते घृणया स्नुवंत्यौ पयः पूर्णपयोधरे सत्यौ पंकेनांगरागेण रुचिरौ कथंभूतं मुखं निरीक्ष्य मुग्धं मंदस्मितं यस्मिन् अल्पदशनाश्च यस्मिन् तत् २४ यर्हि अंगनानां दर्शनीयाः कुमारलीला ययोस्तौ तथाभूतौ जातौ तदा तदंतर्व्रजे व्रजस्य मध्ये तत्र दबलाः व्रजांगनास्तौ प्रेक्षंत्यः प्रेक्ष्यमाणाः विस्मृतगृहकृत्याः हसंत्यो जहृषुर्हृष्टा बभूवुः कथंभूतौ ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरि तस्ततोऽनुकृष्यमाणौ २५ तौ शृंग्यादिभ्यो निषेद्धुं रक्षितुं चिंतानिमग्ना गृहकर्तुं यत्र यदा तज्जनन्यौ न शेकाते तदाऽलं मनसोऽनवस्थामवापतुरिति राम २७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यदूनामपृथग्भावात्कुतश्चिद्धेतोर्विप्रतिपद्यमानानांयदूनामपृथग्भावान्भावोभावनंतेनस्वादन्योन्यशिक्षयासर्वैकमतिकरणादित्यर्थः सम्य
क्कर्षयतिएकीकरोतिसंकर्षणमप्युशंतिमन्यंतेनवक्ष्यंतीत्यर्थः गर्भसंकर्षणंतुनप्रकाशयति १३।१४ अस्यतवपुत्रस्यातःश्रीकृष्णइतिर
कंनाममविष्यतिप्रागयमितिसामान्योक्त्याऋषिरयंजन्मांतरगतंनामकथयतिनंदोमन्यतेस्म अतएववासुदेवइतिसंप्रचक्षते १५ गुणा 352

यदूनामपृथग्भावात्संकर्षणमुशंत्युत॥१३ आसन्वर्णास्त्रयोह्यस्यगृह्णतोनुयुगंतनूः शुक्लोरक्तस्त
थापीतइदानींकृष्णतांगतः १४ प्रागयंवसुदेवस्यजातःखलुतवात्मजः वासुदेवइतिश्रीमानभिज्ञाः
संप्रचक्षते १५ बहूनिसंतिनामानिरूपाणिचसुतस्यते गुणकर्मानुरूपाणितान्यहंवेदनोजनाः १६
एषवःश्रेयआधास्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १७ पुरानेनव्रजपते
साधवोदस्युपीडिताः अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः १८ यएतस्मिन्महाभागाःप्रीतिंकुर्वं
तिमानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः १९ तस्मान्नंदात्मजोयंतेनारायणसमोगुणैः श्रिया
कीर्त्यानुभावेनगोपायस्वसमाहितः २० इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते नंदःप्रमुदितोमेनेआ

नुरूपत्वादीश्वरःसर्वैसर्वज्ञइत्यादीनिकर्मानुरूपाणिगोपतिर्गोवर्द्धनोद्धरणइत्यादीनिसर्वाण्यहमपिनोवेदजनाअपिनोविदुरिति १६ जातक
फलमाह एषइति आधास्यत्आधास्यति १७ अनेनरक्ष्यमाणाःसमेधिताश्चदस्यूञ्जिग्युरिति १८।१९।२० इतिचात्मानंसमादिश्यप्रात्मानं

विवक्षितमाह त्वंहीतिदेवस्तोमंत्रविज्ञत्वंअतोनामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः नन्वेतद्गुरुणाकरणीयंतत्राह नृणामिति ६ अस्तुस्ताहिंनं
नंदप्रतियुक्तमेतत्कार्यमित्यभिप्रायेणप्रत्याचक्षाणइवाह यदूनामिति भवतुतथापितवमत्रागतइतिकोविंद्यादितिचेत्तत्राह ख्यातश्चेतितत्तःकिं
मतआह सुतमिति कंसोमन्यतेमन्येतकल्पयेदित्यर्थः ७ ननुयदुकुमारइतिकथंचिज्ज्ञानातुतत्रवसुदेवस्यपुत्रस्तत्रापिदेवक्यांजातइति
कुतोजानीयात्तत्राह पापमतिरित्यादि किंमयाहतयामंदेति कन्यावचःश्रुत्वादेवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिचनित्यंसंचिं 353

त्वंहिब्रह्मविदांश्रेष्ठःसंस्कारान्कर्तुमर्हसि बालयोरनयोर्नॄणांजन्मनाब्राह्मणोगुरुः ६ गर्गउवाच यदूना
महमाचार्यःख्यातश्चभुविसर्वदा सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतं ७ कंसःपापमतिःसख्यंतववानेक
दुंदुभेः देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिसंचिंतयन्श्रुत्वादेवकीदारिकावचः अपिहंतागताशंक वि
स्तर्हितन्नोनयोभवेत् ९ नंदउवाच अलक्षितोस्मिन्रहसिमामकैरपिव्रजे कुरुद्विजातिसंस्कारंस्वस्तिवा गो
चपूर्वकं १० शुकउवाच एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवच चकारनामकरणंगूढोरहसिबालयोः ११ अ
यंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः आख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः १२॥

नित्यावायुवयोरसख्यंसंचिंतयन्वसुदेवोमेभवेदितिसंभाव्यमत्संस्कारलिंगेनचागताशंकः ॥९ तयन्सामान्येनकश्चिदलक्षि
निष्यतितर्हितदानींनदाननयःस्यादिति ९ द्विजातिसंस्कारंद्विजातीनामवश्यंकर्तव्यंसंस्कारमात्रंकेवलंस्वस्तिवाचनपूर्वकंकुर्विति १०।११।१२॥ आगताआशंकायस्यासौ अपियदिहंताह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नगान्गिरीन् तद्दुहितॄन्नदीः ३५।३६ इतिदशमेटीकायां ७ अष्टमेनामकर्मास्यबालक्रीडाकुतूहले मृद्भक्षणाभियोगे चविश्वरूपंनिरूप्य
ते १ विश्वरूपादिबालस्यनिशाम्याशंकितःपिता नामकृद्गर्गवाक्येननिर्जितत्वमसूसुचत् २।१।२।३ पूर्णस्याप्तकामस्यधनिनोगृहमागतस्तत्राह।
त महद्विचलनमिति महतः स्वाश्रमात्स्वतपोवनादन्यत्रविचलनं स्वार्थं किंतु गृहीणां मंगलायन नु तर्हि त एवं महद्दर्शनार्थं किमिति नगच्छं

खंरोदसीज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च द्वीपान्नगांस्तद्दुहितॄर्वनानिभूतानियानिस्थिरजंगमानि
३७ सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ३८ इतिभागव
त् २२ रजसा चोदिता मेघा वर्षंत्यंबूनि सर्वतः प्रजास्तैरेव सिध्यंति महेंद्रः किं करिष्यति २३ न नः पुरो जनप
दा न ग्रामा न गृहा वयं वनौकसस्तात नित्यं वनशैलनिवासिनः २४ ॥ १ कृषीति कृषिवाणिज्यसहिता गोरक्षा ए

वं त्र्यं कुसीदं वृद्धिजीवनं चतुर्थं २१ ननु गवामपि वृत्तिर्महेंद्राधीनैवेत्याशंक्य निरीश्वरसांख्यमताश्रयेण निराकरोति सत्व
मिति श्लोकद्वयेन अन्योन्यं पुरुषस्त्रीयोगेन २२ सर्वत इति समुद्रशिलोखरादिष्वपि वृष्टिदर्शनान्न प्रेक्षापूर्वकत्वं वृष्टेः
रिति भावः तैरेव मेघैरेव सिध्यंति जीवंति २३ तथापि योगक्षेमार्थं देवतापेक्षेति चेदत आह नेति पत्तनानि जनपदा देशाः अस्माकं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
८२

ब्राह्मणानपि संगृह्णन्नियमयति तस्माद्गवादिद्रव्यसमेतोक्तितयागप्रयोगकल्पनामाह यदिंद्रमखसंभारा इति सार्द्धैः पंचभिः सं
भाराः साधनानि २५ सूपं मौद्गं पायसं केवले पयसि पक्वं संयावादयो गोधूमादिविक्रियाः क्रमश्च सूपपायसयोः शु

४२६

तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः यइंद्रमखसंभारास्तैरयं साध्यतां मखः २५ पच्यंतां वि
विधाः पाकाः सूपांताः पायसादयः संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यतां २६ हूयंतामग्नयः सम्य
ग्ब्राह्मणैर्ब्रह्मवादिभिः अन्नं बहुविधं तेभ्यो देयं वो धेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचांडालपतितेभ्यो
यथार्हतः यवसं च गवां दत्वा गिरये दीयतां बलिः २८ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः सुवाससः प्रदक्षिणां
च कुरुत गोविप्रानलपर्वतान् २९ एतन्मम मतं तात क्रियतां यदि रोचते अयं गोब्राह्मणाद्रीणां मह्यं च दयि
तो मखः ३० शुक उ० कालात्मना भगवता शक्रदर्पजिघांसता प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्वचः ३१
सु तथा च व्यदधुः सर्वं यथाह मधुसूदनः वाचयित्वा स्वस्त्ययनमानर्चुर्गिरिमो द्विजान् ३२ उपहृत्य बलीन्सर्वा
नादृता यवसं गवां गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणं ३३॥ त्वात्यादेरस्यार्थतोन्येषां पंकतः ब्ध्याग शोभा

दीक्षादेस्त्यादनार्थं चाह हूयंतामिति धेनुदक्षिणाः धेनुसहिता दक्षिणाः वो युष्माभिः २७ यवसं तृणं २८।२९ सर्वाणि रामकृष्ण न मो
त्यनाह गोर्व्राह्मणाद्रीणामिति मह्यं च मम च ३०।३१।३२ तद्द्रव्येणतेन महेंद्रमखद्रव्येण गिरिद्विजान्प्रति यथायथं बलीन् २८ राम: ८२

अनडुद्युक्तानि आरुह्य द्विजाशिषः द्विजाशीर्भिः सहिताः ३४ गोपविश्रंभणं गोपानां विश्वासजननं रूपं गतः आत्मसन्नि
दिमुपहारं आददद्भक्षयत् ३५ तस्मा वा आत्मने आत्मना स्वयं व्रजजनैः सह नमश्चक्रे अहो इति सार्द्धश्लोकं पठन् ३६ कामरूपी सर्प
दिरूपो भूत्वा यद्द्वेषं मरणे हेतुमाय ३७।३८ कर्मैव बलं प्राकृतभावो गुणे ... कर्मांगं बातेन्द्रो वा महेशाः वार्ता वर्द्धी देवतेतीयमुक्ता

४२७

अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः ३४ कृष्णस्त्वन्य
तमं रूपं गोपविश्रंभणं गतः शैलोस्मीति ब्रुवन्भूरि बलिमादद्बृहद्वपुः ३५ तस्मै नमो व्रजजनैः सह चक्रे आत्मना
त्मने अहो पश्यत शैलोसौ रूपी नोनुग्रहं व्यधात् ३६ एषोवजानतो मर्त्यान्कामरूपी वनौकसः हंति ह्य
स्मै नमस्यामः शर्मणे आत्मनो गवां ३७ इत्यद्रिगोद्विजमखं वासुदेवप्रचोदिताः यथा विधाय ते गोपाः
सहकृष्णा व्रजं गताः ३८ इति भागवते दशमे चतुर्विंशतितमः २४ शुक उ० इंद्रस्तदात्मनः पूजां वि
ज्ञाय विहतां नृप गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप ह १ गणं सांवर्तकं नाम मेघानां चांतका
रिणां इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत २ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां

ति नंबर देवहेलनमेषामभीर्न त्वभीष्टा। इति दशमे टीकायां २४॥ पंचविंशे रुषा शक्रो व्रजनाशाय वर्षति उद्धृत्य गिरिमासारादरक्ष
द्गोकुलं प्रभुः १ कृष्णेनाथा ये येषां तेभ्यः आपकर्त्तारं प्रसिद्धं मेघानां गणं अहं ईश्वर इति गर्ववान् २ देवस्य मम अवज्ञा ३
ऊर्द्ध्व असन्निरुद्ध सांवर्तकं नाम संवर्त्तः प्र॥ प्रचोदयत्प्रेरयामास ... कृष्णनाथा नाघाते ... शक्य ... विनयान्निरस्य विवेकं त्वा दिता ... त्यादि पंचभिः ईशमानी ॥ १ ॥ दिमेस्सतनं १

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ अहो देवसमर्थैः कर्ममयैः क्रियानिवर्त्यैः क्रतुभिर्वनामनोनिभैः नाममात्रेणाप्याना वश्यतिव्यवहृयंते तत्सदृशैः आन्वीक्षि

८३ कीं आत्मानुस्मरति स्म ४ तथा वाचालं बहुभाषिणं बालिशं शिशुं पंडितमानिनं पंडितंमन्यं अतस्तब्धं अप्रविनीतमिति।

इंद्रस्य भारतीमाह संस्तौति तिन थाहि बा वाचालं शास्त्रयोनिं बालिशं एवमपि शिशुवन्निराभिमानिनं स्तब्धं अन्यस्याभा

वादनमज्ञं अज्ञं नास्ति ज्ञेयं यस्मात्तं सर्वज्ञमित्यर्थः पंडितमानिनं ब्रह्मविदां बहुमाननीयं कृष्णं सदानंदरूपं परं ब्र

यथा दृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ४ वाचालं बालि
शं स्तब्धमज्ञं पंडितमानिनं· कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ५ एषां श्रियावलिप्तानां कृ
ष्णेनाध्मापितात्मनां· धुनत श्रीमदस्तंभं पशून्नयत संक्षयं ६ अहं चैरावतं नागमारुह्यानुव्रजे
व्रजं मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबंधनाः नंदगोकुल
मासारैः पीडयामासुरोजसा ८ ॥ ५ कृष्णं मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ५ अवलिप्तानां
मत्तानां ध्मापितात्मनां वृंहितदेहानां धुनत अपनयत श्रीमदेन यस्तंभो गर्वस्तं ६ बिभ्यतस्तान्प्रत्याह अहं चेति
अनुव्रजे अनंतरमेव गच्छामि मरुद्गणैः सह ७ मघवता इंद्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण बद्धा आ राम॰
सन् तदा निर्मुक्तबंधनाः संतः आसारैर्धारासंपातैः पीडयामासुः ८ ८३

विद्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ९

तनयित्नुभिः स्तनंतः गर्जंतः मरुद्गणैः आवहप्रवाहादिवायुसमूहैर्नुन्नाः प्रेरिता जलशर्कराः जलोपलान् ९ स्थूणावत्स्थूला अभ्रे
षु मुंचत्सु नतोन्नतं निम्नं उन्नतं तद्विपरीतं यथा भवति तथा भूर्नादृश्यत १० जातवेपनाः जातकंपनाः ११ तत्र पशूनां यानं विविनष्टि शि
र इति १२ गोपगोपीनां प्रार्थनमाह कृष्ण कृष्णेति त्वमेव नाथो यस्य तत् गोकुलं गवां कुलं वंशं नः अस्मान् देवादिंद्रात् त्रातुमर्हसि १३

स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं १० अत्यासारा
तिवातेन पशवो जातवेपनाः गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ११ शिरः सुतांश्च कायेन प्रच्छाद्या
सारपीडिताः वेपमाना भगवतः पादमूलमुपाययुः १२ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो त्रातु
मर्हसि देवान्नः कुपिताद्भक्तवत्सल १३ शिलावर्षनिपातेन हन्यमानमचेतनं निरीक्ष्य भगवान्मे
ने कुपितेंद्रकृतं हरिः १४ अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं स्वयागे निहतेऽस्माभिरिंद्रो नाशा
य वर्षति १५ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः १६

विलापनात्पूर्वमेव कुपितेन इंद्रेण कृतं तद्वर्षं मेने १४ कथं मेने तत्राह अपर्त्विति· अपगता ऋतुर्यस्य तद्वर्षं मतिशयितो वातो यस्मिंस्तदति
वातं शिलामयं शिलाप्रचुरं १५ तत्र प्रतिज्ञापूर्वं गोवर्द्धनोद्धरणमाह· तत्रेति· प्रतिविधिं प्रतीकारं स्वसामर्थ्येन साध
यिष्यामीति न च मौढ्याल्लोकेशमानिनां श्रीमदलक्षणं तमो हरिष्यामि बहुवचनेन वरुणादीनभिप्रैति १६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु देवाः सात्विकास्तद्भक्ताश्च कुतस्तेषां मानभंगस्तत्राह न हीति सद्भावः सत्वम् ञक्तिर्वा तद्युक्तानां सुराणां वयमीशा इति विस्मयो गर्वो हि यस्मात्
अघटने अतो सतस्तेषां किं च तेषां मानभंगो नुग्रह एवेत्याह मत्त इति १७ गोपायेरक्षयिष्यामि किं च सोयं मे मया व्रतो नियमः संकल्पः

नहि सद्भावयुक्तानां सुराणामीशविस्मयः मत्तोसतां मानभंगः प्रशमायोपकल्प्यते १७ तस्मान्मच्छरणं
गोष्ठं मन्नाथं मत्परिग्रहं गोपाये स्वात्मयोगेन सोयं मे व्रत आहितः १८ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्द्धना
चलं दधार लीलया कृष्णः छत्राकमिव बालकः १९ अथाह भगवान्गोपान्हेंब तात व्रजौकसः यथोपयो
वि
षं विशत गिरिगर्त्तं सगोधनाः २० न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने वातवर्षभयेनालं तत्त्राणं विहितं हि
वः २१ तथा निर्विविशुर्गर्त्तं कृष्णाश्वासितमानसाः यथावकाशं सधनाः सव्रजाः सोपजीविनः २२ क्षुत्तृड्व्य
थां सुखापेक्षां हित्वा तैर्व्रजवासिभिः वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्पदात् २३ कृष्णयोगानुभावं तं नि
शाम्येंद्रोतिविस्मितः निस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्संन्यवारयत् २४ खं व्यभ्रमुदितादित्यं वातवर्षं च दा
रुणं निशाम्योपरतं गोपान्गोवर्द्धनधरोब्रवीत् २५ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः उपारतं वात

स्वात्मयोगेन स्वकीयेन धृत इत्यर्थः १८ कृत्वा उत्क्षिप्य छत्राकं शिलींध्रं यथा १९ यथोपजोषं यथासुखं २० २१ सव्रजाः शकटमंडलीसहिताः सोप
जीविनः ... २२ २३ २४ २५ व्युद प्रायाः विगतोदकप्रायाः स्वल्पजला इत्यर्थः ॥ २६ ॥

श्रीरामः
८४

430

शकटारोपकरणां शकटैरूढमुपकरणं यथा भवति तथा २७ । २८ निर्भृताः पूर्णाः यथोचितं परिरंभणादिभिः समीयुः रूपजम्मुः स
दाशिषः श्रेष्ठा आशीर्वादान् २९ । ३० । ३१ । ३२ ततो गोवर्द्धनस्थानात् स्वस्थ श्रीकृष्णस्य तथाविधानि गोवर्द्धनोद्धरणादीनि गायंत्यः

ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं शकटारोपकरणं स्त्रीबालस्थविराः शनैः २७ भगवानपि तं शै
लं स्वस्थाने पूर्ववत्प्रभुः पश्यतां सर्वभूतानां स्थापयामास लीलया २८ तं प्रेमवेगान्निर्भृता व्रजौकसो
यथा समीयुः परिरंभणादिभिः गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः २९ य
शोदा रोहिणी नंदो रामश्च बलिनां वरः कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ३० दिवि देवग
णाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ३१ शंखदुंदुभयो नेदुर्दि
वि देवप्रणोदिताः जगुर्गंधर्वपतयस्तुंबरुप्रमुखा नृप ३२ ततोनुरक्तैः पशुपैः परिश्रितो राजन्स्वगोष्ठं
सबलोव्रजद्धरिः तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ३३ इति भाग
वते दशमे पंचविंशोध्यायः २५ शुक उवाच एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते अतद्वी
र्यविदः प्रोचुः समभ्येत्य सुविस्मिताः १ ॥ ईयुः ययुः कथंभूताः एवं प्रेम्णा हृदिस्पृशंतीति हृदिस्पृशस्ताः यद्वा कथं
भूतस्य प्रेष्ठत्वेन तासां हृदिस्पृक् ३३ इ॰ द॰ टी॰ २५ षड्विंशे विस्मिता गोपान्कृष्णस्याद्भुतकर्मभिः नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् १ ॥ १ ॥

431

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
८५

स

समभ्येत्य नंदमभिगम्य यद्द्रुत्तदाह बालकस्येति॰ यद्यस्मादद्भुतानि कर्माणि तस्माद्ग्राम्येषु कथं जन्म अर्हतीति आत्मजुगुप्सितं आत्मानर्हं २ अद्भुतानि कर्माणि आह द्वादशभिः यः सप्तहायन इति कथं बिभ्रत् स्थितवानिति पुष्करं पद्मं गजराट् महागजइव ३ महौजसं हाबलायाः तनोर्वयः आयुर्यौवनं वा कालेन पीयते यथा यद्वत्कथमित्यनुवर्त्तते ४ अनसः अधःशयानस्य मास्यस्य मासायुषः परिच्छेदका

बालकस्य यदेतानि कर्माण्यत्यद्भुतानि च कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं २ यः सप्तहायनो बालः करेणैकेन लीलया कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ३ तोकेनामीलिताक्षेण पूतनाया महौजसः पीतस्तनः सह प्राणैः कालेनेव वयस्तनोः ४ हिन्वतो धःशयानस्य मास्यस्य चरणावुदक् अनोपतद्विपर्यस्तं रुदतः प्रपदाहतं ५ एकहायन आसीनो ह्रियमाणो विहायसा दैत्येन यस्तृणावर्त्तमहन्कंठग्रहातुरं ६ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ७
व वने संचारयन्वत्सान् सरामो बालकैर्वृतः हंतुकामं बकं दोर्भ्यां मुखतोरिमपाटयत् ८ वत्सेषु वत्सरूपेणाप्रविशंतं जिघांसया हत्वान्यपातयत्तेन कपित्थानि च लीलया ९ ॥ यस्योदगूर्ध्वं चरणौ हिन्वतः चालयतः प्रपदेन पदाग्रेणाहतं विपर्यस्तं अनः कथमपतत् ५ योदैत्येन ह्रियमाणः स च तं तृणावर्त्तं कथमहन्नित्यर्थः ६ हैयंगवस्तैन्ये नवनीतचौर्ये बाहुभ्यां [illegible] इत्यर्थः ७ मुखतो हंतुकामो यस्यां तं बकं बकमरिं बाहुभ्यां मुखतः कथमपाटयत् ८ आशीविषतमोति क्रूरविषश्वासा [illegible]

रामः
८५

[illegible]
१०।११।१२ औत्पत्तिकः स्वाभाविकः कथमिति सर्वे वा मात्मा स्यादिति शंका १३ उक्तमर्थ्यंति विस्मये अभिनेयनाभिवंदंति क्व सप्तहायन इति १४

स हत्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः चक्रे तालवनं क्षेमं परिपक्वफलान्वितं १० प्रलंबं घातयित्वोग्रं बलेन बलशालिना अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११ आशीविषतमाहींद्रं दमित्वा विमदं ह्रदात् प्रसह्योद्वास्य यमुनां
द चक्रेसौ निर्विषोदकां १२ दुस्त्यजश्चानुरागोस्मिन्सर्वेषां नो व्रजौकसां नंद ते तनयेस्मासु तस्याप्यौत्पत्तिकः कथं १३
क्व सप्तहायनो बालः क्व महाद्रिविधारणं ततो नो जायते शंका व्रजनाथ तवात्मजे १४ नंद उवाच श्रूयतां मे वचो गोपा व्येतु शंका च वोर्भके एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह १५ वर्णास्त्रयः किलास्यासन्गृह्णतोनुयुगं तनूः।
स शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः १६ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते १७ बहूनि संति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १८ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ १९ पुरानेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः २० य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः २१ तस्मान्नंदात्मजोयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः २२

प्राक्श्रुतं मे गर्गाचार्यवाक्यं तत्स्मरितं परिशीलनेन निर्दिष्टं भावनस्य नंदस्य कृष्णतत्त्वावबोधकं जातं स इदानीं तेनैव वाक्येन गोपाननुपदिशति श्रूयतामिति १५
१ इत्यर्थः

[illegible]
२२

भा॰द॰पू॰
८६

इत्यद्धा साद्धा मां प्रति समादिश्य गर्गे स्वगृहं गते सति इदानींतथा मन्यमानोपि इदानीं नारायणस्यांशं मन्ये अत्र हेतुः अक्लिष्टका
रिणमिति २३।२४ गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन्नुपकरिष्यन्स्वयं स्वस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते देवइति यज्ञविप्लवेन या रुट् तया देवे
इंद्रे वर्षति सति वज्राश्मपर्षानिलैः अशनिजलशर्करानीलवायुभिः शीदत्पालपशुस्त्रियो सीदंतः पालाः पशवः स्त्रियश्च यस्मिंस्तथा
त्मा त्वयमेव शरणं यस्य तद्गोष्टं दृष्ट्वानुकंपी सन् स्मयन्कृष्णस्सगोर्द्धं दोषविः कुर्वन्शैलमुत्पाद्य अबलोनीलोच्छिलींध्रं यथा
येकेन करेण बिभ्रद्धृद्गोष्टमपात्पालितवानेवं महेंद्रमदभित्सभगवान् इंद्र इत्युक्तराध्यायार्थं च स्मरति सएवंभूतः श्रीकृष्णो नः प्रीयादिति

इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं २३ शुक उ॰ इति नंदवचः
श्रुत्वा गर्गगीतं व्रजौकसः मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः २४ देवे वर्षति यज्ञविप्लवरुषा वज्राश्मव
र्षानिलैः सीदत्पालपशुस्त्रियात्मशरणं दृष्ट्वानुकंप्युत्स्मयन् उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं
यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवां २५ इति भागवते दशमे षड्विंशः २६ शुक उ॰ गोवर्द्धने धृ
ते शैले आसाराद्रक्षिते व्रजे गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एव च १ विविक्त उपसंगम्य व्रीडितः कृतहेलनः प
स्पर्श पादयोरेनं किरीटेनार्कवर्चसा २॥ एवं नामिति षड्विंशे द्वादशे मे व्यक्तः षड्विंशो दशमो हरिः व्यनक्तु पंचविंशं मा चतुर्विंशति
तः पृथक् इति दशमटीकायां २६ सप्तविंशे न दालस्य कृष्णस्य प्रभवं परं वर्णयते सुरभींद्राभ्यामभिषेकमहोत्सवः १ गोवर्द्धने धृते शैले
इति पाकृष्णस्य भयेन आगमने हेतुः आसाराद्रक्षिते व्रजे इति सुरभेर्द्वरागमने १ तत्रेन्द्र आगत्य किं कृतवान् तदाह विवि
क्त इति पचनमात्र कृत्वादिना अथाह सुरभिरित्यतः प्राक्तनेन ग्रंथेन विविक्त एकांते पादयोः पस्पर्श नमस्कार ॥२॥ श्रीराम

दा२
अस्य श्रीकृष्णस्य दृष्टश्रुतो आसावनुभावश्च दृष्टश्रुतानुभावः दृष्टश्रुतानुभावो येन स इंद्रो न एक त्रिलोकेशोहं कार इति मदो यस्य सः र तत्र म
मापराधं क्षमस्वेति लक्षणे नाहं अपराधो नास्त्येव त्वयानुग्रहः कृत इत्याह चतुर्भिः विशुद्धसत्वमिति धाम स्वरूपं शांतं एकरूपं अतः पतो
पं श्रुतरज्ञानं सर्वमित्यर्थः कुतः ध्वस्तरजस्तमस्कं धृतेत्र अविद्यमानेरजस्तमसीयस्मिन्न तत्र एवायं यं गुणादिषु दृश्यमानो मायाका
र्यप्रपोगुण संप्रवाहो गुणस्रोतः संप्रवाह इति नथासंसार इत्यर्थः अज्ञानसंबंधो वा ४ यदा अज्ञान तत्कृतेदेहसंबंधो नस्ततः तदा

दृष्टश्रुतानुभावोस्य कृष्णस्यामिततेजसः नष्टत्रिलोकेशमद इदमाह कृतांजलिः ३ इंद्र उवाच विशु
द्धसत्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं मायामयोयं गुणसंप्रवाहो न विद्यते ते ग्रहणानुबंधः ४
कुतो नु तद्धेतव ईश तत्कृता लोभादयो ये बुधलिंगभावाः अथापि दंडं भगवान्बिभर्ति धर्मस्य गुप्त्यै खल
निग्रहाय ५ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः हितायचेच्छातनुभिः समीहसे
मानं विधुन्वन् जगदीशमानिनाम् ६॥ तत्कृता नां लोभादीनां का वार्त्तेति आह कुतो न्विति तत्कृता देह
संबंधकृताः तद्धेतवः पुनरन्यस्य देहस्य हेतवः ननु ज्ञानिनामपि दृश्यंते अत आह अबुधलिंगभावाः अज्ञानिनां गमकाः
यावद्रागादिमत्त्वं तावदज्ञानित्वमेवासिद्धमित्यर्थः लोभाद्यभावेपि मन्मानभंगो दंडार्थमित्याह अथापीति ५ ननु त्वदंडे मम
गोपपुत्रस्य का शक्तिः किंच कोणां को वा दंडो मया कृत इत्यत आह पितेति जगतां त्वं पिता जनकः गुरुरुपदेष्टा अधीशो नियंता
इति दंडधारणे हेतुः अयं कालत्वात्समर्थः तस्मादुपात्तदंडो लीलावतारैः समीहसे तव समीहा लीलिव जगदीशमानिनामस्मां

राम:
८६

434

४३५

श्रि

भा॰द॰पू॰ ८१ कथमेतदित्याह यइतिर्मादृशाश्चते अज्ञाभूते अतो जगदीशमानिनं नं कालेभयकालेपि यथा स्वधुर्नैवाति दृष्टो त्वामभयंभय 436
मगणय्यं तं वीक्ष्य आशु तन्मदं जगदीश इतिमदं हित्वा गतगर्वाः संत आर्यमार्गं त्वद्भक्तिलक्षणं भजंति अतस्तव ईहेव खलानामनु
शासनं दंड इत्यर्थः ७ एवं भगवत्स्वरूपमभिधाय चानुग्रहाय क्षमापयति एवंभूता सती मतिर्मे पुनर्माभूदिति प्रार्थनांतरं ८ महानयमप
राधः कथं सोढव्यमिति चेदत आह तवेति स्वयं भराणां पुनरप्युरुभारजन्मनां बहूनां भराणां जन्मभ्यस्तेषामभवाय नाशाय युष्म

येमद्विधाज्ञाजगदीशमानिनस्त्वांवीक्ष्यकालेभयमाशुतन्मदं हित्वार्यमार्गंप्रभजंत्यपस्मयाईहाखलानाम
पितेनुशासनं ७ सत्वंममैश्वर्यमदप्लुतस्यकृतागसस्तेविदुषःप्रभावं क्षंतुंप्रभोथार्हसिमूढचेतसोमैवंपुनर्भू
न्मतिरीशमेसती ८ तवावतारोयमधोक्षजेहभुवोभराणामुरुभारजन्मनां चमूपतीनामभवायदेवभवाययु
ष्मं ष्मच्चरणानुवर्तिनां ९ नमस्तुभ्यंभगवतेपुरुषायमहात्मने वासुदेवायकृष्णायसात्वतांपतयेनमः १० स्वच्छं
दोपात्तदेहायविशुद्धज्ञानमूर्तये सर्वस्मैसर्वबीजायसर्वभूतात्मनेनमः ११ मयेदंभगवन्गोष्ठना
शायासारवायुभिः चेष्टितंविहतेयज्ञेमानिनातीव्रमन्युना १२॥ अनन्यसेविनां तु भवाय अतो ममत्वत्सेवकत्वाद् ८
सतापराधिनोपि सोढव्यमिति भावः ९ क्षमापयन्नमस्करोति नमस्तुभ्यमिति तुभ्यं भगवते कृष्णाय नमः पुरुषाय सर्वांतर्या
मिणे महात्मने अनंत स्थितेप्यपरिच्छिन्नाय कुतः वासुदेवाय सर्वनिवासाय सात्वतां यादवानां पतये नम इति १० रामः
तर्हि किं मम देवकीसुत स्वच्छंदोपात्तदेहाय स्वभक्तानां छंदेन इच्छया स्वीकृताय तत्रापि विशुद्धज्ञानमेव मूर्तिर्यस्य तस्मै मायया सर्वलोके ८१
[illegible] नमइति ११ कृतागस इत्येतेनोक्तं अपराधं निवेदयति आसारवायुभिर्गोष्ठनाशाय मयेदमुक्तं

श्रि

तथापि विभो ईश त्वयानुगृहीतोस्मि अनुग्रहं दर्शयति ध्वस्तस्तंभ इति ध्वस्तो घम इति च १३।१४ इंद्रेण स्वाभिप्रायेनिवेदिते
भगवानपि तथैवाह मयेति इंद्रियादेवराज्येन १५।१६ वः युष्माभिर्बहुवचनं वरुणाद्यभिप्रायेण आज्ञा गंतव्यं स्वर्गोपि तेवेवस्वा
दिति चेत्तत्राह क्रियतामिति मदनुशासनेन यथापूर्वं तत्रस्थीयतामित्यर्थः युक्तैरप्रमत्तैः स्तंभवर्जितैः निरहंकारैः १७ सुसंमानैर्गोभिः

त्वयेशानुगृहीतोस्मिध्वस्तस्तंभोवृथोद्यमः ईश्वरंगुरुमात्मानंत्वामहंशरणंगतः १३ शुकउ॰ एवंसंकीर्ति 437
तःकृष्णोमघोनाभगवानमुं मेघगंभीरयावाचाप्रहसन्निदमब्रवीत् १४ श्रीभगवानु॰ मयातेकारिमघव
न्मखभंगोनुगृह्णता मदनुस्मृतयेनित्यंमत्तस्येंद्रश्रियाभृशं १५ मामैश्वर्यश्रीमदांधोदंडपाणिंनप
श्यति तंभ्रंशयामिसंपद्भ्योयस्यचेच्छाम्यनुग्रहं १६ गम्यतांशक्रभद्रंवः क्रियतांमेनुशासनं स्थी
यतांस्वाधिकारेषुयुक्तैर्वःस्तंभवर्जितैः १७ अथाहसुरभिःकृष्णमभिवंद्यमनस्विनी स्वसंतानैरुपामंत्र्य
गोपरूपिणमीश्वरं १८ सुरभिरु॰ कृष्णकृष्णमहायोगिन्विश्वात्मन्विश्वसंभव भवतालोकनाथेनसनाथा
वयमच्युत १९ त्वंनःपरमकंदैवंत्वंनइंद्रोजगत्पते भवायभवगोविप्रदेवानांयेचसाधवः॥ २०
सद् उपामंत्र्य कृष्णकृष्णेत्यादिसंबोध्य १८ इंद्रेणहृता भगवता सनाथा वयं कृतारक्षिता इत्यर्थः १९ त्वंनःपरमंदैवं
देवता अतः हे जगत्पते गोविप्रदेवानां येन्ये च साधवस्तेषां भवाय अभ्युदयाय त्वमेव इंद्रो भव २० श्रीरामायनमः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अहं हि इंद्रो देवानां त्वं गवामिंद्रतां गतः गोविंद इति लोके त्वां गास्यंति भुवि मानवाः २० भू

भा०द०पू० ननु भवतामिंद्रोस्तीति चेदत आह इंद्रमिति अलं पुरंदरस्यैं दुर्नयेत्यर्थः ननु देव इंद्रो भवति कथमहं भवेयमिति चेदत आह अ

७८ वतीर्णोसीति २१ सुरभिरात्मनः पयसा अभ्यषिंचत इंद्र आकाशगंगाया जलैरभ्यषिंचत देवमातृभिर्देवैर्मातृभिश्चेति वा गाः

भू रा

इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा नोदिता वयं अवतीर्णोसि विश्वात्मन्भूमेर्भारापनुत्तये २१ एवं कृष्णमुपामंत्र्य

सुरभिः पयसात्मनः जलैराकाशगंगाया ऐरावतकरोद्धृतैः २२ इंद्रः सुरर्षिभिः साकं नोदितो देवमातृभिः ॥ 438

अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् २३ तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरसिद्धचारणाः

जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः २४ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकि

रंश्चाद्भुतपुष्पवृष्टिभिः लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्पयोद्रुताः २५ नानारसौ

घाः सरितो वृक्षा आसन्मधुस्रवाः अकृष्टपच्यौषधयो गिरयोबिभ्रनुन्मणीन् २६ कृष्णेभिषिक्तए

तानि सर्वाणि कुरुनंदन । निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः २७ ॥ १ पशून् गां स्वर्गं वा इंद्रत्वेन विंदती

१ अ तिकृत्वा इति गोविंद इति चाभ्यधात् नाम कृतवानित्यर्थः २४ देवनिकायमुकेतव इव दर्शनीया मुख्या इत्यर्थः गावः गां पृथिवीं पयो राम:

भिर्द्रुतां आर्द्रां अनयन् अकुर्वन्नित्यर्थः २५ नानारसौघाः क्षीरवाहिन्यो अकृष्टपच्याः कर्षणं विनैव पक्वाः ओषधयो व्रीह्यादय ७८

आसन् ... ओषधयो ... गिरयः उन्मणीन् उद्गतान्मणीन् उत्कटान्वा हि प्रकटयन्त्यबिभ्रन् अबिभरुः २६।२७

२८ इति दशमे सप्तविंशोध्यायः २७ अष्टाविंशे ततो नंदानयनं वरुणालयात् वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते १ गोवर्द्धनं समुद्धृत्य व

शे लतामरेश्वरं नंदानयनमतः उत्सो वरुणं च वशेनयत् २।१। कलामात्रायां द्वादश्यां पारणाभिनिवेशेन आसुरीं वेलां अवि

ज्ञाय अरुणोदयात्पूर्वमेव शास्त्रबलेन निशि उदकं प्रविष्टं नंदं तदनभिज्ञो वरुणभृत्यो नयदिति तथा च शास्त्रं कालादर्शे द्वा

दशीं हरिप्रबोधिनीं पूर्वमेव हि आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शंभुशासनादिति वक्ष्यति च वरुणो जानतामामकेनेति

इति गोगोकुलपतिं गोविंदमभिषिच्य सः अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवं २८ इति भागवते दश

मे इंद्रस्तुतिः सप्तविंशः २७ श्रीशुक उ० एकादश्यां निराहारः समभ्यर्च्य जनार्दनं स्नातुं नंदस्तु कालिंद्यां द्वा 439

दश्यां जलमाविशत् १ तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोंतिकं अविज्ञायासुरीं वेलां प्रविष्टमुदकं नि

शि २ चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः भगवांस्तदुपश्रुत्य पितरं वरुणाहृतं ३ तदंतिकं गतो रा

ह जन्स्वानामभयदो विभुः प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया महत्या पूजयित्वाह तद्दर्शनमहोत्स

वः ४ वरुण उ० अद्य मे निभृतो देहो अद्यार्थोधिगतः प्रभो त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ॥ ५॥

भगवत्कर्म अजानतेत्यर्थः २।३ स्वानां भक्तानां भगवत्कर्मपरायणानामभयदः मा भैष्टेत्यभयं ददत् सपर्यया अर्हणेन अद्य इदानीं मे मया देहो निभृतो

धृतः यदा त्वद्दर्शनं जातं तदैव सा फलं प्राप्तमित्यर्थः यद्वा निभृतः पूर्णमनोरथ इत्यर्थः ४ किंच अद्यैवार्थोधिगतः सर्वरत्नाक

रपतिना पूर्वं नैवं विधोर्थः प्राप्त इत्यर्थः किंच संसारोपि निवृत्त इत्याशयेनाह त्वत्पादभाज इति अध्वनः पारं मोक्षम् ॥ ५॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् २ सू॰

भा॰द॰पू॰ ८९

भगवते निरतिशयैश्वर्याय ब्रह्मणे पूर्णाय परमात्मने सर्वजीवनियंत्रे तत्र हेतुः न यत्रेति लोकसृष्टिं विकल्पयति या माया यत्र न श्रू-
यते अविद्यमानेव तिष्ठतीत्यर्थः ६ अजानता मूढेन त्वत्पिता हरणीयस्तत्र दितिनंदं विमुच्य समर्पयति गोविंदेति ७।८ अतींद्रि-
यं महत्त्वं दृष्ट्वा लोकपालस्य महोदयं ऐश्वर्यं ९ औत्सुक्ययुक्ता धीर्येषां ते अपि किं स्वगतिं स्वस्थानं सूक्ष्मां वृन्दा व्याच उपाधा ५५८

नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने न यत्र श्रूयते माया लोकसृष्टिविकल्पना ६ अजानता मामकेन मू-
ढेनाकार्यवेदिना आनीतोयं तव पिता तद्भवान्क्षंतुमर्हति गोविंद नीयतामेषः पिता ते पितृवत्सल
७ शुक उवाच एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः आदायागात्स्वपितरं बंधूनां चावहन्मुदं ८
नंदस्त्वतींद्रियं दृष्ट्वा लोकपालमहोदयं कृष्णे च संनतिं तेषां ज्ञातिभ्यो विस्मितोब्रवीत ९ ते त्वौ-
त्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः १० इति स्वानां स भ-
गवान्विज्ञायाखिलदृक्स्वयं संकल्पसिद्धये तेषां कृपयैतदचिंतयत ११ जनो वै लोक एतस्मिन्नवि-
द्याकामकर्मभिः उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् १२ इति संचिंत्य भगवान्महाकारुणिको हरिः
दर्शयामास लोकं स्वं गोपानां तमसः परं १३॥ १ स्वां दुपाधास्यति नोस्मान्प्रापयिष्यतीति संकल्पितवंतः इत्यर्थः
॥१० इति एवंभूतं स्वानां स्वेषां संकल्पं अखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया एतद्वक्ष्यमा- रामः
णमचिंतयत ११ अविद्यादेहाद्यहंबुद्धिस्ततः कामस्ततः कर्म उच्चावचासु देवतिर्यगादिषु भ्रमन्स्वीयां गतिं न वेद १२ ८९
स्वं वैकुंठाख्यं लोकं वैकुंठाख्यं तमसः परं तमसः प्रकृतेः परं देहादिविविक्तानां दर्शनं मया कार्यमिति १३

देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास तदाह सत्यमिति सत्यमबाध्यं ज्ञानं जडं अनंतं अपरिच्छिन्नं ज्योतिः स्वप्रका-
शं सनातनं नित्यं सिद्धं गुणापाये गुणापोहे ज्ञानिनो यत्पश्यंति तत्तत्स्वरूपमेव दर्शयामास १४ एवं ब्रह्महृदे तत्र निमग्नस्य
विशेषज्ञानाभावात्ते ब्रह्महृदं तेन नीताः प्रापिताः तस्मिन्मग्नाः अनुशब्दोक्तं विशेषमाह पुनः कृष्णेन उद्धृताः समाधे-
र्वोत्थापिताः संतः ब्रह्मणः सत्यस्यैव लोकं वैकुंठाख्यं ददृशुरिति ननु ब्रह्मनिमग्नानां पुनर्लोकदर्शनमघटितमेवे- ५५९

यर सत्यं ज्ञानमनंतं यद्ब्रह्मज्योतिः सनातनं यद्धि पश्यंति मुनयो गुणापाये समाहिताः १४ ते तु ब्रह्महृदं नी-
ता मग्नाः कृष्णेन चोद्धृताः ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोध्यगात्पुरा १५ नंदादयस्तु तं दृष्ट्वा प-
रमानंदनिर्वृताः कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः १६ इति भागवते दशमे नंदा-
नयनं नामाष्टाविंशतितमोऽध्यायः २८॥

१ त्यामंकयाह यत्रेति यत्र यस्मिन्कृष्णे निमित्ते सति पूर्वम-
क्रूरोध्यगाद्दृष्टवान् शुकपरीक्षित्संवादात्प्राग्भूतत्वाद्भूतनिर्देशः तर्हि अतर्क्यैश्वर्ये भगवति न किंचिदप्यसंभा-
वितमिति भावः अथवा अक्रूरो यत्र हृदे दृष्टवान् तस्य यमुनाहृदस्य ब्रह्महृद इति नाम तं हृदं नीताः संतः ब्रह्मणो लोकं द-
दृशुः पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता वरदुग्धेति व्यवहितान्वयो प्रसिद्धकल्पना च सा दुर्व्याख्या इति यद्वा अ-
क्रूरोध्यगादधिगमिष्यति भाविनि भूतवदुपचारः नाक्रूरो योगी संसारनिरतो परलोकमधिगच्छति १५ तत्र तस्मि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ ६०

रात्रिंशेऽनुरासार्थमुक्तिप्रत्युक्तयो हरेः गोपीभिः रासरंभश्च तदंतर्द्धिकौतुकं १ ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा जयति श्रीपतिर्गोपीरासमंडलमंडनः २ ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रतीतेः मैवं योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरत इत्यादिषु स्वातंत्र्याभिधानात् तस्माद्रासक्रीडाविडंबनं कामजयख्यापनायेत्येव तत्त्वं किंच शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायी इति व्यक्तीकरिष्यामः ता रात्रीः शारदीर्या व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति प्रतिश्रुता इत्यर्थः १ तदा तस्मिन्नेव क्षणे नक्षत्रनाथ उडुराज अभ्युदगात् उदितः किं कुर्वन् दीर्घकाल

४४२

शुक उवाच भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः। वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः १ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः। स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः २ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं। वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ३

कुकुभः दिशाः मुखं शंतमैः सुखतमैः अरुणेन दर्शनं यस्य सः प्रियः स्वप्रियायाः मुखं अरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभः दिशः मुखं शंतमैः सुखतमैः अरुणेन ... इत्यर्थः सः प्रसिद्धः उडुराजः ... चर्षणीनां जनानां शुचः तापग्लानीर्मृजन् अपनयन् ... सुखकुमुद्विकासनीयं विद्यते यस्य तं कुमुद्वंतं न खंडं मंडलं यस्य तं रमाया आननस्याभा इव आभा यस्य तं नवकुंकुमेन अरुणं दृष्ट्वा तथा च ... रंजितं ... कलं मधुरं जगौ अवादयत् कथंभूतं वामदृशां मनोहरं यथा ॥ ३ ॥ श्रीराम

राम ६०

असापत्न्याय अन्योन्यमलक्षितः उद्यमो याभिस्ताः स कांतो यत्र तत्र गीतध्वनिमार्गेणाजग्मुः जवेन वेगेन लोलानि चलानि कुंडलानि यासां ताः ४ औत्सुक्यातिशयं दर्शयन् तच्छ्रवणेन तत्क्षणमेव ... आरब्धं कर्म विहाय ययुरित्याह दुहंत्य इति पयः स्थालीस्थं ... अधिश्रित्य ... अप्रतीक्षमाणाः काश्चिद्ययुः संयावं गो

निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ४ दुहंत्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ५ परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योऽपास्य भोजनं ६ लिंपंत्यः प्रमृजंत्योऽन्या अंजंत्यः काश्च लोचने व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ७ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ८ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९ ॥

४४३

अनुद्वास्य अनवतार्य अन्याः ५ । ६ अन्याः प्रमृजंत्यः अंगोद्वर्तनादि कुर्वत्यः काश्च काश्चित् कृष्णमनुस्मृत्य अर्थं कर्म तदासक्तमनसां अन्यथा कृतमपि फलत्येवेति द्योतनार्थं व्यत्यस्तेति स्थानतः स्वरूपतश्च ... धारणेन विपर्यस्तानि वस्त्राभरणानि यासां ताः ७ न च कृष्णात्कृष्टमनसां विघ्ना निभवंतीत्याह वार्यमाणा इति ८ न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्ताः सदा नित

भा·द·पू·
९१

किंच तदानीमेव तंपरमात्मानंश्रीकृष्णंध्यानतः प्राप्ताः सत्यो गुणमयंदेहंजहुरित्याह श्लोकद्वयेन दुःसहेति ननुकथंजहुः परमात्मेतिज्ञाना नावादित्याशंक्याह जारबुद्ध्यापीति नहिवस्तुशक्तिर्बुद्धिमपेक्षते अन्यथामत्वापिपीयमृतंदितिभावः ननुतदपिप्रारब्धंकर्मबंधने सतिकथंजहुस्तत्राह सद्यः प्रक्षीणबंधनाइति ननुकथंभोगमंतरेण प्रारब्धंकर्मक्षीणंभोगेनेवसद्यः क्षीणमित्याह दुःसहोयः प्रेष्ठविरहस्तेनतीव्रस्तापस्तेनधुतानिगतानिअशुभानियासांताः एतद्प्राप्तिपरमदुःखभोगेनपापंक्षीणमित्यर्थः तथाध्यानेनप्राप्तोच्युतस्याश्ले ५५५

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः १० तमेवपरमात्मानं जारबुद्ध्यापिसंगताः जहुर्गुणमयंदेहंसद्यः प्रक्षीणबंधनाः ११ राजोवाच कृष्णंविदुः परंकांतंनतुब्रह्मत
म यामुने गुणप्रवाहोपरमस्तासांगुणधियांकथं १२ शुक उवाच उक्तंपुरस्तादेतत्तेचैद्यः सिद्धिंयथागतः।
द्विषन्नपिहृषीकेशंकिमुताधोक्षजप्रियाः १३ नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप अव्ययस्याप्रमे प
यस्यनिर्गुणस्यगुणात्मनः १४॥ षेणयानिर्वृतिः परमसुखभोगस्तयाक्षीणमंगलंपुण्यंबंधनंयासांताः अतोध्यानेनपरमात्मप्राप्तेस्तत्कालसुखदुःखाभ्यांनिःशेषकर्मक्षयाद्गुणमयंदेहंजहुरिति ११ ननुयथापतिपुत्रादीनांवस्तुतोब्रह्मत्वेपिनतद्भजनान्मोक्षस्तथाबुद्ध्याभावे कृष्णेपिब्रह्मबुद्ध्याभावेनतत्संगतिःकथंमोक्षहेतुरितिशक्यते कृष्णमितिपरंकेवलंकांतंकमनीयं १२ परिहरति उक्तमिति अयंभावः जीवेषुआवृतंब्रह्मत्वंकृष्णेस्यतुहृषीकेशत्वादनावृतं अतोनतत्रबुद्ध्यपेक्षेतिभावः १३ ननुदेहीकथमनावृतः स्यादत आह नृणामिति गुणात्मनः गुणानियंतुः भगवतएवं रूपामिव्यक्तिः अतोनदेहिसादृश्यंअत्रशंकुंनयुज्यतइतिभावः १४ राम ९१

अतोयथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह काममिति ऐक्यंसंबंधसौहृदंभक्तिः १५ नचभगवतोयत्किंचिदाश्चर्यमित्याह नचैवमिति यतः श्रीकृष्णादेतत्स्थावरादिकमपिविमुच्यते १६ प्रस्तुतमाह ताइति वाचःपेशैर्विलासैः १७ सर्वाःसतंभ्रममागताः विलोक्यसभयमिवाह व्रजस्येति १७ लज्जयामंदहसितमालक्ष्याह रजन्येषेति १९ किंच मातरइति विचिन्वंतिमृगयंति बंधूनांसाध्वसंमाकृध्वंमाकुरुतेत्यर्थः २० ईषत्प्रणय

कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच। नित्यंहरौविदधतोयांतितन्मयतांहिते १५ नचैवंविस्मयःकार्योभ
हृसे वताभगवत्यजे। योगेश्वरेश्वरेयतएतद्विमुच्यते १६ तादृष्ट्वांतिकमायाताभगवान्व्रजयोषितः अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् १७ श्रीभगवानुवाच स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः व्रजस्यानामयंकच्चिद्ब्रूतागमनकारणं १८ रजन्येषाघोररूपाघोरसत्त्वनिषेविता प्रतियातव्रजंनेहस्थेयंस्त्रीभिःसुमध्यमाः
नि १९ मातरःपितरःपुत्राभ्रातरःपतयश्चवः विचिन्वंतिह्यपश्यंतोमाकृध्वंबंधुसाध्वसं २० दृष्टंवनंकुसुमितंराकेशकररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यातमाचिरंगोष्ठंशुश्रूषध्वंपतीन्सतीः। क्रंदंतिवत्साबालाश्चतान्पाययतदुह्यत २२ अथवामदभिस्नेहाद्भवत्योयंत्रिताशयाः आगताह्युपपन्नंवःप्रीयं 445

कोपेनान्यतोविलोकयंतीः प्रत्याह दृष्टमिति राकेशस्यपूर्णचंद्रस्यकरैरंजितंयमुनास्पर्शिनोनिलस्यलीलामंदगतिस्तयाराजंतःकंपमानाः तरूणांपल्लवास्तैःशोभितं २१ सतीःहेसत्यः २२ संरंभक्षुभितदृष्टीः प्रत्याह अथवेति यंत्रिताशयावशीकृतचित्ताः उपपन्नंयुक्तं प्रीयंते प्रीताभवंति २३ मि·

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰ पू॰
९२

दृष्ट्वा दृष्टभयदर्शनेन न निर्वर्तयति भर्तुरित्यादिश्लोकत्रयेण २४।२५ फल्गु तुच्छं दुःसंपाद्यं श्रोपपत्यं जारसौख्यं किंच कुलस्त्रियाः सर्वथात्या-
ज्यं २६ हे सुंदर त्वमेवास्माकं भावस्त्वमेव प्रार्थनीयो नान्य इति चेत्तत्राह श्रवणादिति तथा श्रवणादिभिर्दूरस्थे प्रेम मयि भवति सन्निकर्षेण समी-
पस्थेन न तथा ततो गृहान्प्रतियात २७ किंच श्रवणाद्दर्शनादित्यादिनोक्तरेणाचिंता प्राप्तानां स्थितिमाह इतीति २८ कृत्वेति श्वचः शोकाद्दुः

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया। तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणं २४ दुःशीलो दुर्भगो
वृद्धो जडो रोग्यधनोपि वा। पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी २५ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं
भयावहं जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः २६ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनुकीर्तनात् न त
था सन्निकर्षेण प्रतियात ततो गृहान् २७ शुक उ॰ इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितं विषण्णा भग्न
संकल्पाश्चिंतामापुर्दुरत्ययां २८ कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः
अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीं २९ प्रेष्ठं प्रियेतरमिव प्रतिभा-
षमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरोब्रुवता-

तेन श्वसनेन शुष्यंतो विंबफलवद्रक्ता अधरा येषु मुखेषु अवशुचः पतिः लिखंत्यः तथा गृहीतकज्जलैरश्रुभिः कुचकुंकुमानि
क्षालयंत्यः तूष्णीं स्थिताः यतः उरुदुःखभरा याः सा तथाः २९ किंच प्रेष्ठमिति किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ताः अनुवृत्तस्य संरंभ
कारणं प्रेष्ठमित्यादि प्रियेतरमिव प्रतिभाषमाणं प्रत्याख्यातारं ॥ ३०॥

राम
९२

नृशंसं क्रूरं दुरवग्रहस्त्वच्छंदपादमूलं भक्ताः सेवितवतीरस्मान्भजस्व मा त्यजेति ३१ अपि च यदुक्तं पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासं
एवमेतदुपदेशानां पदे विषये त्वय्येवास्तु उपदेशपदत्वे हेतुः ईश इति विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः
ईशत्वे हेतुः आत्मा किल भवानिति भोग्यस्य हि सर्वस्य भोक्ता आत्मैवेश इति अतः प्रेष्ठो बंधुश्च भवानेवेति सर्वबंधुषु करणीयं त्व-
य्येवास्तीत्यर्थः अथवा धर्मोपदेशानां पदे स्थाने धर्मोपदेष्टरि त्वयि सति अस्माकं च धर्मजिज्ञासुमानामुसतीषु त्वया धर्मविदय

गोप्य ऊचुः। मैवं विभोर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं भक्ता भजस्व दुरव-
ग्रह मा त्यजास्मान्देवो यथादिपुरुषो भजते मुमुक्षून् ३१ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्व-
धर्म इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ३२
कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं तन्नः प्रसीद परमेश्वर मा स्म
छिंद्या आशां धृतां त्वयि चिरादरविंदनेत्र ३३॥ दुक्तं एवमेतदस्तु नत्वं धर्मोपदेष्टा भवानात्मेति अथवा यदुक्तं एतदुपदेशपदे
तद्गोचरे पुरुषेषु नाम त्वयि तु ईशे स्वामिनि सति एवं कांक्षामेवमित्यर्थः यतस्तनुभृतां त्वमात्मा पफलरूप इति यद्वा यदुक्तं पत्यादिशुश्रूषणं
धर्म इति एवमेतत्त्वय्येवास्तु कुत उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां अधिष्ठाने कुत ईशे महेश्वरमधिष्ठानं विना को
पि पतिपुत्रादिर्नामास्तीत्यन्यत्समानमलमतिविस्तरेण ३२ एतत्सदाचारेण दृढयंत्यः प्रार्थयंते कुर्वंतीति कुशलाः शास्त्रनिपुणा रतिं कुर्वं-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰ पू॰ ६३

किंच प्रतियातेति यदुक्तं तद्दशा कथं त्वयैव चित्तादीनामपहृतत्वादित्याहुः चित्तमिति यदस्माकं चित्तमेतावत्कालपर्यंतं सुखेन गृहेषु निर्विशति आविशति स्थितं तत्त्वयापहृतं करव पियो गृहकृत्ये निर्विशान तत्त्वापि त्वयापहृतो सुखेन सुखात्मना त्वयेति वा ३४ अतः अंग हे कृष्ण सनौ कन स्मी वाघरामृत पूरके सानंदे वहासेन हासंसहितेन आवलोकनेन कलगीतेन च जो तो यो हृच्छयाग्निः कामाग्निस्तंसिंनो चेद्वयं तावदेके ग्निलावद्वि रहाज्ज निष्यतेयोग्निस्तेनोपयुक्त देहा दग्धशरीरा योगिन इवेते पदवी मतिकं ध्यानेन यामः प्राप्नुमः ३५ ननु स्वपतीन्नेवोपगच्छत तरवेनमग्नि

चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ३४ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ३५ यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्त क्षणं क्वचिदरण्यजनप्रियस्य अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता बत पारया ॥ मः ३६

सिंचेयुरिति चेत्तत्राहुः यर्हीति रमाया लक्ष्म्या दत्तक्षणं दत्तोत्सवं दत्तावसरं तावदपि क्वचिदेव न सर्वदा अरण्य जनाः प्रिया यस्य तस्यारण्यजनप्रियत्वादरण्ये क्वचिद्यर्हि कात्यायन्यादर्शनेन अस्प्राक्ष्म स्पृष्टवत्यो वयं तत्र च त्वयाभिरमिता नन्दिताः सत्यः तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयामः तुच्छास्ते पतयो न रोचन्त इति भावः ३६ ॥ रामः ६३

४४८

तत्पादसौभाग्यं तु निश्चितमित्याहुः श्रीरिति श्रीर्लक्ष्मीर्वक्षःस्थं सापत्न्यं तस्या नं लब्ध्वापि तु लक्ष्म्यापि तु लस्याः सापत्न्यमाह तव पदांबुजरजोका मयते स्वभृत्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः यस्याः लक्ष्म्याः सुखी लक्ष्मी वीक्षणाय ब्रह्मादयो विलोकयत्ते न दर्थं अन्ये यत्र ब्रह्मादीनां तपोभिः प्रार्थं तत् तव सुंदरस्मितं तन्निरीक्षणेन यः कामस्तेन ततप्तचित्तानां हे पुरुषरत्न दास्यं देहि ३८ ननु गृहस्वाम्यं विहाय दास्यं किमिति प्रार्थ्यते अत आहुः वीक्ष्येति अलकावृतमुखं केशांते राकृतमुखं तथा कुंडलयोः श्रीर्यया तो गंडस्थले यस्मिन्न धरयोः सुधा यस्मिंस्तच्चतच्च मुखं

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टं यस्याः स्ववीक्षणकृतेन्यसुरप्रयासस्तद्वयं च तव पादरजः प्रपन्नाः ३७ तन्नः प्रसीद वृजिनार्दन तेंघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यं ३८ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंड स्थलाधरसुधं हसितावलोकं दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ३९ कास्त्र्यंग ते कलपदायतवेणुगीतसंमोहितार्यचरितान्न चलेत्त्रिलोक्यां त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः

वीक्ष्य दत्ताभयं भुजदंडयुग्मं च वक्षःश्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्यः एव भवाम इति ३९ नन्वनुरूपं सितं पत्यमित्युक्ते तत्राहुः कास्त्रीति अंग हे कृष्ण कलानि पदानि यस्मिंस्तथायतं दीर्घमूर्छितं स्वरालापभेदस्तेन पाठांतरे कलपदामृतमयं वेणु गीतं तेन संमोहिता का स्त्री आर्यचरितान्निजधर्मान्न चलेत् यन्मोहिताः पुरुषाः अपि चलिताः किं च त्रैलोक्ये सौभाग्यमिदं रूपं निरीक्ष्य पुलकान्यबिभ्रन् अबिभरुः स्थावरादयोपि पृथ्व्यामपि द्रुमा मृगादीनपि तत्कथा श्रवणमात्रेणापि निजधर्मपरित्यागो

४४९

[illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्यक्तं निश्चितं ४१ विक्लवितं पारवश्यप्रलपितं गोपी रमयामास ४२ प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः उदारहासश्च द्विजा
श्च ते एव कुंदकुसुमवद्दीधितिर्यस्य सः एणाङ्कश्चंद्रः ४३।४४।४५ बाहुप्रसारश्च परिरंभश्च करश्चंदीनामालभनं स्पर्शश्च नर्मपरिहास

व्यक्तं भवान्व्रजभयार्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता तन्नो निधेहि करपंकजमार्तबं
धो तप्तस्तनेषु च शिरस्सु च किंकरीणां ४१ शुक उ० इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः प्रहस्य स
दयं गोपीरा[illegible]त्मारामोप्यरीरमत् ४२ ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः।
उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ४३ उपगीयमान उद्गायन्वनिताशतयू
थपः मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं ४४ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं रेमे
तत्तरलानंदकुमुदामोदवायुना ४५ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपा
तैः। क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार ४६ एवं भगवतः कृष्णाल्लब्ध
मानामहात्मनः आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ४७ तासां तत्सौभगमदं वीक्ष्यमा
नं च केशवः प्रशमाय प्रसादाय तत्रैवांतरधीयत ४८ इति भागवते दशमे राशक्रीडाएकोनत्रिं

श्च नखाग्रपातनश्च तैः क्ष्वेल्या क्रीडया चावलोकैश्च कामं तासामुद्दीपयन्रमयामास ४६ महात्मनो विष्णुमुपचिताव
४७ तासां भगमदं सत्स्वाधीनतां मानं गर्वं च केशवः कश्च ईश्च तौ [illegible]शौ वशयतीति तथा सः ४८ इति भाग· दशमे टीकायां २९

त्रिंशे विरहसंतप्ता गोपीभिः कृष्णमार्गणं उन्मत्तवद्दीर्घरात्र्यां भ्रमंतीभिर्वने वने १ अचक्षाणाः अपश्यंत १ गत्या चानुराग
स्मिताभ्यां विभ्रमेक्षितैर्मनोरमालापैश्च विहारैः क्रीडाश्च विभ्रमाः अन्ये विलासास्तैश्च रमापतेर्गत्यादिभिः एते
राक्षिप्तानि चित्तानि यासां ताः अतस्तस्मिन्नेवात्मा यासां ताः तस्य विविधाश्चेष्टा जगृहुः तदनुकरणेनाक्रीड[illegible]पि च गतिस्मि
तेति प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णस्य विहारविभ्रमाः क्रीडाविलासा यासां ताः अहमे

श्रीशुक उवाच अंतर्हिते भगवति सहसैव व्रजांगनाः अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ गत्यानु
र रागस्मितविभ्रमेक्षितैर्मनोरमालापविहा[illegible]विभ्रमैः आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहु
स्तदात्मिकाः २ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः असावहं त्वित्यबलास्तदा
त्मि त्मिकान्यवेदिषुः कृष्णविहारविभ्रमाः ३ गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं पप्रच्छु
राकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ४ दृष्टो वः कच्चिदश्वत्थप्लक्षन्यग्रोध नो मनः नंदसूनुर्गतो

व कृष्ण इति परस्परं निवेदितवंत्यः ३ किंच गायंत्य इति वनाद्वनांतरं गच्छंत्यो विचिक्युः अमृगयन् उन्मत्ततुल्यत्वमाह वनस्पती
न् पप्रच्छुः भूतेष्वंतरं मध्ये संतं पुरुषं बहिश्च संतमिति ४ तत्प्रपंचयति नवभिः तत्र महत्वादेते पश्येयुरित्याशयाश्वत्थादीन्पृच्छंति दृष्टो
वइति प्रेमहाससहितेरवलोकनैरस्माकं मनो हृत्वा चोर इव गतो वः युष्माभिः किं दृष्ट इति ॥ ५ ॥ श्रीगोपालायनमः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·पू·
९५

हे२

महांतः स्वपुष्पैर्बहूपकारिणश्चेति हेतोः कुरबकादीन् पृच्छति कच्चिदिति हे कुरबकादयः दर्पहरस्मितं यस्य सः इतो गतः कच्चिद्दृष्ट इति हे तु
लि कुलैः सह त्वां बिभ्रत् वातिप्रियः त्वया किं दृष्ट इति ७ गुणातिरेकेण पिन मत्वा इमाः पश्येयुरिति मालत्यादीन् पृच्छति हे मालति म
ल्लिके जाति यूथिके वा युष्माभिः किं मद् दृष्टः करस्पर्शेन वः युष्माकं प्रीतिं जनयन् किं यात इत्यत्र मालतिजात्योरवांतरवि
शेषं द्रष्टव्य इति शेषः ८ फलादिभिः सर्वप्राणिनां संतर्पकाः एते पश्येयुरिति पृच्छति चूतेति चूताम्रयोरवांतरजातिभेदो द्रष्टव्यः

कच्चित्कुरबकाशोकनागपुंनागचंपकाः। रामानुजो मानिनीनां इतो दर्पहरस्मितः ६ कच्चित्तुलसि कल्या
णि गोविंदचरणप्रिये सहत्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोऽच्युतः ७ मालत्यदर्शि वः कच्चिन्मल्लिके जाति यू
थिके प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ८ चूतप्रियालपनसासनकोविदार जंब्वर्कबिल्वबकु
लाम्रकदंबनीपाः ये न्ये परार्थभविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९ किं ते कृतं
क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो

कदंबनीपयोर्भेदः हे चूतादयः ये न्ये च परार्थभविकाः परार्थमेव परोपकारार्थं भविकं जन्म येषां ते यमुनोपकूलाः यमुनायाः कूलसमीपव
र्तिनः मानास्तीर्थवासिन इत्यर्थः तेभवंतः रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य पदवीं मार्गं शंसंतु कथयंतु ९ हे क्षिति त्वया किं
तपः कृतं यातं केशवांघ्रिस्पर्शोत्सवात् केशवांघ्रिस्पर्शेनोत्सवो यस्याः सा कुतः जायते अंगरुहैः उत्पुलकिता रोमांचिता विभासि शोभसे
नत्रापि शोभा एकं त्वपि किमयमुत्सवः अंघ्रिस्पर्शसंभवः अधुनातनः केकदेशाधिसंभूतः यद्वा नेतावत्किं तु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रम
स्यपदसंबंधात् आहो वा नेतावद्देवापि तु ततो पि पूर्वं वराहस्य वपुषः परिरंभणेनेति अत्युत्सवमानोहमेव दर्शितमिति भावः १०॥

राम:
९५

हरिणाः आह प्रसन्नाः दर्शनेन संभाव्याहुः अपीति हे सखि एणपत्नि अपि किमुपगतः समीपं गतः गात्रैः सुंदरैः स्वबाहुभि
भिः प्रियया सहेति यदुक्तं तत्र द्योतकं कांतायाः अंगसंगस्तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः कृष्ण
स्य वाति आगच्छति ११ फलभारेण नतान्सतरून् दृष्ट्वा प्रणतानिति मत्वा प्रियया सह तस्य गतिविलासं संभावयंत्यः पृच्छं
ति बाहुमिति तुलसिकाया अलिकुलैः अतस्तदामोदमदांधैरन्वीयमानः अनुगम्यमानः इह चरति १२ कच्चिदाहुः हे तरवः

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः कांतांगसंगकुचकुंकुमरंजिता
याः कुंदस्रजः कुलपतेरिह वाति गंधः ११ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालि
कुलैर्मदांधैः अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः १२ पृच्छतेमा
लता बाहूनप्याश्लिष्टा वनस्पतेः नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो १३ इत्युन्मत्तवचो गोप्यः
कृष्णान्वेषणकातराः लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः १४॥

स्वतनतुस्वपतिसंगतोतत्संगतिर्दृष्टेत्याहुः वनस्पतेः पत्युर्बाहून् शाखा आश्लिष्टा अप्येताः भाग्यवत्यः इमा लताः कृष्णेन संगता नूनमतद्रमाः पृ
च्छत कानि बिभ्रति न हि स्वपतिसंगताबीहकपुलकसंभव इति भावः १३ उन्मत्तवत्प्रपच्छुरित्येवमनुरूपं चितं द्रष्टव्यं तेरमापतेस्ताः
स्ता लीलास्तदात्मिकाः हीति यदुक्तं तत्प्रपंचयति इतीति उन्मत्तवचो गोप्यः उन्मत्तवत्सप्रलापा गोप्यः कृष्णान्वेषणकाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
९६

कस्यांचिदित्यादि शिशुचेष्टाभिः अनुकरणं प्रपंच्यते नन्वत्र चेष्टाभिस्तन्मयत्वं पुनरेकेनानुकरणमिति विवेकः पूतनावदाचरंत्याः कृ
ष्णवदाचरंती स्तनमपिबत् तोकायित्वा तोकवदाचरंती स्तनमपिबत् १५ दैत्यायित्वा दैत्यवदात्मानं कृत्वा एका कृष्णार्भभावनां

कस्यांचित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं तोकायित्वा रुदंत्यन्या पदाहन् शकटायतीं १५ दैत्यायित्वा
जहारान्यामेका कृष्णार्भभावनां रिंगयामास काप्यंघ्री कर्षंती घोषनिःस्वनैः १६ कृष्णरामायिते द्वे तु गो
पायंत्यश्च काश्चन वत्सायतीं जघानान्या तत्रैका तु बकायतीं १७ आहूय दूरगा यद्वत्कृष्णस्तमनुकु
र्वतीं वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति १८ कस्यांचित्स्वभुजं न्यस्य चलंत्याहापरा ननु कृष्णोऽहं
पश्यत गतिं ललितामिति तन्मनाः १९ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया इत्युक्त्वैकेन हस्तेन यतं
त्युन्निदधेंऽबरं २० आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप दुष्टाहे गच्छ जातोऽहं खलानां ननु दंडधृक्
२१ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणं चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा २२ बद्धान्य
या स्रजा काचित्तन्वी तत्र उलूखले भीता सुदृक् पिधायास्यं भेजे भीतिविडंबनं २३॥ कृष्णस्यार्भबाल्यं भा

भावयति या तामन्यां जहार १६ दूरगाः यद्वद्गवां यथा कृष्णस्तथा आहूयंतं कृष्णमनुकुर्वतीमित्यनुवर्तमानामनुवर्ततीमिति वा राम
[illegible] अन्याः साधु साध्विति प्रशंसंति १८ तस्मिन्श्रीकृष्णमनोयासां ताः १९ यतंती प्रयत्नं कुर्वती अंबरमुत्तरीयवस्त्रमुन्निदधे [illegible] ९६

एवं पुनरपि वृंदावनेलतास्तरूंश्च कृष्णं पृच्छंत्यो वनोद्देशे व्यचक्षत अपश्यन् २४।२५ सुपृक्तानि संमिश्राणि २६ तेन कृष्णेनांसेन्यस्तः प्रकोष्ठो यस्याः स
[illegible] अन्याः २७ रहः एकांतस्थानं २८ हे आल्यः हे सख्यो हो धन्या अतिपुण्याः गोविंदांघ्र्यब्जरेणवः तत्र हेतुः यानिति अस्माभिरेतदुपल
ब्धे केशान्येव कृष्णः प्राप्तुं शक्यत इति भावः २९ अन्या आहुः तस्या इति गोपीनां धनं सर्वस्वमयं भावः भवेदेवं यदि तस्याः पदानि संपृक्तानि न भ

एवं कृष्णं पृच्छमाना वृंदावनलतास्तरून् व्यचक्षत वनोद्देशे पदानि परमात्मनः २४ पदानि व्यक्तमेतानि नंद
सूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २५ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योऽग्रतोऽब
लाः ध्वजापदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् २६ कस्याः पदानि चैतानि यातायानंदसूनुना अंसन्य त्प
स्तप्रकोष्ठायाः करेणोः करिणा यथा २७ अनयाराधितो नूनं भगवान्हरिरीश्वरः यन्नो विहाय गोविंदः प्री य४
तो यामनयद्रहः २८ धन्या अमी अमी अहो आल्यो गोविंदांघ्र्यब्जरेणवः यान्ब्रह्मेशौ रमा देवी
दध्युर्मूर्ध्न्यघनुत्तये २९ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत् यैकापहृत्य गोपीनां रहो भुंक्ते
१त च्युताधरं ३० न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ३१

वेयुः तदा तानि तु नो दुःखं कुर्वंतीति ३० तदसंपृक्तानि केवलं कृष्णपदान्यादरेण विचिन्वंत्यस्तानि दृष्ट्वा पुनरत्यंतं समनुतप्यन्त तदाह श्लोकत्रयेण न
लक्ष्यन्त इति खिद्यति सुजाते सुकुमारे अंघ्रितले यस्यास्तामुन्निन्ये स्कंधमारोपितवान्॥३१॥ श्रीमद्गोपालः सर्वोपरि वरीवर्तु तराम्

454 455

२२ [illegible] इति विडंबनं [illegible] आरुह्य [illegible] काकरुणाम् २३

भा॰द॰पू॰ ८७ ४२

तत्र हेतुमाह इमानीति अतिभारेणातिमग्नानि प्रपदाभ्यां पदाक्रमणाभ्यां आक्रमणं श्रोणीसंमर्दनं पयोः अतस्तु वासकल्पे पदे पश्यतेति ॥ ३३ तस्याः
कुसुमोज्जान्वंतरुपविष्टायाश्चिन्हं दृष्ट्वाहुः केशप्रसाधनमिति कांतामधिकृता निप्रसूनानि रचनानुकारेण वधूनां इह ध्रुवमुपविष्टा ३४ रेमेत्यादिषु

इमान्यधिकमग्नानि पदानि वहतो वधूं गोप्यः पश्यत कृष्णस्य भाराक्रांतस्य कामिनः ३२ अत्रावरोपिता कांता पुष्पहे- ४५६
तोर्महात्मना अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः प्रपदाक्रमणे एते पश्यतासकले पदे ३३ केशप्रसाधनं
त्वत्र कामिन्याः कामिना कृतं तानि चूडयता कांतामुपविष्टमिह ध्रुवं ३४ रेमे तया चात्मरत आत्मारामोप्यखं-
डितः कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां ३५ इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः यां गोपीमन-
यत्कृष्णो विहायान्याः स्त्रियो वने ३६ सा च मेने तदात्मानं वरिष्ठं सर्वयोषितां हित्वा गोपीः कामयाना मा-
ते मसौ भजते प्रियः ३७ ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् न पारयेहं चलितुं नय मां यत्र ते मनः ३८ ए-
वमुक्तः प्रियामाह स्कंधमारुह्यतामिति ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ३९॥ ॥ कौतिकिः आत्मन्येव

रतः स्वतस्तुष्टः आत्मारामः स्वक्रीडो खंडितः स्त्रीविभ्रमैरनाकृष्टः पि यथा चकि मिति रेमे प्रत्यारु[का]मिनामिति ३५ स्त्रीणां दुरात्मतामाह सा चेति
हाभ्यां कामायानामागमनस्य घनेयाः सांताः गोपीर्हित्वा मां भजत इति हेतोरात्मानं वरिष्ठं मेने ३७।३८ कामिनो दैन्यं दर्शयति एवमुक्त इति अखं- रामः
डितत्वमाह ततश्चेति तस्यां स्कंधारोहोद्यतायामन्तर्हित इत्यर्थः ॥ ३९ ॥ श्रीमद्गोपालः सर्वोपरि वरीवर्ततुतराम् ॥ श्रीरामायनमः ॥ ८७

४३

अनुतापमाह हा नाथेति ४० अन्विच्छंत्यो मृग्यमाणाः अविदूरतः समीपे ४१ ततस्तयापि सहिताः कृष्णान्वेषणाय वनमविशन् ततो दूरे स्वे-
नसंगति रासीत्तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयंति ध्यायंती तिनथाताः कृष्णस्यागमनं कांक्षितेयाः संनामिलिताः सत्यः कृष्णमेव जगुरि-
ति ४५ इति दशमे टीकायां ३० ॥ एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमं १ जयतीति हे दयित ते जन्मना

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिं ४० अन्विच्छंत्यो भगवतो ४५७
मार्गं गोप्योविदूरतः ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीं ४१ तया कथितमाकर्ण्य मानप्राप्तिं च माधवा-
त् अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ४२ ततो विशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते तमः प्रविष्टमा-
लक्ष्य ततो निववृतुर्हरेः ४३ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः तद्गुणानेव गायंत्यो नात्मागा-
राणि सस्मरुः ४४ पुनः पुलिनमागत्य कालिंद्याः कृष्णभावनाः समवेता जगुः कृष्णं तदागमनकांक्षिताः ४५
इ॰भा॰ दशमे त्रिंशः ३० गोप्य ऊचुः जयति तेधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि दयित दृश्यतां दि-

व्रजोधिकं यथा भवति तथा जयति उत्कर्षेण वर्त्तते यस्मात्त्वमत्र जातः तस्मादिंदिरा लक्ष्मीरत्र हि श्र- ॥ शि तावकास्त्वयि धृतासवस्त्वां वि-
यते व्रजमेवालंकृत्य वर्त्तते एवं व्रजे सर्वस्मिन्मोदमाने अत्र तावकास्त्वदीया गोपीजनास्त्वदीया गोपीजनास्त्वदर्थमेव कथंचिद्धृतासवः धृता असवो
येस्ते त्वां विचिन्वंते इति भावः अतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति यद्वा अस्माभिर्जयान् यद्वा एवं त्वया दृश्यतामेव विचिन्वंते इति अत्र हि स-
तत्राणां बहूनां वक्तृत्वात्परा आहुरिति सर्वश्लोकेष्ववतारणा तथापि संगतिरूह्यते ॥१॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र विचिन्त्यं तु मम किमिति चेत्तत्राह शरदिति शरदुदाशये शरत्कालीने सरसि साधु जातस्य सरसिजोदरस्य श्रीमुषा साधु जातं सम्यग्जातं यत्सरसि जं सुविकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ सम्भोगपते वरद अभीष्टप्रद अशुल्कदासिकाः अमूल्यदासीस्तानि घ्नतो मारयतस्ते तव या क्रियमाणः इह लोके अयं वधो भवति किं शस्त्रेणैव वधो वधः किं दृशा वधो वधो न भवति किं तु भ वत्येवानस्तव दृशा अपहृतप्राणा अन्यप्राणायत्वयाहृ श्यतामिति यथासम्भवसर्वत्र वाक्यशेषः २ किं च बहुभ्यो मृत्युभ्यः कृपया रक्षिता नः किं मितिइदानीं दृशा मन्मथप्रेष्य घातयसीत्याह विषेति हे ऋषभ श्रेष्ठ विषमयजलाद्यप्ययो नाशस्तस्मात्तथा व्यालराक्षसाद्घासुराद्वर्षमाहता

शरदुदाशये साधु जातसत्सरसिजोदरश्रीमुषा दृशा सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः २ 450

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषमयात्मजाद्विश्वतो भयादृषभ ते वयं रक्षिता मुहुः ३

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ४

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहं ५

किमिदानीमु पेक्षसे इति भावः ३ अपि च विश्वपालनाय या वती... हे सखे भवान् खलु निश्चितं य...

...नस्तवचानाभवनावा...नस्ताप्ताःनाकुले... इत्याह विरचितेति... नास्ति ते... तस्मात्... तेष्वपि स्पृष्टाः... उदयिवानुदितः ४ तस्मात्... श्रीरामः
...सिद्धि... ...

हे व्रजजनार्तिहन् हे वीर निजजनानां यः स्मयो गर्वस्तस्य ध्वंसकं नाशकं स्मितं यस्य हे तथाभूत हे सखे भवत्किङ्करीर्नो भजस्व आश्रय स्वेति निश्चितं प्रथमं तावज्जलरुहाननं चारु योषितां नो दर्शय ६ अपि शरणागतानां देहिनां पापकर्षणं तृणचरानुगं पशूननुगच्छतीति कृपयेति तथा श्रीनिकेतनं श्रीयो निकेतनं श्रीर्या निकेतनं फणिफणार्पितं ते पदाम्बुजं नः कुचेषु कुरु किमर्थं हृच्छयं कामं कृन्धि छिन्धि ७ हे पुष्करेक्षण तव मधुरया गिरा वल्गुतिरम्याणि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गम्भीरेत्यर्थः मुह्यतीरिमा नः विधिकरीः किङ्करीः अधरसीधुना आप्यायस्व सञ्जीवयेति ८ किं चास्माकं

व्रजजनार्तिहन्वीर योषितां पापकर्शनं तृणचरानुगं श्रीनिकेतनं फणिफणार्पितं ते पदाम्बुजं कुरु कुचेषु नः कृन्धि हृच्छयं म धुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ८ तव कथाम् तं तप्तजीवनं कविभिरीडितं कल्मषापहं श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः ९

थामृतं पाययध्वं सुकृतिभिर्वितमित्याह तवेति कथैवामृतं अत्रैव हेतुः तप्तजीवनं प्रसिद्धामृतादुत्कर्षमाह हे अात्म... कविभिर्ब्रह्मविद्भिरपि ई डितं देवभोग्यं त्वमृतं तत्तु स्वर्गं... किं च कल्मषापहं कामकर्मनिरसनं तत्तु स्मृतं नैवंभूतं किं च श्रवणमङ्गलं श्रवणमात्रेण मङ्गलप्रदं त्वि ष्वानार्थे तं किं च श्रीमत्सुशान्तं तनुमादकं एवंभूतं त्वत्कथामृतमाततं यथा भवति तथा भुवि ये गृणन्ति ते जनाः भूरिदाः बहुदातारः जीवितं ददतीत्यर्थः यद्वा एवमृतं त्वत्कथामृतं ये भुवि गृणन्ति ते भूरिदाः पूर्वजन्मसु बहु दत्तवन्तः सुकृतिन इत्य र्थः एतदुक्तं भवति सर्वत्रैव केवलं कथामृतं गृणन्ति ते पिबन्ति धन्याः किं पुनर्ये त्वां पश्यन्ति अतः प्रार्थ्यमाना महत्तया दृश्यतामिति ९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ ९९

नवुतर्हि मत्कथाश्रवणेनैव निर्वृता भवंतः किं मद्दर्शनेन तद्विलासस्तुभितचित्ता वयं शांतिं न विदाम इत्याहुः प्रहसितमिति हे प्रिय
कुहक कपटसंविदः संकेतकर्मणि १० किं च त्वयि वयमिति प्रेमार्द्रचित्ताः त्वं पुनरस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्व
येन हे नाथ कांत यद्यदा व्रजाच्चलसि पशून्चारयन् तदा नलिनसुंदरं कोमलं ते पदं शिलैः कणिशैस्तृणांकुरैश्च सीदतीति क्लि
श्येदिति नो मनः कलिलतां अस्वास्थ्यं गच्छति प्राप्नोति एवंभूतास्त्वद्दुःखशंकितचित्ता वयम् ११ त्वं तु दिनपरिक्षये

प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमंगलं रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षो
भयंति हि १० चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदं शिलतृणांकुरैः सीदतीति नः कलि
लतां मनः कांत गच्छति ११ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं घनरजस्वलं दर्शय
२ न्मुहुर्मनसि नः स्मरं वीर यच्छसि १२ प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि चरणपं
कजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् १३॥ सायंकाले नीलकुंतलैरावृतं घनरजस्वलं गोरजःस्फुरितं वन

रुहाननं अलिमालाकुसुमपरागस्फुरितपद्मतुल्यमाननं बिभ्रत्तच्च मुहुर्मुहुर्दर्शयन्नो मनसि केवलं स्मरं यच्छसि अर्पयसि
न तु संगं ददासीति कपटकृतिभावः १२ अतोऽधुना कपटं विहाय वेणुकूजितिप्रार्थयंते श्लोकद्वयेन हे आधिहन् हे रमण पद्मजार्चि
तं आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शंतमं च सेवासमयेऽपि सुखतमं ते चरणपंकजं कमता पश्यं तत्रयेन स्तनेष्वर्पयेति १३ रामः ९९

अपि च हे वीर ते अधरामृतं नो वितर देहि कथंभूतम् अधरामृतं स्वरितेन नादितेन वेणुना सुष्ठु चुंबितमिति नादामृतवासितमिति भावः इतररागवि
स्मारणं नृणामिति ते सुसार्वभौमादिसुखेष्वपि रागमिच्छां विस्मारयति विलापयतीति तथा तत् १४ किं च त्वाणमपि तव दर्शनेन च सुखे इष्टा सर्वेषां
परित्यागेन पतय इव वयं त्वामुपागताः त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे इति सकरुणमाहुः अटतीति द्वयेन यद्यदा भवान्काननं वृंदावनं प्रति
अटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्द्धमपि युगवद्भवति एवमदर्शने दुःखमुक्तं चिह्नितौ नौ तेन तव श्रीमन्मुखं च उत्उद्वेनिरीक्षमाणा

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतं १४ अटति यद्भवानह्नि
ल काननं त्रुटिर्युगायते त्वामपश्यतां कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां १५ पतिसुतान्वयभ्रातृबांधवान
तिविलंघ्य तेंत्यच्युतागताः गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि १६ रहसि संविदं हृच्छयोदयं प्रहसि
ताननं प्रेमवीक्षणं बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः १७॥ नौ तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मंद एव निमिषमा
त्रमप्यंतरमसह्यमिति दर्शनसुखमुक्तं १५ किं च तव कृते घृत्वा दुश्चितमेवेदमभिप्रेत्याहुः तस्मादेह अच्युत पतीन्सुतानन्वयान्ज्ञातिसंबंधिनः
भ्रातॄन्बांधवांश्चातिविलंघ्य तव समीपमागता वयं कथंभूतस्य तव गतिविदोऽस्मदागमनं जानतः गतिविदो वयं वा तवोद्गीतेन मोहिताः हे
कितव शठ एवंभूता योषितो निशि स्वयमेवागतास्त्वा त्वत्तो कस्त्यजेदित्यर्थः न कोऽपीति १६ अतस्त्वया त्यक्तानामस्माकं प्राक्तन तव दर्शनेन नि
दानस्य हृद्रोगस्यैव चिकित्सां कुर्विति आहुः द्वयेन रहसीति श्रियो धाम ते वक्षःस्थलं उरस्त्वं वीक्ष्य अतिस्पृहा नो भवति तया च मुहुर्मुहुर्मनो मु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰ पू॰
१७०

तव व्यक्तिर्व्रजवनौकसां सर्वेषामविशेषेण वृजिनहंत्री दुःखनिरसनी विश्वमंगलं सर्वमंगलरूपा चातस्त्वत्स्पृहात्मनां त्वत्प्रभावदम
नसां नः मनागीषत्किमपि त्यज मुंच कार्पण्यमकुर्वन्देहीत्यर्थः किंतु नस्त्वजनहृद्रोगाणां यदतिगोप्यं निषूदनं नाशकं मौषधं
तत्त्वमेव वेत्सीति गूढाभिप्रायं १८ अतिप्रेमचर्षितान्दृदयस्था हुः यदिति हे प्रिय ते तवातिसुकुमारं पदाब्जं कठिनेषु स्तनेषु मर्दनशंकिताः श
नैर्दधीमहि धारयेम वयं तेनाटवीमटसि नयसीति पाठे पश्य त्वा कांचिदन्यां वा आत्मानमेव वा नयसि प्रापयसि तत्र तत्स्वत्पदाब्जं युक्ष्म

व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं · त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं।
१८ यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु · तेनाटवीमटसि तद्व्यथते न किं स्वित्कू
र्पादिभिर्भ्रमति धीर्भवदायुषां नः १९। इति श्रीभागवते दशमस्कंधे रासक्रीडायामेकत्रिंशत्तमः ३१ शुक उवाच
इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा रुरुदुः सुस्वरं राजन्कृष्णदर्शनलालसाः १ तासामाविरभूच्छौरिः स्मयमा
नमुखांबुजः पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः २॥ कूर्पादिभिः सूक्ष्मपाषाणादिभिः किं स्विन्न व्यथते कथं तु नाम न व्य
थते इति भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति १९ इति दशमे टीकायां ३१ द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः ते
त्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् १ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः सदयं नंदयन्गोपी रुद्धतो नंदनंदनः २ गोप्य इति
इत्येवं प्रकृष्टं चित्रधा अनेकधा प्रेमयुक्तं सुस्वरं उच्चैः कृष्णदर्शने लालसा अतिस्पृहा यासां ताः १ साक्षान्मन्मथमन्मथः जगन्मोहनस्य का

रामः
१७०

462

मन्थः कर चरणादयः ३ अंजलिना संहतहस्तद्वयेन ४।५ भ्रुकुटिमाबद्ध्वा कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला वि
वशा दष्टाधरोष्ठाः कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैस्ताडयंतीव ६ सत दृग्भ्यां अनिमिषंतीभ्यामनिमीलंतीभ्यां दृग्भ्यामापीत
मपि पुनः पुनर्जुषाणा नातृप्यत् ७ हृदिकृत्य हृदयमावेश्येत्यर्थः ८ प्राज्ञमीश्वरं प्राप्य यथा मुमुक्षवो जनाः यद्वा प्राज्ञं व्रजस्थं

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ३ काचित्करांबुजं शौरेर्जगृ
लि हेंऽजलिना मुदा काचिद्दधार तद्बाहुमंसे चंदनभूषितं ४ काचिदंजलिनागृह्णात्तन्वी तांबूलचर्वितं एका तदंघ्रि
कमलं संतप्ता स्तनयोरधात् ५ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ६ अप
रानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ७ तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमी
ल्य च पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ८ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः जहुर्विरहजं तापं
प्राज्ञं प्राप्य यथा जनाः ९ ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा १०
य ताः समादाय कालिंद्या निर्विश्य पुलिनं प्रभुः विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ११॥

463

सोऽपि तं प्राप्य यथा विश्वतैजसावस्था जीवाः ९ पुरुषः परमात्मा शक्तिभिः सत्वादिभिर्यथा यद्वा उपासकः पुरुषोऽत्र नवलवीर्यादिभिः प्राप्य यथा संसारिणः यद्वा प्राज्ञं
यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्वृतो यथा व्यरोचत इति १० विकसत्कुंदमंदारैः सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिंस्तत ११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
१०१

शरच्चंद्रांशवस्तेषां संदोहैः समूहैर्ध्वस्तं दोषातमः रात्रितमो यस्मिंस्तच्छिवं सुखकरं दृलतरंगैः परिचिता आ समंतात् कोमला वालुका यस्मिन्नेवंभूतं पुलिनं ताः समदायनिविश्य तत्र ताभिर्हृष्टो नो धिकं व्यरोचतेति पूर्वेणान्वयः १२ तासां मनोरथानामंतं ययुः पूर्णकामा वभूवुः श्रुतयो यथेति यमर्थः यथा कर्मकांडे श्रुतयः परमेश्वरमपश्यंत्यस्सकामानुबंधेरपूर्णा एव भवंति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामानुबंधं जहतितद्वदिति आप्तकामा अपि प्रेमणा तमभजन्नित्याह स्वैरिति अचीक्लृपन् रचयामासुः आत्मबंधवे तस्मै १३ गोपीसमागत ४८

त्य

शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं। कृष्णाया हस्ततरलाचितकोमलवालुकं १२ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः। स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः। चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् १४ सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा। संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे १५ गोपिका ऊचुः। भजतोनुभजंत्येके एक एतद्विपर्ययं। नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भो १६॥ ॥ ताभिः संमानितः स

न्न चकास शुशुभे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधद्दर्शयन् १४ सहासस्लीलेक्षणेन विभ्रमो विलासो य स्यास्तया भ्रुवा उपलक्षिताः संस्पर्शनेन संमर्दनेन १५ तत्र भगवतो रुतज्ञतां तद्वचनेनैवोपपादयितुकामा गूढाभिप्रायेणाहुः कृतं तातमिवपृच्छंति भजत इति भजंतं प्राणिनोनंतरं केचित्तज्जनानुसारेण भजंति केचिद्विपर्ययं यथा भवति तथा तद्भज

राम:
१०१

विरक्षांप्राय उत्तरमाह मिथ इति हे सख्यः प्रत्युपकारतया ये मिथो भजंति ते न्यं न भजंति किं त्वात्मानमेव कुतः हि यस्मात्स्वार्थ एवैकांत उद्यमो येषां ते तत्र च न सौहृदं मनो न सुखं न च धर्मो हृष्ट उद्देशात्क्रोमद्विचादि भजनवदित्यर्थः १७ ये त्वभजतो भजंति ते द्विधा करुणाः स्निग्धाश्च तत्र तु यथानुक्रमं धर्मो मैत्री भवत इत्याह भजंत्यभजत इति १८ तृतीयप्रश्नस्योत्तरं भजतोपीति अयमर्थः ते चतुर्विधाः एके आत्मारामाः अपरा कृहशाः केचिदाप्तकामाः विषयदर्शनेपि पूर्णकामत्वेन भोगेच्छारहिताः अन्ये अकृतज्ञाः संमूढाः अन्ये गुरुद्रुह इति कठिनास्पितायस्तु वोध्यव

श्रीभगवा
नुवाच मिथो भजंति हे सख्यः स्वार्थैकांतोद्यमा हि ते। न तत्र सौहृदं धर्मः स्वात्मानं तद्धि नान्यथा १७ भजंत्यभजतो ये वै करुणाः पितरो यथा। धर्मो निरपवादोत्र सौहृदं च सुमध्यमाः १८ भजतोपि न वै केचिद्भजंत्यभजतः कुतः। आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः १९ नाहं तु सख्यो भजतोपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये। यथाधनो लब्धधने विनष्टे तच्चिंतयान्यन्निभृतो न वेद २० एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेबलाः। मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रियाः २१॥ ॥ इति न्यायादपकर्तारौ कल्पयंत्यो हृदुः संनिनत्याते १९ अत्र च र

१०१ मको ठिंगतं आत्मानं मत्वा किंसंकोचैः परस्परं गूढस्मितपुरवीस्ताः दृष्ट्वा आह नाहमिति हे सख्यः अहं तेषां मध्ये न कोपि किं तु परमका रुणिकः परमसुहृच्च कथं अमीषां भजतां अनुवृत्तिर्जनये निरंतरध्यानप्राप्त्यर्थं ता न भजामि तत्र दृष्टांतमाह यथेति निर्धन सो वचि तया निभृतः पूर्णो व्याप्तवृत्तिः पूर्ववदन्यत्क्षुत्पिपासादि न वेद २० एवं मदर्थोज्झितलोकवेदस्वानां मदर्थोज्झितो लोको कंचु कायुक्ताप्रतीत्तगाहृदः धर्माधर्मप्रतीक्षणोत्स्वरातय अस्तु त्यागो याभिस्तासां वो युष्माकं परोक्षमदर्शनं यथा भवति तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
१०१

464

शरच्चंद्रांशवस्तेषां संदोहैः समूहैर्ध्वस्तं दोषातमः रात्रितमो यस्मिंस्तत् शिवं सुखकरं हस्ततरलैस्तरंगै रचिताः आस्तृताः कोमला वालुका यस्मि
न्नेवंभूतं पुलिनं ताः समादाय निर्विश्य तत्र ताभिः सह तेनाधिकं व्यरोचतेति पूर्वेणान्वयः १२ ताश्च मनोरथानामंतं ययुः पूर्णकामा बभूवुः श्रुतयो
य यथेयमर्थः यथा कर्मकांडे श्रुतयः परमेश्वरमपश्यंत्यस्तत्कामानुबंधेरणा एव भवंति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः का
मानुबंधं जहति तद्वदिति आप्तकामा अपि प्रेम्णा तमभजन्नित्याह स्वैरिति अचीक्लृपन् रचयामासुः आत्मबंधवे तस्मै मित्राय १३ गोपीसमागत

शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं कृष्णाया हस्ततरलाचितकोमलवालुकं १२ तद्दर्शनाह्लादविधूतहृद्रुजो मनो
रथांतं श्रुतयो यथा ययुः स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टो भगवान्स ई
श्वरो योगेश्वरांतर्हृदि कल्पितासनः चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् १४ सभाजयि
त्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे १५
गोपिका ऊचुः भजतोऽनुभजंत्येके एक एतद्विपर्ययं नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भो १६॥ ,, ताभिः संमानितः स

न्नु चकास शुशुभे त्रैलोक्यलक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधत् दर्शयन् १४ सहासलीलेक्षणेन विभ्रमो विलासो य ,,
स्यास्तया भ्रुवा उपलक्षिताः संस्पर्शनेन संमर्दनेन १५ तत्र भगवतो रुतः स्नानां तद्वचनेनैवोपपादयितुकामा गूढाभिप्रायेणाहुः
कहतं तमभिवर्त्तकं ति भजत इति भजंतः प्राणिनोऽन्वनंतरं केचित्तद्भजनानुसारेण भजंति केचिद्विपर्ययं यथा भवति तथा तद्भज

रामः
१०१

465

विक्षिप्य प्राय उत्तरमाह मिथ इति हे सख्यः प्रत्युपकारतया ये मिथो भजंति ते स्वयं न भजंति किं त्वात्मानमेव कुतः हि यस्मात्स्वार्थ एवैकांत उद्यमो ये
षां ते तत्र च न सौहृदं न तु धर्मो हि स्वउद्देशात्प्रेमादिव्यादिभजनवदित्यर्थः १७ ये त्वभजतो भजंति ते द्विधा करुणाः स्निग्धाश्च तत्र तु
यथानुक्रमं धर्मके मौ भवत इत्याह भजंत्यभजत इति १८ तृतीयप्रश्नस्योत्तरं भजतोपीति अयमर्थः ते चतुर्विधाः केचिदात्मारामाः अपरा कृतदृशः
केचिदाप्तकामाः विषयदर्शनेपि तत्रैकामत्वेन भोगेच्छारहिताः अन्ये अकृतज्ञाः संमूढाः अन्ये गुरुद्रुहः अतिकठिनाः पितापयस्तु ...

श्रीभगवानुवाच मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते न तत्र सौहृदं धर्मः स्वात्मानं तद्धि नान्यथा १७ भजंत्यभज
तो ये वै करुणाः पितरो यथा धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः १८ भजतोऽपि न वै केचिद्भजंत्यभजतः कुतः आ
त्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः १९ नाहं तु सख्यो भजतोऽपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये यथाधनो
लब्धधने विनष्टे तच्चिंतयान्यन्निभृतो न वेद २० एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः मया
परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रियाः २१॥

,, इति न्यायादुपकर्तॄन्गुरुकल्पांस्तेभ्यो द्रुह्यंति तथा ते १९ अत्र च र
मक्तोढिगतं आत्मानं मत्वा हसितसंकोचैः परस्परं गूढस्मितमुखवीक्षाह दृष्ट्वा आह नाहमिति हे सख्यः स्य हेतेषां मध्ये न कोपि किंतु परमका
रुणिकः परमसुहृच्च कथं अमीषां भजतां अनुवृत्तिवृत्तये निरंतरध्यानप्राप्त्यर्थं तान भजामि एतु सहष्टांतमाह यथेति तत्स्य धन से
वचिंतया निभृतः पूर्णो व्याप्तवृत्तिः पूर्ववदन्यत्क्षुत्पिपासाद्यपि न वेद २० एवं मदर्थोज्झितलोकवेदस्वानां मदर्थोज्झितो लोको वेदश्च
स्वा युक्तायुक्तप्रतीक्षणं हृदः धर्माधर्मप्रतीक्षणं स्वज्ञातयश्च तैर्हत्यागाद्याभिस्तासां वो युष्माकं परोक्षमदर्शनेन यथा भवति तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क३

भा॰द॰पु॰ आस्तामिदं परमार्थं शृणुतेत्याह नेति निरवद्यसंयुजां निरवद्यः संयुक् संयोगो यासां तासां वो विबुधायुषापि चिरकालेनापि स्वीयं साधुकृत्यं
१०२ प्रत्युपकारं कर्तुं न पारये न शक्नोमि कथंभूतानां या मा भजन् दुर्जरा अजरायाः गृहशृङ्खलाः ताः संवृश्च्य निःशेषं छित्वा मां भजन्ते स्म च
नं तु बहुप्रेमयुक्तया नैवमेव निःशेषं तस्मात् युष्माकमेव साधुकृत्येन तत् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु युष्मत्सौशील्येनैव मे
मानृण्यं न तु मत्प्रत्युपकारेणेत्यर्थः २२ इति दशमे टीकायां ३२। त्रयस्त्रिंशे ततो गोपीमण्डलमध्यगो हरिः। प्रियास्ता रमयामास सह्लादिनीव

न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः। या माभजन्दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना २२ 466
इति भा॰ दशमे रासक्रीडायां द्वात्रिंशः ३२ शुक उवाच इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः जहुर्विरहजं तापं तदं
गोपचिताशिषः १ तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः २ रासोत्स
वः संप्रवृत्तो गोपीमण्डलमण्डितः योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ३ प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः
॥ यं मन्येरन्नभस्तावद्विमानशतसंकुलम् ४॥

नकेलिभिः १ तत्तदा अङ्ग हे राजन् यद्वा तस्य भगवतोऽंशेन वपुषा करचरणाद्यवय
वैर्वा उचिताः समृद्धाः आशिषो यासां ताः १ रासक्रीडा रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषस्तां क्रीडामन्योन्याबद्धाः संग्रथिता बाहवो
येषां तैः सह २ तत्साहित्यमभिनयेन दर्शयति रासोत्सव इत्यर्धचतुष्टयाधिकेन सार्धेन तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्र
आ विष्टेन तेनैव कण्ठे गृहीतानामुभयतोऽलिङ्गितानां कथंभूतेन यं सर्वाः स्त्रियः स्वस्वनिकटं मामेवाश्लिष्टवानिति मन्येरन् एतदर्थं द्वयो
र्द्वयोर्मध्येन प्रविष्टेनेत्यर्थः नन्वेकस्य कथं तथा प्रवेशः सर्वसन्निहितत्वे बाह्यतः स्वनिकटत्वाभिमानस्तासामित्येतदुक्तं योगेश्वरेणेति रासः
अचिन्त्यशक्तिनेत्यर्थः ३ तावन्नभः सामवाप्यौत्सुक्यव्याप्तमनसां सस्त्रीकाणां देवानां विमानपातैः संकीर्णं नभो बभूव ४॥ १०२

५ सप्रियाणां कृष्णसहितानां तुमुलः संकीर्णः ६ महामरकतो नीलमणिर्विहेमानां मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीद्वयमि
प्राये विनैव मध्यपदाहृतिमेकवचनं ७ स्वयथा ताभिर्विरेजे ना अर्पितेन विरेजुरित्याह पदन्यासैरिति भुजविधुतिभिः करचालनैः भज्यमाने
मध्यश्चलद्भिः कुचैश्च पटैश्च गण्डलोलैः गण्डेषु चञ्चलैः स्विद्यन्मुख्यः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कबरेषु रसनासु ग्रन्थयो
हठाद्यासां ताः यद्वा तेषु तासु च ग्रन्थयः शिथिलग्रन्थय इत्यर्थः तत्र नानामूर्तिः कृष्णो मेघचक्रमिव तास्तु विद्युद्धारान्वित इव स्वेदस्तु वारिमिव गी

दिवौकसां सदाराणामौत्सुक्यनिभृतात्मनां ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ५ जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलं 467
वलयानां नूपुराणां किंकिणीनां च योषितां ६ सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः
मध्ये मणीनां हैमानां महामरकतो यथा ७ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्ड
लोलैः स्विद्यन्मुख्यः कबररसनाग्रन्थयः कृष्णवध्वो गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ८ उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रि
याः कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ९ काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति
तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् १० काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः जग्राह बाहुना स्कन्धं श्लथद्वल
तं गर्जितमिव ८ नृत्यमाना नृत्यन्त्यः रक्तकण्ठ्यः कृष्णस्याभिमर्शेन मुदिताः इदं विश्वं ९ मुकुन्देन सह स्वरजातीः षड्जादिस्वरालापगतीरमिश्रिताः
कृष्णोन्नीताभिरसंकीर्णाः प्रीयमाणेन संमानिताः तत्रात्युन्नयनमेव ध्रुवं ध्रुवाख्यतालविशेषं रूपेणोन्निन्ये उन्नीतवती १० एवं नृत्यगीता
दिना श्रीकृष्णसंमानितानां तासां मनःप्रीतिविलासितेयं तमाह काचिदिति सार्धैस्त्रिभिः कलया निर्माल्यिकाश्रयस्योसो ११

भा॰द॰पू॰
१०३

उत्पलस्यैसौरभमिवसौरभंयस्यतंबाहुं १२ नाट्येननृत्येनविक्षिप्तयोश्चंचलयोःकुंडलयोस्त्विषात्विषामंडितंगंडकपोलंतथाभूतेस्वगंडे
संदधत्याःसंयोजयंत्याः १३ कूजंतिनूपुराणिमेखलाश्चयस्याःसा १४ एवमन्यापिगोप्योयथाप्रायसंघेनानाविधमेवैर्जह्रुरित्याह १५ तत्रवारं के
षुगायकेषुसवनीकेषुगंधर्वकिंनरादिषुरसावेशेनमृदंगसुनृत्यत्सुचान्यासेवायाद्विसंपत्तिदर्शयन्रासस्वसंभ्रममाह कर्णोत्पलेति केशे

तत्रैकांसगतंबाहुंकृष्णस्योत्पलसौरभंचंदनालिप्तमाघ्रायहृष्टरोमाचुचुंबह १२ कस्याश्चिन्नाट्यविक्षिप्तकुंड
लत्विषमंडितंगंडंगंडेसंदधत्याःप्रादात्तांबूलचर्वितं १३ नृत्यतीगायतीकाचित्कूजन्नूपुरमेखलापार्श्वस्था
च्युतहस्ताब्जंश्रांताधात्स्तनयोःशिवं १४ गोप्योलब्ध्वाच्युतंकांतंश्रियएकांतवल्लभंगृहीतकंठ्यस्तद्दोर्भ्यांगा
यंत्यस्तंविजह्रिरे १५ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैःगोप्यःसमं
भगवतानन्नृतुःस्वकेशस्त्रस्तस्रजोभ्रमरगायकरासगोष्ठ्यां १६ एवंपरिष्वंगकराभिमर्शस्निग्धेक्षणोद्दा
मविलासहासैः रेमेरमेशोव्रजसुंदरीभिर्यथार्भकःस्वप्रतिबिंबविभ्रमः १७॥ कर्णोत्पलेश्चालकविटंकैश्चालकालंकृतैः कपो
लैश्चघर्मैश्चवक्त्रेषुश्रीःशोभायासांताःघोषाःकिंकिण्यःवलयनूपुरघोषैर्वा द्यैर्वादित्रैःस्वकेशेभ्यःस्रस्ताःस्रजोयासांताःएतेनताल्ग
तिसंस्तुताःकेशाःशिरसःकंपपादेषुपुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितं भगवतासहनन्नृतुः केभ्रमराएवगायकायस्यांरासगोष्ठ्यां १६
यथागोप्योनानाविधैर्भगवतासमंविजह्रुःएवंश्रीभगवतानपिस्वविलासैस्ताभिःसहरेमेइत्याह एवमितितद्विलासानभिज्ञस्तस्येवरतोदृष्टांतः
यथार्भकःस्वप्रतिबिंबैर्विभ्रमःक्रीडायस्यसऽपूर्वानेनतद्दर्शितंस्वीयैमेवसर्वंकलाकौशलमेषांगंधमात्रमेवमाधुर्यादितानुसंधार्यताभिःसह
राम॰ १०३

468

तास्तुभगवद्विलासैराकुलाबभूवुरित्याह तदंगेति नस्यांगसंगेनप्रहृष्टमुत्कंठस्तयाश्चाकुलाश्चाकुलान्वै शानींद्रियाणियासांताःविक्षिप्ता
न्केशादीनंसाधनिव्योढुंयथापूर्वंधर्तुंनालंसमर्थाबभूवुःविघ्नस्तानिमालाभरणानिचयासांताः १८ नकेवलंताएवाकुलेंद्रियाःकिंतुदेव्या
पीत्याहुः हस्मविक्रीडितमितिकिंचशशांकस्त्वस्यनेत्रैर्वैतत्स्वचितंशशांकेनविस्मितेनगतोविरतस्तायांततःप्राक्तनाःसर्वेपिग्रहास्तत्रतत्रैवत
स्थुःतत्मश्चादीर्घासुरात्रिषुयथासुखंविजह्रुरितिभावः किंचहेलेत्यादियंभावःकात्यायनिमहामायेमाहायोगिन्यधीश्वरिनंदगोपसुतंदेविप

तदंगसंगप्रमदाकुलेंद्रियाःकेशान्दुकूलान्कुचपट्टिकांवा नांजःप्रतिव्योढुमलंव्रजस्त्रियोविस्रस्तमालाभ
रणाःकुरुद्वह १८ कृष्णविक्रीडितंवीक्ष्यमुमुहुःखेचरस्त्रियः कामार्दिताःशशांकश्चसगणोविस्मितोभव
त् १९ कृत्वातावंतमात्मानंयावतीर्गोपयोषितः रेमेसभगवांस्ताभिरात्मारामोपिलीलया २० तासामतिवि
हारेणश्रांतानांवदनानिसः प्रामृजत्करुणःप्रेम्णाशंतमेनांगपाणिना २१ गोप्यःस्फुरत्पुरटकुंडलकुंतल
त्विड्गंडश्रियासुधितहासनिरीक्षणेन मानंदधत्यऋषभस्यजगुःकृतानिपुण्यानितत्कररुहस्पर्शप्रमोदाः

पतिंमेकुरुतेनमःइतिप्रत्येकंताभिःप्रार्थनाद्भगवतापियावतीर्वल्लवकुजंस्त्रियोमयेमारंस्यथक्षपाइतितथेवप्रतिश्रुतत्वात्तावंतमात्मानं
कृत्वातानिरेमे इतियावतीःयावत्यः २० कृपातिशयमाहतासामितिहेअंगस्पर्शंतमेनसुखतमेन २१ ततोतिहृष्टानांगोपीनांचरितमाहगो
मानंदधत्यःपूजांकुर्वन्त्यःतत्कर्माणिजगुःतस्यकररुहेर्नखैःस्पर्शेनप्रमोदोयासांताः॥ २२॥ श्रीरामायनमः॥ श्रीकृष्णायनमः

469

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ जलकेलिमाह ताभिरिति तासामंगसंगेन दृष्टा संमर्दिता या स्वकृतस्या अतएव तासां कुचकुंकुमेन रंजितायाः संबंधिभिर्गंधर्वेरि
भिर्गंधर्वपा गंधर्वपतय इव गायंतो ये अलयस्तैरनुद्रुतोनुगतः सः कृसो वा उदकमाविशत् भिन्नसेतुर्विदारितवप्रः स्वयं चातिक्रांत
लोकवेदमर्यादः २३ स्वरतिः आत्मारामोप्यत्र गोपीमंडलेऽभूत्स वा स्थलजलक्रीडे दर्शिते २४ वनक्रीडां दर्शयति ततश्चेति यमुना
या उपवने जलस्थलप्रसूनानां गंधो यस्मिंस्तेनानिलेन जुष्टानि दिशातटान्यंता यस्मिन्यद्वा दिशाश्च तटं स्थलं च यस्मिंस्तस्मिन्वने ४७०

ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स कुचकुंकुमरंजितायाः। गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो ग
जीभिरिभराडिव भिन्नसेतुः २३ सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग। वैमानि
कैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः २४ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिल
जुष्टदिक्तटे। चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः २५ एवं शशांकांशुविराजिता नि
शाः स सत्यकामोनुरताबलागणः। सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः २६
राजोवाच संस्थापनाय धर्मस्य प्रशमायेतरस्य च। अवतीर्णो हि भगवानंशेन जगदीश्वरः॥ २७॥

भृंगाणां प्रमदानां च गणैरावृतः २५ रासक्रीडानिगमनं एवमिति सः कृष्णः सत्यसंकल्पोऽनुरागी स्त्रीकदंबं यस्य सः एवं सर्वा नि
शाः सेवितवान् शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः यद्वा निशा इति रामः
द्वितीयांत्यंतसंयोगे शृंगाररसाश्रयाः शरदीति सिद्धाः काव्येषु याः कथास्ताः सिषेव इति एवमप्यात्मन्येव अवरुद्धः सौरतः चरम १०४
दि१

प्रतीपं प्रतिकूलमधर्ममित्यर्थः आचरत्कृतवान्नचेदधर्ममात्रं कल्लेजमहरणादिवत्तर्हि तु महासाहसमित्याह परदाराभिमर्शनमिति २८
आप्तकामस्य नायमधर्म इति चेद्यद्येवं कामाभावान्निंदिते केनाभिप्रायेण कृतवानिति पृच्छति आप्तकाम इति २९ परमेश्वरे कै
मुत्यन्यायेन परिहर्तुं समान्यतो महतां वृत्तमाह धर्मव्यतिक्रमः इति साहसं च दृष्टं प्रजापतींद्रसोमवरुणादीनां तत्र तेषां तेजस्वि
नां दोषाय न भवतीति ३० तर्हि यद्यदाचरति श्रेष्ठ इति न्यायेनान्योपि कुर्यादित्याशंक्याह नैतदिति अनीश्वरो देहादिपरतंत्रः य

स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता। प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं २८ आप्तकामो यदुपतिः कृत ४७१
वान्वै जुगुप्सितं। किमभिप्राय एतन्नः संशयं छिंधि सुव्रत २९ शुक उवाच धर्मव्यतिक्रमो दृष्ट ईश्वराणां
२च च साहसं। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ३० नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः। विनश्यत्या
चरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषं ३१ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित्। तेषां यत्स्ववचोयुक्तं बुद्धिमां
स्तत्समाचरेत् ३२ कुशलाचरितेनैषामिह स्वार्थो न विद्यते। विपर्ययेण चानर्थो निरहंकारिणां प्रभो ३३
किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसां। ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः॥ ३४॥

चारुद्रव्यतिरिक्तोऽविषं जुषन्भक्षयन् ३१ कथं तर्हि सदाचारस्य प्रामाण्यमत आह ईश्वराणामिति तेषां वचः सत्यं अतस्तदुक्तमाचरे
देव आचरितं तु क्वचित्सत्यं अतः स्ववचोयुक्तं तेषां स्ववचसा यदुक्तं अविरुद्धं तदेवाचरेत् ३२ ननु तर्हि तेपि किमेवं साहसमाचरंति
कुशलेति प्रारब्धकर्मक्षपणमात्रमेव तेषां कृत्यं नान्यदित्याह ३३ प्रस्तुतमाह किमुतेति कुशलाकुशलान्वयो न विद्यते इति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एतदेव स्फुटीकरोति यत्पादपंकजपरागस्य निषेवैव तेन तृप्ता यद्वा यस्य पादपंकजपरागनिषेवा येषां तेन तथा ते च तृप्ता इति मक्तार्द
त्पर्यः तथा ज्ञानिनश्च तर्ह्यमानाः बंधनमप्राप्नुवंतः ३५ परदारत्वं गोपीनामंगीकृत्य परिहृतं इदानीं भगवतः सर्वांतर्यामित्वेन प
रदारत्ववार्तैव नास्ति न कांचिदित्याह गोपीनामिति योंतश्चरति अध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडनेन देहभाक् न तु अस्मदादिवत्ता
येन दोषः स्यादिति ३६ नन्वेवं चेदाप्तकामस्य निंदितेषु कुतः प्रवृत्तिरित्याह अनुग्रहायेति शृंगाररसाकृष्टचेतसोतिबहिर्मुखानपि

यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः स्वैरं चरंति मुनयोपि न नह्यमाना
स्तस्येच्छयात्तवपुषः कुत एव बंधः ३५ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां योंतश्चरति सोध्यक्षः
क्रीडनेनेह देहभाक् ३६ अनुग्रहाय भूतानां मानुषं देहमास्थितः भजते तादृशीः क्रीडा याः श्रुत्वा तत्
परो भवेत् ३७ नासूयन् खलु कृष्णाय मोहितास्तस्य मायया मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दा
रान् व्रजौकसः ३८ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः अनिच्छंत्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः
३९ विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद्यः भक्तिं परां भगवति प्रतिलभ्य
कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ४० इति श्रीभा॰ दशमे रासक्रीडायां रासपंचाध्यायी समाप्ता

स्वपरान् स्वाधीनान् कर्तुमिति भावः ३७ ननु अन्येपि भिन्नाचाराः स्वचेष्टितमेवेति वदंतीति तत्राह नासूयन्निति एवंभूते स्वयी भावेन तथा कुर्व
न्त्या पापाकेत्याकृत्यकैः ३८ ब्रह्मरात्रे ब्राह्ममुहूर्ते उपावृत्ते प्राप्ते ३९ भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह रामः
विक्रीडितमिति अचिरेणाधीरः सन् हृद्रोगं काममाश्वपिहिनोति परित्यजतीति ४० इति श्रीपरमानंदसेविश्रीधरनिर्मिता श्रीभाग १०५

चतुस्त्रिंशे हिना ग्रस्तं नंदं हरिरमूमुचत् विद्याधरं चांगिरसः शापाच्चक्रं च वृकमथावधीत १ तां सुप्ते देशतः कामं किं करोत्यकामतः अनुगृह्य
न्वशं निन्ये तथा विद्याधराधिपं २ तदेवं कामानुग्रहमुखेन कामविजयं प्रतिपाद्य तथैव विद्याधराधिपविजयं प्रतिपादयितुं तत्प्रसंगमे
र्शयति एकदेति १।२ गावः गाः मध्वन्नं मधुसहितान्नं देवः पशुपतिः ३ जलमात्रं प्राश्य धृतव्रताः उपोषिताः तां निशां तत्र ऊषुर्न्यवसन् ४

शुक उवाच एकदा देवयात्रायां गोपाला जातकौतुकाः अनोभिरनडुद्युक्तैः प्रययुस्तेंबिकावनं १ तत्र स्ना
त्वा सरस्वत्यां देवं पशुपतिं विभुं आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंबिकां २ गावो हिरण्यं वासांसि मधु मध्व
न्नमादृताः ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ३ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः रजनीं तां
महाभागा नंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन् विपिनेतिबुभुक्षितः यदृच्छयागतो नंदं शया
नमुरगोग्रसीत् ५ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ६
तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ७ अलातैर्दह्य
मानोपि नामुंचत्तमुरंगमः तमस्पृशत्पदाभ्येत्य भगवान् सात्वतां पतिः ८ स वै भगवतः श्रीमत्पादस्पर्शह
ताशुभः भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितं ९ तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं दीप्यमानेन व

महानहिरजगर उरगः सागच्छंतीत्यलक्षितत्वमुक्तं अग्रसद्ग्रासमकरोत् ५।६ विव्यधुस्ताडयामासुः उल्मुकैर्ज्वलत्काष्ठैः ७ अला
तैस्तैरेव ८ विद्याधरैरर्चितं पूजितं ९ गोपेष्वात्मनः ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृच्छत् दीप्यमानेन वपुषा समवस्थितं १०

यः परयाशोभया प्रकाशते स भवान्क इति ११।१२ प्राहसमुपहसितवानस्मि प्रलब्धै रूपदर्पितैः मदीयेनैव पापेनानितेन १३ य
यतः शापात् १४ आपृच्छे स्वं लोकं गंतुमनुज्ञां याचे अमीवहन्दुःखनाशन १५।१६।१७।१८।१९।२०।२१ अहिदेहं निहत्येव प्रागुक्त

कोभवान्परया लक्ष्म्या रोचतेद्भुतदर्शनः कथं जुगुप्सितामेतां गतिं वा प्रापितोवशः ११ विद्याधर उवाच अहं
विद्याधरः कश्चित्सुदर्शन इति श्रुतः श्रिया स्वरूपसंपत्त्या विमानेनाचरन्दिशः १२ ऋषीन्विरूपानांगिर
सः प्राहसं रूपदर्पितः तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना १३ शापो मेनुग्रहायैव कृतस्तैः करुणा
भी त्मभिः यदहं लोकगुरुणा पादस्पृष्टो हताशुभः १४ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं आपृच्छे शाप
निर्मुक्तः पादस्पर्शादमीवहन् १५ प्रपन्नोस्मि महायोगिन्महापुरुष सत्पते अनुजानीहि मां देव सर्वलो
केश्वरेश्वर १६ ब्रह्मदंडाद्विमुक्तोहं सद्यस्तेच्युत दर्शनात् यन्नाम गृह्णन्निखिलान्श्रोतॄनात्मानमेव च
१७ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते १८ शुक उवाच इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य च सु
दर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः १९ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्तदा
समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः २० कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः वि
जह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां २१ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः स्वलंकृतानुलि- प्ताङ्गौ स्रग्विणौ विरजोम्बरौ ॥२२॥

तं सुदर्शनेन हत्वा मोक्षितं सः शंखचूडमताडयत तत्र संगमाह कदाचिदिति २१ विरजो वराविति विरजसी अंबरे निर्मले ययोस्तौ २२

किंच निशाप्रवेशं मानयंतौ उदिता उडुपताराश्च यस्मिंस्तं मल्लिकागंधेन मत्ता अलयो यस्मिंस्तत् २३ आलिनिबद्धत्वादन्यैर्युगपत्कल्पयि
तुमशक्यमपि तौ स्वरमंडलमूर्छितं युगपत्कल्पयंतौ मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुः आयतामिति २४ तामूर्छितास्तल्लीना विरेजुः

निशामुखं मानयंतावुदितोडुपतारकं मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना २३ जगतुः सर्वभूतानां मनःश्र
वणमंगलं तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितं २४ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप स्रंसद्दुकूल
श्यु मात्मानं स्रस्तकेशस्रजं ततः २५ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् शंखचूड इति ख्यातो धनदानुचरोभ्य
गात् २६ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनं क्रोशंतं कालयामास दिश्युदीच्यामशंकितः २७ क्रोशंतं कृष्ण
रामेति विलोक्य स्वपरिग्रहं यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां २८ मा भैष्टेत्यभयारावौ शालहस्तौ
तरस्विनौ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं २९ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् विसृज्य
स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ३० तमन्वधावद्गोविंदो यत्र यत्र स धावति जिहीर्षुस्तच्छिरोरत्नं तस्थौ
रक्षन्स्त्रियो बलः ३१ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः जहार मुष्टिनैवांग सहचूडामणिं विभुः ३२

तारामाः स्रंसद्भ्रश्यद्दुकूलं यस्मात्तमात्मानं देहं स्रस्ताः केशेभ्यः स्रजो यस्य तं च ततो नाविदन् २५।२६ निरीक्षतोर्निरीक्षमाणयोस्तयोर्ना
थो यस्य तं कालयामास हठात्प्रेरयामास २७ गा इव संगता दस्युना व्याघ्रेण २८ मा भैष्ट भयं मा कुरुतेत्यभयरावौ २९।३० शिरसा सह चूडामणिं जहारेत्यर्थः ॥ ३१ ॥ ३२ ॥ श्रीकृष्णः

474
475
CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३३ इति दशमे टीकायां ३४ पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः युग्मश्लोकानुगीतेन निन्युर्दुःखेन वासरान् १ एवं रात्रिषु श्रीकृष्णे
न स्वैरं अभिरमितानां दिवा तद्विरहितानां तदनुगीतेन दिननिस्तारप्रकारमाह गोप्य इति दुःखेन कृष्णे गतेति हृदुक्त वामकपोल इत्यादीनि
द्वादश युगलानीति २ हे गोप्यः वामबाहौ कृतः न्यस्तो वामकपोलो येन सः वल्गितेन नर्तिते भ्रुवौ येन स वल्गितभ्रूः मुकुंदः अध
रे अर्पितं कोमलाभिरंगुलिभिराश्रितमार्गं स्वरच्छिद्राणि यस्य तं यत्र यदा ईरयति वादयति २ तदा व्योमयानवनिताः सिद्धैः स

शंखचूडं निहत्यैवं मणिमादाय भास्वरं अग्रजायाददत्प्रीत्या पश्यंतीनां च योषितां ३३ इति भा॰ दशमे शंखचू
ड वधस्त्रयस्त्रिंशोध्यायः ३४ शुक उवाच गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः कृष्णलीलाः प्रगायंत्यो
निन्युर्दुःखेन वासरान् १ गोप्य ऊचुः वामबाहुकृतवामकपोलो वल्गितभ्रूरधरार्पितवेणुं कोमलांगु
लिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः २ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य स
लज्जाः काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ३ हंत चित्रमबलाः शृणुतेदं हारहास उरसि
स्थिरविद्युत् नंदसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ४ श्रीमद्गोपालो जयति तराम्॥ श्रीः।
तचि २

पतिभिः सह वर्तमाना अपि तद्वेणुरवमुपधार्याकर्ण्य प्रथमं विस्मितास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्तास्ततः परवशा इत्यर्थः सलज्जाः स
त्यः कश्मलं मोहं ययुः अत्रास्मिन् अपस्मृता नीव्यो याभिरिति अत एवंभूतस्य कृष्णस्य विरहं कथं तरामः इति सर्वत्रावाक्यशेषः ३ हंत हे अबलाः इदं
चित्रं शृणुत हारहासः हारवद्विशदो हासो यस्य सः यद्वा वेणुवादनेनाधोवदनेन हसतः हारे स्फुरन् हासो यस्य सः यद्वा हारः सहासः इव विपाद
स्फूर्तिर्यस्य सः उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः यर्हि यदा कूजितवेणुः नादितवेणुर्भवति ४ रामायनमो नमो स्तु तस्मै

476

न॰३

तदा व्रजे येवृषा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते आरात् दूरादेव दंतैर्दष्टाः कवला ग्रासा यैस्ते धृता उत्तंभिताः कर्णा यैस्ते निद्रिता इव लिखितचित्रमिवा
सन् विदुषां तिरश्चामिदमतिचित्रमित्यर्थः ५ किं चाचेतनाः सरितस्तदा तीव चित्रमित्याहुः हे आलि सखि बर्हिणां मयूराणां स्तबकैः कामयूरपिच्छैः धातवो गैरि
कादयः पलाशानि पत्राणि तैर्बद्धा आश्रिता मल्लानां परिकरस्तं विडंबयत्यनुकरोति तथा मुकुंदो गोपैः सह वेणुनेत्युपतनमत्रापि यत्र यदा गाः
समाह्वयति तर्हि तदा ध्वनिश्रवणादेव लेनेनीतं तत्पादांबुजरजः स्पृहयंत्य इव भग्नगतयः सरितो वै निश्चितं वयमिव तामप्यबहुपुण्याः यतो न प्राप्नुवंति के

वृंदशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् दंतदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ५ बर्हिणस्त
बकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः कर्हिचित्सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुंदः ६ तर्हि भग्नगत
यः सरितो वै तत्पदांबुजरजोनिलनीतं स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ७ अनुच
रैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः वनचरो गिरितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ८ वनल
तास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ९

वलं प्रेम्णा वेपिताः कंपिताः भुजास्तरंगा यासां ताः स्तिमिता जला भवंतीति ७ स्थावरेष्वपि अतिचित्रं दृश्यते इत्याहुः अनुचरैर्गोपैर्बलादिभिर्वा मुग्धा
नां बकं आदिपूरुष इवेति अचलभूतिर्निश्चलश्रीर्वेणुनांतर्नाम्ना गा गामेन ८ तदा प्रणता भारेण विटपाः शाखा यासां ताः वनलतालतायस्मि
न्निम्सुप्रकाशेन सूचयंत्य इव मधुधाराः ससृजुः स्मेति विस्मयेन तरव अत एव तयानतपतीनामपि तथैवानंदः इति भावः एतानि विस्मभक्तेल क्षणानि ९

477

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ किंच सरसि कमलवनेषु विहरतां पक्षिणामपि मन आकर्णितद्गीतं किं पुनरन्येषामित्याहुः दर्शनीयतिलक इति दर्शनीयस्तिलको यस्य दर्शनीया
१०८ नां सुंदराणां मध्ये मुख्य इति वा॰ वनमाला सु दिव्यगंधा या तुलसी तस्याः मधुना मत्तैरलिकुलैरलघु उच्चैरभीष्टमनुकूलं गीतमाद्रियन् आदरेण
गृह्णन् यर्हि अधरे संधितवेणुर्भवति १० यर्हि ये सरसि सारसा हंसाः अन्ये विहंगाश्चारुणा गीतेन हृतचेतसः एत्यागत्य हरिमुपासत अभजत तत्स
मीप उपविश्य मुर्वी हंतेति विषादे ११ मेघोपि हरिं सेवत इत्याहुः सह बल इति हे व्रजदेव्यो गोप्यः सह बलः सैमः स्रक्सः स्रग्भिर्निर्मिता अवतंसा 478

दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः अलिकुलैरलघु गीतमभीष्टमाद्रियन् यर्हि संधितवेणुः १० स
रसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ११ सहबलः स्रगवतं
सविलासः सानुषु क्षितिभृतो व्रजदेव्यः हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वं १२ महदतिक्रमणशंकित
चेता मंदमंदमनुगर्जति मेघः सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत् प्रतिपत्रं १३॥ ९ स्यां कर्णभूषणाभ्यां विलासेन
स यद्वा मुक्ताफलस्रगापीडेन विलासो यस्येति क्षितिभृतः सानुषु गिरितटेषु वर्तमानः स्वयं जातहर्षो विश्वं हर्षयन् यदा वेणुरवेणोपरंभति नि
नादयति नादेनापूरयतीत्यर्थः १२ तदा मेघो महतः श्रीकृष्णस्यातिक्रमे शंकितचेता यस्य सः पुनरुपरतो याति न चोच्चैर्गर्जति किंतु तत्रैव स्थितः
२ग सन्वेणुरवमनु मंदं मंदं गर्जति किंच सुहृदं विश्रांतिहरणादिसाम्यात् सुहृत्त्वं तं सुमनोभिरभ्यवर्षत अत्र हर्षेण देवैः क्रियमाणकुसुमवर्षे मेघं रामः
कल्पयित्वोक्तं तु धारा वा कुसुमतया कल्पिताः स एव वा देवतारूपोऽभ्यवर्षीदिति प्रतिपादितं तथा त्रायते इति प्रतिपत्त्रं तच्छायया कुर्वन्निति १०८

टी॰४
अपिच महदेतदाश्चर्यमित्याहुः विविधेति हे सति यशोदे तव सुतो नानागोपक्रीडासु विदग्धो निपुणः वेणुवाद्यविषये निजैः शिक्षिता सु
ताः स्वोत्प्रेक्षिताः नव नव्यतः श्रुता इत्यर्थः स्वरजातीः निषादर्षभादिस्वरालापभेदाननयदुन्नीतवान् १४ ततस्ताः स्वरजातीः सवनशः मंद
मध्यमतारभेदेन यतो गीतध्वनिरागतस्तत्र आनतकंधराश्चित्ते च ये धाने उपधार्य सम्यग्ज्ञात्वापि कवयः कोविदा अपि तेन निश्चितं तत्त्वं तद्भेदो
ये त्वेके बलं कश्मलं मोहं ययुरिति १५ अस्माकं तु मोह किं ब्रूम इत्याहुः निजपदाब्जदलैरिति ध्वजादिभिर्विचित्राणि ललामानि चिह्नानि
विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षिताः तव सुतः सति यदाधरबिंबे दत्तवेणुरनयत्स्वरजा
तीः १४ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चित
तत्त्वाः १५ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीरित
नितेन न स्वयं स४ वेणुः १६ व्रज[illegible]विलासवीक्षणार्पितमनोभववेगाः कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा १७ मणिधरः क्वचिदागणयन् गा मालया दयितगंधतुलस्याः प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजम्
येषां ते निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुरक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजस्तद्वद्गतिर्यस्य सः श्लोकवादितवेणुः स
न्यगूजति १६ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगो याभ्यस्ताः वयं कुजा वृक्षा इव गतिं गमिताः सत्यः मोहेन न विदामः कव
रं वसनं वेति १७ किंच मणिधरः मणीन् ग्रथितान् गोगणनार्थं धरतीति मणिधरः क्वचिदेशे तैर्मणिभिः समता गाः गणयन् तुलस्याद
यितगंधा या तुलसी तस्याः मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजे प्रक्षिपन् यत्र यदा कदाचिदगायत १८॥ 479

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·पू·
१०९

नदाकर्णितवेणुरवेणा वंचिता न्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणास्य गृहिण्यो भार्या गुणगणस्य तारगोगणस्य समुद्रं कृष्णमनु
गत्य प्राप्य ताः कृष्णमेवान्वसत नान्यवर्तंत इत्यर्थः अत एव ते विमुक्ता गृहाशा याभिस्ता गोपिका इव ता अपि कृष्णमेवान्वासतेति १९
तदेवं वृंदावनप्रदेशे प्रक्रीडितवासा यद्गृहे गोधनानि परावृत्त्य यमुनायां क्रीडितः कृष्णस्य सौभाग्यमनुवर्णयंति कुंदेदाम कृतकौतु
केवेष इति गोपीनामुत्सवाय कुंददाम भिः कृतकौतुकेनोत्सवेन वेषो लंकारो यस्य सः हे अनघ यशोदे तव वत्सः पुत्रो नंदसूनुः वत्सः
यद्वा स्नेहेव वहूकथयंत्यः काश्चित्तव वत्स इति काश्चिन्नंदसूनुरिति न भेदः कृष्णः सनयदा विजहार क्रीडति स्म तदा म

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नंदसूनुरनघे तव वत्सो नर्म
कृष्ण
आकर्णितवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इ
व विमुक्तगृहाशाः १९ कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नंदसूनुरनघे तव वत्सो नर्म
दः प्रणयिनो विजहार २० मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन ॥ वंदिनस्तमुपदेवगणा ये वा
द्यगीतवलिभिः परिवव्रुः २१ वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य

लयजस्पर्शेन मलयजस्य चंदनस्येव सुरभिः शीतस्पर्शेत्तिनं तं कृष्णं मानयन् अनुकूलं यथा तथा उपवाति वीजयति यद्वा मलयजो दक्षिण
वायुः यद्वा मलयजस्य कृष्णस्य लेन स्वांगे नुलिप्तस्पर्शेन मानयन्निति किं च वंदिनः स्तावकाः सतः गंधर्वादिगणाः वाद्यगीतपुष्पाः वर्षा
दिभिः परिवव्रुः पर्वितउपासते २२ आयात्त माल्लोक्य कृष्णं त्यः परस्परमूचुः वत्सल इति व्रजस्य गवां च यद्वा व्रजे निव
हानां गवामनुकंप्यानामस्माकमित्यर्थः वत्सलो हितकृत्तय यस्मात् अगध्रः अगं धरतीति गोवर्द्धनो द्धरणः वृद्धैर्वसत्स्यो
पल्लवाणमेतत् वृद्धैर्ब्रह्मादिभिः सर्वैः परिवंद्यमानचरणः इत्यर्थः ... शीघ्रमायातं गोयूथं नददातीभावः उपोह्य एकीकृत्य गीतयुक्तो

अमयुक्तयापि कार्त्तयां गोहर्षमुन्नयन् खुरैः प्रापय न्खुररजोभिः छुरिता व्याप्ता स्रग्जो यस्य सः सुहृदामस्माकमाशिषामनोरथः स्यादित्सयावान्
मिद्दृयादेवक्या जठरे भवतीति तथा एव एको दुराजः अंधुः निर्वृतिहेतुत्वेन स एव चराती मि उडुराजोपि व्रजेतीति व्रजाः प्राणिनस्तेषां गवां च सुखाव
सलः हितकारो नगकं त्यगाः ओषधयो वनस्पतयस्तान्मृतरश्मिभिराप्याययन्नेधरतीनिति तथा सः हृत चारितात् वंद्यमानप्रणम्यमानं चरणाय
स्य सः तथानुगाः सेवकाः गंधर्वादयस्तैरीडिताकीर्तियस्य सस्तथा नेशिवगीतो वेणुर्यस्य सः श्रमरुचा हृशानामानंदमूर्त्तित्वादुत्सवमुन्नयन्गावो
रजसा छुतस्रक्करश्मिमाल्ला उदयं यस्य सः सुशोभनं हृद्यो वा तेसु हृदो वा स्तरणा स्त्वामाशिषो दित्सया द्विजराजत्वात् कृत्स्नं गोधनमुप

उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजःछुरितस्रक् ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः २३
मदविघूर्णितलोचनईषन्मानदः स्वसुहृदां वनमाली ॥ बदरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या २४
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते ॥ मुदितवक्त्र उपयाति दुरंतं मोचयन्व्रजगवां दिनतापं २५

हृदिनांते चंद्र उदेतीति देवकीसंस्यैयं देवकी पूर्वादिक्तस्या जठरमध्ये भवतीति देवकीजठरभूः अयं द्वौ यथोदेति २३ अतिसं... मो ... का
श्चित्समीपमायांतं कथयंती मन्मदेन विघूर्णिते लोचने यस्य सः वदरपांडुवदनः ईषत्पक्वबदरवत्पांडु वदनं यस्य सः अत्र हेतुः
कनककुंडलयोर्लक्ष्म्या कांत्या मृदुको मलो गंडो यस्मिंस्तद्वदनं मंडयन्कोमलगंडस्य लक्ष्मीभयतीति वा २४ यदुपतिर्दे
व कीजठरभूरिति प्रागयं वसुदेवस्य क्वचिज्जातस्तत्वात्मजत्वात् दिगर्गवाक्य प्रसिद्धेः कं यद्वा सुख उदेयि वा स्यात् वतां कूले
इति चन्द्रात्वाका श्चिद्वदंतीति गजेंद्रगतिः गजेंद्रस्येव गतिर्यस्य दृष्ट्वप्रसन्नवक्त्रो व्रजगवामस्माकमनंतं दिनतापं च शमयन्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ द॰ पू॰ ११० २५ एवंविरहदुःखेनापि तत्र देहे समलीलाः एवं गायंत्यस्तस्मिंश्चित्तं चेतनां जीवितं यासां ताः तस्मिन्नेव मनः संकल्परूपं यासां ताः अहःसु पिरे

मिरे २६ इति दशमे टीकायां ३५ षट्त्रिंशे निहतेरिष्टे नारदोक्त्या बलाच्युतौ वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरमथादिशत् १ गोपीराः संत

तायं तं शंखचूडं निहत्य सः अहन् गोपीमहानंदीसहं दुष्टमरिष्टकं २ एवं देवकांधेकी दिगीतन्नृत्यवाद्यकुसुमवर्षादिभिः हासंपा

[illegible]सलीलानुगायतीः रेमिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः २६ इ

ति भा॰ दशमे पंचत्रिंशः ३५ श्रीशुक उवाच अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः महीं महाककुत्कायः कं

पयन् खुरविक्षतां १ रंभमाणः खरतरं पदा च विलिखन्महीं उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् २

किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां ३ निर्विशं

ति घना यस्य ककुद्यचलशंकया तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ४ पतंत्यकालतो गर्भाः स्र

वंति स्म भयेन वै पशवो दुद्रुवुर्भीता राजन्संत्यज्य गोकुलं ५ कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः भगवानपि

तद्वीक्ष्य गोकुलं भयविद्रुतं ६ माभैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् गोपालैः [illegible] पशुभिर्मंद त्रासितैः कि

वृंदहृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विरुद्धायाधानेतराधिकारार्थमथशब्दः तर्हि तदा ... तिरस्कुर्वन् तं वर्णयति सार्द्धत्रयेण महान् ककुत् को

यस्य सः खुरैर्विदारितां महीं कंपयन् १ रंभमाणः वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्यम्य ऊर्ध्वं कृत्वा वप्राणि तटानि उत्क्षिपन् २ किंचित् ११०

किंचिच्छकृन्मध्ये मध्ये ईषत्पुरीषं मुंचन् तथा मूत्रमुत्सृजन् स्तब्धलोचनो निमेषलोचनः यस्य ध्वनिना गवां नारीणां च ३ तत्रांचतुर्थार्द्धं वेत्सावपातः पंचमा

ज्य ५

इत्येवं वदन् आस्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन कोपयन् भुजाभोगं भुजा भुजस्य एव भोगः सर्पदेहः सर्पदेहाकारं भुजमित्यर्थः

सख्युः स्कंधे निधाय भयाभावो दर्शितः स्वयमच्युतोऽन्यान्दुष्टान्हरतीति हरिः ८ उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमं तोमेघा यस्मिन्सः ऐग्रग्रेन्य

स्तविषाणाग्रे येन सः स्तब्धे असृक्कृतुल्ये लोचने यस्य सः कटाक्षिप्य कटाक्षेण तिर्यक् निरीक्ष्य १० प्रत्यपोर्वहं प्रतिलोमं व्यनुदत्प विद्धोऽप

इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ८ सोऽप्येवं कोपितोऽरि

ष्टः खुरेणावनिमुल्लिखन् उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ९ अग्रन्यस्तविषाणाग्रः स्तब्धा

सृग्लोचनोऽच्युतं कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा १० गृहीत्वा शृंगयोस्तं वा अष्टादश पदानि

सः प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ११ सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः आपतत्स्वि

न्नसर्वांगो निःश्वसन्क्रोधमूर्छितः १२ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले

निष्पीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोऽपतत् १३ असृग्वमन्मूत्रशकृत्समुत्सृजन्

क्षिपंश्च पादाननवस्थितेक्षणः जगाम कृच्छ्रं निरृतेरथ क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः १४

क्षिप्तः आपतत् आद्रवत् स्विन्नानि स्वेदयुक्तानि गात्राणि यस्य सः क्रोधमूर्छितः क्रोधेन व्याप्तः १२ कृत्वा विषाणमुत्पाट्य तेनैव जघा

न स च आपतत् १३ मूत्रशकृन्मूत्रं शकृच्च एकवद्भावः तदुभयं समुत्सृजन्नित्यर्थः पादांश्च क्षिपन् इतस्ततश्चालयन् अनवस्थिते क्षणः प्रच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नयनोत्सवः नयनानां मूर्तिमानुत्सवः १५ कामं व्रजे वसंतं व्रजे तं हसंते नाप्यतत्स्मृतिं नारदः स्मारयामास कंसं दूतगिरे वतु नदाह ऋष्टि
इति देवदर्शनः देवर्षिः यद्वा एवं हते तेएवं भविष्यतीति साक्षाद्दृष्टवद्दर्शनं यस्य सः १६ नारदोक्तमाह यशोदाया इति देवक्याष्टमो गर्भस्त्वेनप्र

एवं कृष्णेन हता स्तूयमानः स्वजातिभिः विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः १५ अरिष्टे निहते दैत्ये कृ
ष्णेनाद्भुतकर्मणा कंसायाथाह भगवान्नारदो देवदर्शनः १६ यशोदायाः सुतां कन्यां देवक्याः कृष्ण
मेव च रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः १७ निशम्य तद्भो
जपतिः कोपात्प्रचलितेन्द्रियः निशातमसिमादत्त वसुदेवजिघांसया १८ निवारितो नारदेन तत्सु
तौ मृत्युमात्मनः ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया १९ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनं
प्रेषयामास हन्येतां भवता रामकेशवौ २० ततो मुष्टिकचाणूरशलतोशलकादिकान् अमात्यान्हस्ति
पांश्चैव समाहूय समभोजराट् २१ भो भो निशम्यतामेतद्वीरचाणूरमुष्टिकौ नंदव्रजे किलासाते सुतावान

सिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह रोहिण्याः पुत्रं बलरामं च देवक्याः सप्तमं सु
तमाह यद्वा नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्यायाः रोहिण्याः पुत्रमाह वसुदेवसुतौ चेत्कथं व्रजं गतौ तत्राह बिभ्य
ता वसुदेवेनेति १७ ॥ १८ । निवारित इति हते वसुदेवे तौ पलायेतां अतो बध्यतामिति मंत्रं वदता नारदेन निवारित इति

तद्दर्शनेन नयोराल्हादस्तेन विह्वलः संभ्रमो यस्य प्रेम्णा ऊर्द्धानि रोमाणि यस्य अश्रूणां कलाभिः लेशैः
आकुले ईक्षणे यस्य सः अवस्कंद्य अवप्लुत्य तेषु पदेषु अचेष्टत अलुंठत अहो इति दुर्लभं भावयन् २६
ननु किमर्थं व्यलुंठत नास्ति प्रेमसंभ्रमे फलोद्देशः इत्याह देहमिति देहभाजामेतावानेव पुरुषार्थः कंसस्य सं

तद्दर्शनाल्हादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः रथादवस्कंद्य स तेष्वचेष्टत
प्रभोरमून्यंघ्रिरजांस्यहो इति २६ देहंभृतामियानर्थो हित्वा दंभं भयं शुचं संदेशाद्यो हरे
र्लिंगदर्शनश्रवणादिभिः २७ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ २८ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ २९ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं शोभयंतौ महात्मानौ सानुक्रोशस्मितेक्षणौ ३० उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवास

देशादास्यद्धरेर्लिंगदर्शनश्रवणादिभिर्योयमक्रूरस्य वर्णित इति संदेश आद्यो अर्थो यस्य स यावान् अक्रूरस्य जातेति वा २७ ततः कृष्णं रामं
च ददर्श गावो दुह्यंते अस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ २८ अनुक्रोशोनुकंपा तद्विलसितस्मितमीक्षणं ययोस्तौ २९ उदारास्त्रिरा
क्रीडा ययोस्तौ स्रग्विणौ रत्नस्रग्भिरलंकृतौ ३० प्रधानं मूर्तौ पुरुषौ प्रकृतिपुरुषात्मकौ कुतः आद्यौ तदपि कुतः जगद्धेतू अतएव जग
त्पती विपरीतौ वा चतुर्णां पदानां हेतुमद्भावः जगत्यर्थं पृथिव्या भारापनयनाय स्वांशेन मूर्त्तिभेदेन बलकेशवौ संतौ ३२ श्रीराम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वप्रभया विगततिमिरा दिशः कुर्वाणौ कनकचितौ सुवर्णख्याप्तावितिसालंकारयोः शैलसादृश्यमुक्तं ३३ भगवद्दर्शनाल्हादेन यद्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः ३४ पुलकैरा चितान्यंगानि यस्य सः स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथ

मिरि दिशो वितिमिरा राजन्कुर्वाणौ प्रभया स्वया । यथा मारकतः शैलो रौप्यश्च कनकाचितौ ३३ रथात्तूर्णमवप्लुत्य
सोऽक्रूरः स्नेहविह्वलः पुलकाञ्चितसर्वांगः स्वाख्यानेना शन्नृप ३५ भगवांस्तदभिप्रेत्य रथांगां
कितपाणिना परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ३६ संकर्षणश्च प्रणतमुपगृह्य महामनाः ।
गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं ३७ पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनं प्रक्षाल्य
विधिवत्पादौ मधुपर्कार्हमाहरत् ३८ निवेद्य गां चातिथये संवाह्य श्रांतमादृतः अन्नं बहुविधं
मेध्यं श्रद्धयोपाहरद्विभुः ३९ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् मुखवासैर्गंधमाल्यैः परां प्री
तिं व्यधात्पुनः ४० ॥ (नेनाभ्यानीत ३५ अभिप्रेत्य अक्रूरोऽयमेतदर्थमागतेति ज्ञात्वा कंसहननसामर्थ्येद्यो
तयन् रथांगेन चक्रेणांकितो यः पाणिस्तेनाभ्युपाकृष्य नमालिंगितवान् ३६ पाणी अंजलिरूपेणसंहतावेव श्रीरामः
गृहीत्वा ३७ मधुपर्कः एवमर्हणं तस्मिन्वायदुपचितमर्हणं आहरत् आनीयसमर्पितवान् ३८ ॥ ३९ ॥ ४० ॥ ११८

सत्कृतं समानीतं निरयहेः क्रूरेकथं केन प्रकारेण स्थ जीवथेत्यर्थः शौनः पशुघाती स एव पालको येषां तद्वत्तुल्यमित्य
र्थः ४१ निरनुग्रहतामाह योऽवधीदिति नोकानन्तोकानि अस्वनेव तर्पयति यः अतः स्वलस्य कंसस्य प्रजानां हे अक्रूर
येषां जीवनमात्रमपि दुर्लभं तेषां वः किं कुशलं पृच्छाम विचारयामः ४२ मधुरयेति मधुरया वाचा इत्थं सुसत्कृतं त

पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे कंसे जीवति दाशार्ह शौनपाला इवावयः ४१ योऽवधीत्स्वस्व
सुस्तोकान्क्रोशंत्या असुतृप्खलः किन्नुस्वित्तत्प्रजानां वः कुशलं विमृशामहे ४२ इत्थं सूनृ
तया वाचा नंदेन सुसभाजितः अक्रूरः परिपृष्टेन जहावध्वपरिश्रमं ४३ इति श्री भागवते दशम
स्कंधे अष्टत्रिंशोऽध्यायः ३८ शुक उवाच सुखोपविष्टः पर्यंके रामकृष्णोरुमानितः लेभे मनो
रथान्सर्वान्पथि यान्स चकार ह १ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने तथापि तत्परा राजे
न्न हि वांछंति किंचन २ सायंतनाशनं कृत्वा भगवान्देवकीसुतः सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चि

ववाचा परिपृष्टेन परिश्नेन अध्वपरिश्रमं संसारपरिश्रमं ४३ इति दशमे टीकायां ३८ नवत्रिंशे पुरीं गच्छत्य
च्युते गोपिकोत्कयः अक्रूरेणाथ कालिंद्यां विष्णुलोकस्य दर्शनं १ भक्तानां मनोरथाः सत्या भवं
तीति द्योतयन्नाह सुखोपविष्ट इति रामकृष्णाभ्यां उरु अत्यंतं मानितः अधिकं मानितः १ ॥ २ ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·स्कं·
११९

हे तात हे सौम्य स्वागतं यथा तथा आगतं स्वज्ञातिबंधूनां स्वसुहृदः ज्ञातयः सपिंडाः सपिंडाः संबंधिनस्तेषामपि किं अनमीवं
अनपायं अदुःखं सुखमिति यावत् अनामयमारोग्यं ४ एवं प्रश्नोपि ममनाति संगच्छत इत्याह किंन्विति अंगहे अक्रूर पृ
च्छामिनः अस्माकं कुलस्यामयो रोगो नो मातुल इति मम मातुल इति नामयस्य अस्मिन् अतः स्वानां ज्ञातीनां तत्प्रजा

श्रीभगवानुवाच तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः अपि स्वज्ञातिबंधूनामनमीवमनामयं ४
किंनु नः कुशलं पृच्छे एधमाने कुलामये कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च ५ अहो अस्मदभू 488
त्पित्रोर्वृजिनमार्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ६ दिष्ट्याद्य दर्शनं स्वानां मह्यं वः सौ
म्यकांक्षितं संजातं वर्ण्यतां तात तवागमनकारणं ७ पृष्टो भगवता सर्वं वर्णयामास माधवः वैरानु
बंधं यदुषु वसुदेववधोद्यमं ८ यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयं यदुक्तं नारदेनास्य स्वजन्मा
नकदुंदुभेः ९ श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा प्रहस्य नंदं पितरं राज्ञादिष्टं विजज्ञतुः १०

स्य च ५ असत् अस्मिन्निमित्तं वृजिनं दुःखं आर्ययोर्निरपराधयोः यद्धेतोः अहमेव हेतुः ६ तस्मात् हे सौम्य स्वानां वो दर्श
नं मह्यं मे संजातं दिष्ट्या भद्रं ७ माधवः मधोर्वंशजः ८ धनुर्मखः छद्मापदेशो यस्य तन्मात्रादिभिर्घातनार्थं अस्य श्रीरामः
श्रीकृष्णस्य पुनो वर्णयामास स्वजन्म श्रीकृष्णस्य जन्म आनकदुंदुभेः शकाशात् ९ विजिज्ञतुः विज्ञापयामासतुः १० ११९

सोपि नंदो गोपान्समादिशत् गोरसः क्षीरादि उपायानि उत्तमवस्तूनि ११ रसान्घृतादीन् शकटकुलेन इदं सूचयति अचिकित्स
स्य रोगस्य चिकित्सार्थं रसान्दास्याम इति १२ व्रजाधिकृतेन आघोषयत्सर्वतो घोषितवान् ततः कृष्णमेकं जीव
नाय गोप्यस्तदा अक्रूरमागतमुपश्रुत्येति १३ यथालिंगान्याः पंचभिः काश्चिदिति तेन श्रवणेन कृतो यो हृत्तापस्तेन श्वा

गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः उपायनानि गृह्णीध्वं युज्यंतां शकटानि च ११ यास्यामः श्वो
मधुपुरीं दास्यामो नृपते रसान् द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किलि १२ एवमाघोषयत्क्ष 489
त्रा नंदगोपः स्वगोकुले गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं रामकृष्णौ पुरीं नेतुमक्रूरं व्र
जमागतं १३ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः स्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्च
न १४ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव १५
स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः १६।

सस्तेन म्लानमुखश्रीर्यासां बभूवुरिति दुकूलानि केशग्रंथयश्च यासां तास्तथाभूताः काश्चिद्बभूवुरिति १४ तस्य श्रीकृष्ण
स्यानुध्यानेन निवृत्ताश्चक्षुरादिअशेषवृत्तयो यासां ताः इमं लोकं देहमपि न जानंति स्म मुक्ता इति १५ अपराः स्त्रियः शौ
रेर्गिरः स्मरंत्यः संमुमुहुः कथंभूताः गिरः अनुरागेण च स्मितं तेन ईरिताः हृदिस्पर्शंतीति हृदिस्पृशः मनोज्ञाः विचित्राणि प वे२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०द०पू० १२०

१७ विरहेण कातराः विह्वलां अच्युते आशयं चित्तं यासां ताः १८ कृस्स संगतिं विधाय विधाय विघटयतीति विधातारं प्रत्येव माक्रोशयंत्य आहुः अहो इति मैत्र्या हिता चरणेन प्रणयेन स्नेहेन अकृतार्थान् प्राप्तभोगान पितान्नियुनंक्षि वियोजयसि तस्मात्त्वं बत वदत्या बालिशो पिलेमित्याहुः अपार्थकमिति १९ किं गर्हितं बत वैकर्मेत्याहुः यस्त्वमिति शोकमपनुदतीति शोकापनोदो यस्मात् सेष्मितलेशो गूढहासस्तेन सुंदरं मुकुंदवक्त्रं सकृत् प्रदर्श्य पुनस्तस्य परोक्षमदृश्यतां करोषि अतस्त्वत्कृतं कर्म असाधु

गतिं सुललितां चेष्टां स्निग्धहासावलोकनं। शोकापहानि नर्माणि प्रोद्दामचरितानि च १७ चिंतयंत्यो मुकुंदस्य भीता विरहकातराः। समेताः संघशः प्रोचुरश्रुमुख्यो ऽच्युताशयाः १८ गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः। तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विचेष्टितं तेऽर्भकचेष्टितं यथा १९ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसं।

मि ५ शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं २० क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत्। येनैकदेशे ऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः २१॥ ॥ निंद्यमित्यर्थः २० दत्तापहारित्वेनाति क्रूरमाहुः क्रूर इति त्वं क्रूरस्त्वं न चाक्रूरो हरसि नाहमिति चेदत्र आहुः अक्रूरस्य समाख्यया आसिन ह्येवं कर्तुमन्यः प्रभवति रामः १२० अतो न्यो नामांतरेण मधुवं त्वमेवागतोसि कृत्सहरामि न युष्मच्चक्षुरिति चेत्त्वयैव त्वया दत्तेन चक्षुषा मधुद्विषएकदेशे नेत्रवक्त्रादौ त्वदीयस्य समस्तं सृष्टिनैपुण्यं अद्राक्ष्म दृष्टवंत्यो वयं तद्दृष्टं कथंभावः ममस वैरहस्यमाभिरत्नातमित्यमर्षेणेव कृस्स वियोज

विधातारं विहाय परस्परमूचुः नंदसूनुरिति वतेति खेदे क्षणभंगं स्थिरं सौहृदं यस्य सः गृहादीन् विहाय अस्मामिस्ताद्दास्यमुपागताः स्वकृतानुरागाः नन्दु तेनैवं स्मिताद्दिना परवशा अपि नः अस्मान्नसमीक्ष्यते न नवं नवं प्रियं यस्य सः अतस्त्वं निवारयाम इति भावः २२ सेर्ष्यमूचुः सुखमिति व्रजस्पतेः श्रीकृष्णस्य मुखं पास्यति आदोणसमृक्ष्यति कथंभूतं अपांगेन नेत्रप्रांतेन उत्कलितं उज्जृंभितं स्मितं येन अवश्यमेवायास्मिन्नेतद् २३ ननु द्वित्राणि दिनानि तत्राभवतु तथा प्यस्मत्स्नेहात्कृष्णः पित्रादिभिश्च परावर्तिन आगमिष्यतीत्याशंक्या

न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा बत। विहाय गेहान्स्वजनान्सुतान्पतींस्तद्दास्यमद्धोपगता नवप्रियः २२ सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवं। याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवं २३ तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि। कथं पुनर्नः प्रतियास्यते ऽबलाः ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् २४ अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वतां। महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं २५॥

॥ हे अबलाः तासां मधुमंजुभिर्भाषितैर्वशीकृतचित्तः तथा तासां सलज्जस्मितेर्विभ्रमैर्भ्रमन् परवान् पित्रादिपरतंत्रोपि यद्वा व्रजे परे अन्ये बांधवाः सांति यस्य सः तथा मनस्वी धीरोपि ग्राम्याः अविदग्धा नः कथं प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः २४ किंच अस्मदुत्सव नाजोन्यस्य एवाभविष्यतीत्याहुः अद्येति तत्र पुरे दाशार्हादीनां दृशः दृष्टेः महानुत्सवो भविष्यति यद्देवकीसुतं द्रक्ष्यंति ते अध्वजा व्रजाध्वनि ये चान्ये गच्छं तं द्रक्ष्यंति तेषामपि दृशो ८ भविष्यतीति यद्वा दृशा इति द्वितीया तेषां दृशो नेत्राणां महोत्सवो भविष्यते प्राप्स्यसि प्रा[illegible]र्थस्य भगवते आत्मनेपदत्वं ९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ अक्रूरं शपंत्य आहुः नैनद्धि इति एवो मिधानं कर्मयस्य अतएव निःकृपस्य अक्रूर इति शोभनं नाममाभूत् तत्र हेतुः अतीवदा
१२१ रुण इत्यादि प्रिया त्प्राणादपि प्रियतरं हरेः स मधुध्वनः पारं अस्मदगोचरत्वादतिपरदेशं नेष्यति २६ अहो धिगस्मज्जीवितमित्याहुः
अनार्द्रधीरिति अनार्द्रः कठिना धीर्यस्य सतादृशः एषः रथमधिरूढः अस्माविनयमालन्यस्य स्थविरैः रूपेक्षित तेन निवार्य
तीत्यर्थः किंच दैवं चेति यद्दि दैवमस्माकमनुकूलं भवेन्न हि विघ्नैः कश्चिद्देवानां मध्ये प्रतिहन्येत अस्माभिः इत्यपातो वा भवेत्

नैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः योसावनाश्वास्य सुदुःखितं जनं प्रियात्
प्रियं नेष्यति पारमध्वनः २६ अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः गो
पा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते २७ निवारयामः समुपेत्य माधवं
किन्नोकरिष्यन्कुलवृद्धबांधवाः मुकुंदसंगान्निमिषार्द्धदुस्त्यजाद्दैवेन विध्वंसितदीन
ललित ५ चेतसाम् २८ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्याम् नीताः स्म
नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं २९॥ अन्यद्वा किं अरिष्ट स्यान्नतुत
त्किंचिदस्ति २७ परस्परं समं प्रसादं समधिरुह्याहुः निवारयाम इति अकरिष्यन्किं करिष्यंति निमिषार्द्धदुस्त्यजान्मुकुंदसं
गाद्विध्वंसितानि वियोजितानि अतएव दीनानि चेतांसि यासां ताः एवंभूतानामस्माकं न मृत्योरपि भयमित्यर्थः २८ इतोपि
कारणात्सांप्रतं मेवावलंबनीयमित्याहुः हे गोप्यः यस्य ललितस्मिते च वल्गुमंत्रश्च लीलावलोकश्च परिरंभणं अनुरागेण
एतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नीताः स्म क्षणदा रात्रयः क्षणमिव नीताः तमृते तं विना दुरंतं तमः विर

आत्मकं तमो तितरेम जीवनमेव कथं स्यादित्याहुः य इति अन्हः क्षये दिनावसाने खुररजोभिः छुरिताः धूसरा अलकाः स्रजश्च
यस्य सः व्रजं विशन् स्मितेन यत्कटाक्षेण निरीक्षणेन नः चित्तं हरति अमुं कृष्णं विना कथं भवेम जीवेमेति ३० कृष्णे
न निषिक्तानि मानसानि यासां सुस्वरं उच्चैः ३१ क्रूरमक्रूरं नः श्रुत्वा कंसं कंसनिषूदनः गोपीमनोरथारामः रामेण स्वपु

विशन् योन्हः क्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् वेणुं क्वणन्स्मितकटाक्ष
निरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ३० एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्ण
निषिक्तमानसाः विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवेति ३१ स्त्रीणामेवं रुद
तीना मुदिते सवितर्येथाक्रूरश्चोदयामास कृतमैत्रादिको रथं ३२ गोपा [illegible] मन्वसं
ज्जंतनंदाद्याः शकटैस्ततः आदायोपायनं भूरि कुंभान्गोरससंभृतान् ३३ गोप्यश्च दयितं कृष्णमनु
व्रज्यानुरंजिताः प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ३४ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः
सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ३५ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च अनुप्रस्थापितात्मानो
रथयोः स्त्रीणामिति कृतमैत्रादिकः मित्रदैवत्यं पुरीषोत्सर्गमुखप्रक्षालनादिकर्म येन सः ३२ अन्वसज्जंत अन्वगच्छन् ३३ अनु
रंजिताः पराङ्मुखनिरीक्षणेन किंचिदानंदिताः प्रत्यादेशं प्रत्याख्यानं ३४ तप्यतीः संतप्यमानाः आयास्ये शीघ्रमागमिष्यामि दूतवा

व १ ख २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·पू·
१२२

३७॥३८॥ वृक्षाणां खंडं समूहं उपव्रज्य ३९॥ शंकितः सन् रथोपरि वीक्ष्य ४०॥ वृक्षमिवेदं जपन्नेवैमौ वालोकितौ महे २८ २०
इति शंकितचेतसे अक्रूराय जले स्वरूपमात्मीयं व्यदर्शयत् ४१॥४२॥४३॥ सिद्धादिभिः स्तूयमानं ४४ सहस्रं शिरांसि यस्य तं स

तानि राशानि बहुतु गोविंदविनिवर्त्तने विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितं ३७ भगवान्
पि संप्राप्तो रामाक्रूरयुतो नृप रथेन वायुवेगेन कालिंदीमघनाशिनी ३८ तत्रोपविश्य पानीयं पी
त्वा मृष्टं मणिप्रभं वृक्षखंडमुपव्रज्य सरामो रथमाविशत ३९ अक्रूरस्तावुपामंत्र्य निवेश्य च
रथोपरि कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत् ४० निमज्य तस्मिन्सलिले जपन्ब्रह्मस
नातनं तावेव ददृशेक्रूरो रामकृष्णौ समन्वितौ ४१ तौ रथस्थौ कथमिह सुतावानकदुंदुभेः त
र्हि स्वित्स्यंदने न स्त इत्युन्मज्य व्यचष्ट सः ४२ तथापि च यथापूर्वमासीनौ पुनरेव सः न्यमज्जद्
र्शनं यन्मे मृषा किं सलिले तयोः ४३ भूयस्तत्रापि सोद्राक्षीत्स्तूयमानमहीश्वरं सिद्धैर्भुजंगपति
भिरसुरैर्नतकंधरैः ४४ सहस्रशिरसं देवं सहस्रफणमौलिनं नीलांबरं विसश्वेतं शृंगैः श्वेतमि
वस्थितं ४५ तस्योत्संगे घनश्यामं पीतकौशेयवाससं पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ४६

सहस्रफणा एव मौलयो यस्य तं नीलेंबरं यस्य तं विसवत् मृणालकंदवत् श्वेतं शृंगैः शिखरैः युतं कैलासमिव स्थितं ४५ तस्योत्संगे कुंडलीकृ

श्रीरामः
१२२

भा·द·पू·
१२३

विद्याविद्ये जीवानां मुक्तिसंसृती देते मायायां तयोः कारणं शक्तिः ह्लादिनी संवित् ५५ अस्मात्कृष्णोसावेवंभूतः परमेश्वर इति प्रीतः ५६
५७ इति दशमे टीकायां ३९॥ चत्वारिंशतितमे क्रूरः कृष्णमत्स्येषु वैष्णवं परं प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः १
श्रीकृष्णं प्रणमति नतोस्मीति हेतुभूतं हेतुत्वमात्मन्यपि तत्त्व्यः कुतो मायालं नतोस्मि तत्राह आद्यपुरुषं अनादि

श्रियायुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया विद्ययाविद्यया शक्त्या मायया च निषेवितं ५५
विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ५६ गिरा ग
द्गदया स्तौषीत्सत्वमालंब्य सात्वतः प्रणम्य मूर्ध्नावहितः कृतांजलिपुटः शनैः ५७ इति भागवते दश
मे एकोनचत्वारिंशः ३९॥ अक्रूर उवाच नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्य
यं यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यत एष लोकः १ भूस्तोयमग्निः पवनः खमा
दिर्महानजादिर्मन इंद्रियाणि सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः २॥

निधनं अव्ययमित्यर्थः कुत एवं तत्राखिलहेतुहेतुत्वं नहि तु सत्त्वनारायणो नाहमिति चेत् किं नारायणोसि मोस्तो त्रिकात्रस्तुतिं स
त्वमेवेत्याह यन्नाभिजातादिति यतो ब्रह्मणः १ अखिलहेतुहेतुत्वं तु त्वत्प्रपंचयति भूरिति खमादिरहंकारः। श्रीरामः
अजा माया तस्या आदिपुरुषः एते ये जगतो हेतवः ते सर्वे तव अंगभूताः अंगाच्छ्रीमूर्तेर्भूताः उपसर्जनभूता वा॥२॥ १२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शोभने सुभ्रुवौ यस्य उन्नता नासिका यस्य शोभनौ कपोलौ यस्य अरुणो अधरो यस्य ४७ तुंगा अंशा यस्य उरस्थले श्रीर्यस्य वलिव
त्वलोदरं वलयस्तिस्रो रेखा निम्ना यस्य तत्व वलिवत् तत्पल्लवकं अश्वत्थदल सदृशं उदरं यस्य तं ४८ कटितटं श्रो

चारुप्रसन्नवदनं चारुहासनिरीक्षणं सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरं ४७ प्रलंबपीवरभुजं
तुंगांशोरस्थलश्रियं कंबुकंठं निम्ननाभं वलिवत्पल्लवोदरं ४८ बृहत्कटितटश्रोणिकरभोरुद्व
यान्वितं चारुजानुयुगं चारुजंघायुगलसंयुतं ४९ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतं नवां
गुल्यंगुष्ठदलैर्विलसत्पादपंकजं ५० सुमहार्हमणिव्रातकिरीटकटकांगदैः कटिसूत्रब्रह्मसूत्र
हारनूपुरकुंडलैः ५१ भ्राजमानं पद्मकरं शंखचक्रगदाधरं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वन
मालिनं ५२ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः
५३ प्रल्हादनारदवसुप्रमुखैर्भागवतोत्तमैः स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ५४ ॥

[illegible] तत्कटितट श्रोणि करभोरूद्वयं यस्य ४९ तुंगौ ईषदुन्नतौ गुल्फौ अरुणान् नखव्रातदीधितिभिः नवाङ्गु
ल्यो गुष्ठो च तान्येव दलानि तैर्विलसत् शोभमानं पादपंकजं यस्य तं ५० महार्हमणिव्राता येषु तैः किरीटादिभिः ५१।५२ पृथक् पृथग्भावो
इत्यभिप्रायो येषां तैः तत्र पार्षदैः स्वामी स्तूयमानं सनकादिभिर्ब्रह्मा शिवमरीच्यादिभिः ५३ प्रल्हादनारदवसुप्रमुखा ये एतैः परमं दैवतमिति

भा०द०उ० २

प्रत्यग्धर्मा यस्मादिति वा स्तवोर्थः हे पुरुषोत्तमेति २७ यत्नेन सर्वत्वादर्शनाम हे राम हे श्रमं दव ध्यातीति वं
धुर विद्यातीहं तीति तत्पाहे अविद्यानिरसनेति याहिमां कहि २८ अहो ब्रह्महे सा विति स्वयमेव मत्वा परितोषात्स्व
स्थांतरमाह येवामां जहीति २९ यथार्थकनार्थे गृह भगवद्दुत्तरं न वेम्नरो इति विकथ्यते श्लाघते ३० माधवो म

तावाहमागधो वीरस्त्वहे रुक्म पुरुषाधम नत्वया योद्धुमिच्छामि बालेनैकेन लज्जया २७ गु
प्तेन हि त्वया मंद न युयोत्स्ये याहि बंधुहन् तव राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह हित्वा
वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि २८ श्रीभगवानुवाच न वै शूरा विकत्थंते दर्श
यंत्येव पौरुषं न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ३० जरासुतस्ताव भिसृत्य माधवौ
महाबलौघेन बलीयसा वृणोत् ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायु
रिवाभ्ररेणुभिः सुपर्णतालध्वजचिह्नितौ रथावलक्ष्यंत्यो हरिरामयोर्मृधे स्त्रि
यः पुराट्टालकहर्म्यगोपुरं समाश्रिता मुमुहुः शुचार्दिताः ३२ हरिः परानीकपयोमुचां
मुहुः शिलीमुखात्युल्बणवर्षपीडितं स्वसैन्यमालोक्य सुरासुरार्चितं व्यस्फूर्जयच्छा
र्ङ्गशरासनोत्तमं ३३

ध्रुवं सम्भवो महतां सैन्यसमूहेनावृतवान् बाणवर्षैः सूर्यं रेणुभिश्चाग्निं यथा मेघ आदर्शनमात्रमेवा
चरणमिति तिष्ठचिंते ३१ ३२ परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघा स्तेषां शिलीमुखा बा
णास्तेषामत्युल्बणं वर्षं तेन पीडितं व्यस्फूर्जयत् उज्जीतितवान् ३३ राम २

न्वतिस्तुतिं कथं क्रियते अहमेवान्यत उद्भूतस्तत्परतंत्रस्येति चेदित्याशंक्य तवैवामायात्वत्परमाद्यैस्तु न कोपि वेदस्या
हनैत इति एते अजा आदिर्येषां ते आत्मनेस्तेस्वरूपं न विदुः अनात्मतया जडत्वेन कारणेन जडत्वे हेतुः गृहीताः
प्रत्यक्षादिभिर्दृष्टाः न ह्यजादेर्दृग्गोचर इति भावः ननु मा जडा न जानंतु जीवस्तु ज्ञास्यतीत्यत आह अज इति संश्च
जीवस्तापि अजयारनुबद्धः आवृतः गुणातीतं ते स्वरूपं न वेद अन्यः कुतो जानातीति यद्वा प्रकृत्यादयः आत्मनः

नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृहीताः अजोऽनुबद्धः स गुणैरजाया
गुणात्परं वेद न ते स्वरूपम् ३ त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ॥
साध्यात्मं साधिभूतं च साधिदैवं च साधवः ४ ॥

ऽऽ स्वरूपं तव स्वरूपं च न विदुः जडत्वा
देव जीवस्तु तान् आत्मानं न वेत्ति न तु त्वत्स्वरूपमिति यथोक्तं हंसगुह्ये देहं सवो भूतमनश्च मात्रा नात्मान मन्यं च विदुः
परं यतः सर्वपुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ३ ननु यदि केपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवा
नामित्याशंक्य साक्षादगोचरत्वेपि येन केनापि मार्गेण भजतो वगम्योसीत्याह त्वां योगिन इति हिरण्यगर्भाद
यः अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदंतर्यामिस्वरूपमीश्वरं प्रपंचयति यदेवं सांख्ययोगावेकीकृत्योक्तो ४

त्रयीमार्गेणाकर्मज्ञानभेदेन दर्शयति त्रय्या चेति श्लोकद्वयेन वैतानिकाः कर्मयोगिनं त्वामेव यजंते ननु ते इंद्रवरुणवाय्वादीन्यजंते न
तु मामिति आह नानावज्रहस्तादीनि रूपाणि येषां तैः येऽमरास्तेषामाख्यया नाम्ना त्वामेव यजंते इति अयं भावः ऐंद्रवारुणादिसूक्तेष्विंद्रा
दयः सर्वैश्वर्येण प्रकाश्यंते न च सर्वेश्वरा बहवः संभवंति अतो भेदेन त्वामेव यजंते इति तथा च श्रुतिः स प्रथमः स प्रकृतिः स विश्वक
र्मा स प्रथमो मित्रावरुणोऽग्निः स प्रथमो बृहस्पतिश्चिकित्वान् तस्मा इंद्राय हविरा जुहोति ५ ज्ञानपदेन समाधिना सांख्ययोगत्र

त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः यजंते विततैर्यज्ञैर्नानारूपामराख्यया ५ एके त्वाखिलक
र्माणि संन्यस्योपशमं गताः ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहं ६ अन्ये च संस्कृतात्मानो विधिनाभिहि
तेन ते यजंति त्वन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकं ७ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं बह्वाचार्यविभेदेन
भगवंतमुपासते ८ सर्व एव यजंति त्वां सर्वदेवमयेश्वरं येऽप्यन्यदेवताभक्ता यद्यप्यन्याधियः प्रभो ९ ॥

येनैवयाभिहितेन पंचरा
त्रादिविधिना त्वन्मयास्त्वन्मयत्वेनात्मानं चिंतयंतः त्वदेकप्रधाना इति वा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धबहुमूर्त्तिं नारायणरूपेणैक श्रीराम॰
मूर्तिकं च त्वामेव यजंति ७ बह्वाचार्यविभेदेनेति नानाभेदशैवपाशुपतादिमार्गेण ८ येपि क्षुद्रदेवताभक्तास्तेपि त्वामेव यजंती १२४
त्याह यद्यपीति बुद्धिमात्रभेदेन
यीमार्गोऽक्ताः ६ वैस्णवशैवमार्गावाह द्वयेन अन्ये चेति संस्कृतात्मानः वैस्णवशैवदीक्षयादीक्षिताः संतः
त्याह सर्व एवेति हे सर्वदेवमय नन्वेते परस्परदेवताधिदेपंकलहव्याकुलचित्ताः कथमेकमेव यजंतीत्याह

तस्मात्सर्वे मार्गास्त्वय्येव पर्यवस्यंतीति सदृष्टांतमाह यथेति अद्रेः सकाशात्सर्वतः प्रभवंति याः नद्यः पुनः पर्जन्येन पूरिताः सत्यः
सर्वतः सिंधुमेव विशंति तद्वद्देवतागतयो मार्गा अंततस्त्वामेव विशंति १० अत्र हेतुमाह सत्वमिति भवतः शक्तिर्या प्रकृतिस्तस्याः सत्वा
दयो गुणाः अतः प्राकृताः प्रकृतिकार्योपाधयः ब्रह्मादिस्थावरांता जीवास्तेषां धिक्कारा तेषु गुणेषु प्रोतां प्रविष्टास्ते च प्रकृतौ सा च त्वयि अतः
अभेदोपधितयात्सर्वे पि त्वामेव प्रविशंति यद्वा भवतः प्रकृतेर्गुणेषु प्रोताः प्रविष्टाः आब्रह्मादयो भवद्व्यतिरिक्ता न संति अतस्त्वमेव सर्वदेवम
य इति ११ ननु भवतः प्रकृतेरिति वदन्ममापि प्रकृतिसंबंधं प्रबोधितवत् तश्च तेषां च मम च को विशेष इत्याशंक्याविशेषमाह तुभ्यमिति

यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोंततः १० सत्वं रजस्तम इति भवतः प्रकृ
आ तेर्गुणाः तेषु हि ब्रह्मताः प्रोता आब्रह्मस्थावरादयः ११ तुभ्यं नमस्ते त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे
गुणप्रवाहोयमविद्यया कृतः प्रवर्त्तते देवनृतीर्यगादिषु १२ अग्निर्मुखं तेवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः
॥ द्यौः कं सुरेंद्रास्तव बाहवोर्णवाः कुक्षिर्मरुत्प्राणबलं च प्रकल्पितं १३

अविषक्तदृष्टये अलिप्तबुद्धये कुतः सर्वात्मने स्वव्यतिरिक्ताभावात्
तत्राविषक्तदृष्टित्वं किं च सर्वधियां साक्षिणे सर्वसाक्षित्वाच्च न क्वापि बुद्धिलोपेत्यर्थः इतरे तु संसरंतीत्याह गुणप्रवाह इति देवनृतीर्यक्ष्वात्म
येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः त्वदविद्यया कृतोयं गुणप्रवाहः प्रवर्त्तते अतो महान्विशेष इत्यर्थः १२ स सर्वात्मनस्त्यर्नैनाक्तं सगुणरूपं
सौति अग्निर्मुखमिति द्वाभ्यां अग्न्यादीननु ये प्यरावयवता विधीयंते योयमग्निः स तव मुखमित्यादि अवनिः पादौ नेत्रे सूर्यः नभो नाभिः कं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·सू·
२२५

अद्रयः परस्यते अस्थिन खानि १४ नके वलमेतावत् किंतु सर्वोप्ययंप्रपंचस्त्वदुद्भूत एवेति वदन्नेवं सत्यपि प्रपंचस्य षड्जन्मादयो विकारास्त्वयि न प्रसज्जंते तस्य त्वयि कल्पितत्वादित्याह त्वयीति अव्ययात्मनि पुरुषे पूर्णे लोकादयः संजिहते प्रचलंति कथंभूते त्वयि मनोमये मनःप्रधाने मनोवृत्तिर्व्यंगो दृश्यते त्वय्येवाश्रयया बुध्या मनसैवानुद्रष्टव्य इत्यादिश्रुतेः

रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थि नखानि तेद्रयः निमेषणं रात्र्यहनी प्रजापतिर्मे
ढ्रस्तु वृष्टिस्तव वीर्यमुल्बणं १४ त्वय्यव्ययात्मन् पुरुषे प्रकल्पिताः लोकाः सपाला बहुजीवसंकुलाः
यथा जले संजिहते जलौकसोप्युदुंबरे वा मशका मनोमये १५ यानि यानीह रूपाणि क्रीडनार्थं
बिभर्षि हि तैरामृष्टशुचो लोका मुदा गायंति ते यशः १६ नमः कारणमत्स्याय प्रलयाब्धिच
राय च हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे १७ अकूपाराय बृहते नमो मंदरधारिणे क्षित्यु
द्धारविहाराय नमः शूकरमूर्तये १८ नमस्तेद्भुतसिंहाय साधुलोकभयापह वामनाय नमस्तुभ्यं

जले यथा जलौकसः सूक्ष्मांडराशय उदुंबरे के सरे वा मशकाः परस्परं न भिन्नाः एवमनंतानि ब्रह्मांडानि त्वयि संचरंतीत्यर्थः तस्माद्देवं
भूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव संतः सेवंतीत्याह यानीति आमृष्टा परिमृष्टा शुचो येषां १६ अतः स्वयमप्य श्रीरामः
वतारान्नमस्यति नम इति हयशीर्ष्णे हयग्रीवाय मधुकैटभमृत्यवे हंत्रे १७ अकूपाराय कूर्माय क्षित्युद्धारो विहारो यस्य तस्मै १२५

नमस्ते वासुदेवायेति २१
भृगूणां पतये परशुरामाय २० संकर्षणादिरूपं चतुर्व्यूहरूपेण प्रणमति २१ एवं स्तुत्वा बंधमोक्षं प्रार्थयितुमाह भगवन्निति असति
देहादौ ग्राह आग्रहो यस्य सः असतः ग्राहो यस्येति वा २३ २४ मूढत्वमेव प्रकटयति विपर्ययमिति अनित्ये कर्मफले नित्यमिति
अनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः द्वंद्वेषु सुखदुःखेषु आरमति क्रीडतिः ननु दुःखे कुतो रतिः

नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे नमस्ते रघुवीराय रावणांतकराय च २० नमस्ते वासुदेवाय नमः सं
कर्षणाय च प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः २१ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने म्लेच्छ
प्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे २२ भगवन्सर्वलोकोयं मोहितस्तव मायया अहं ममेत्यसद्ग्राहो भ्रा
म्यते कर्मवर्त्मसु २३ अहं चात्मात्मजागारदारार्थस्वजनादिषु भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो।
२४ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं द्वंद्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियं २५ यथाबुधो जलं हि
त्वा प्रतिच्छन्नं तदुद्भवैः अभ्येति मृगतृष्णां वै हित्वाहं त्वा पराङ्मुखः २६ नोत्सहेहं कृपणधीः कामकर्महतं
मनः रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः २७ ॥

तत्राह तमोविष्टः तमसि व्याप्तः प्रियं प्रेमास्पदं त्वां न जाने इत्यर्थः २५
सदृष्टांतमाह यथेति तस्माज्जलादुद्भवंतीति तदुद्भवानि तृणादीनि तैः तथा मायाछन्नं त्वामहं हित्वा पराङ्मुखः देहाद्यभिमुखो वर्ते इति २६ नन्वेवं ज्ञा
नतः कुतो विषयाभिमुखता तत्राह नोत्सह इति कृपणा धीर्विषयवासनायुक्ता मतिर्यस्य अत एव कामकर्मभिर्हृतं इंद्रियैश्च बलिभिर्विषयसंयुक्तैः

इतस्ततः आकृष्यमाणमतो मनः निरोद्धुं न शक्नोमीति २७

भा॰ द॰ भू॰ तदेवमस्त्वतं ज्ञेयः सोहं तवाङ्घ्रिं उपगतः शरणं शरण्यः नन्विं यपरतंत्रस्यैतदपि कुतस्तत्राह नञ्चापीति हे ईश अनंतयोमितवांघ्रिउपगम्यं नं चासतां द॒ ५४
१२५ रापं अतो भवतोनुग्रह एवेत्यहं मन्ये अनुग्रहे सतीति वा ननु सतां सेवया इदं भवति किं मदनुग्रहेणेत्यत आह पुंस इति जीवस्य सं
सारापवर्गः समाप्तिः यदा त्वद्रूपया भवेत् हे अब्जनाभ तदा सदुपासनया त्वयि मतिर्भवेत् त्वद्रूपा विना न सत्संगतिः न त मोक्षमुक्तिरित्य
र्थः २८ पादयोः पतन्प्रार्थयते द्वयेन नम इति विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय किंच पुरु
षेश प्रधानाय पुरुषस्य ये ईशाः सुखदुःखादि प्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानाय नियंत्रे कुतः ब्रह्मणे परिपूर्णाय 504

सोहं तवांघ्र्युपगतोस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्य
ब्जनाभ सदुपासनया मतिः स्यात् २८ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे पुरुषेशप्रधानाय ब्र
ह्मणेनंतशक्तये २९ नमस्ते वासुदेवाय सर्वभूतक्षयाय च हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ३०

॥ इति श्रीभा॰ दशमे चत्वारिंशोध्यायः ४० ॥

किंच अनंतशक्तये अनंताः शक्तयो यस्य अनंता मायाशक्तिर्यस्य तस्मै यद्वा
प्रधानं प्रकृतिः प्रवर्त्तकः पुरुषः ईशः कालः एतत्त्रितयात्मने ब्रह्मणे बद्ध्यति भगवान् प्रकृतिर्हृद्यस्योपादानमाधारः पुरुषः परः सतोभिव्यंजकः
कालो ब्रह्म तत्त्रितयं त्वहमिति २९ सर्वप्रत्ययहेतुत्वमभिव्यंजयन्स्तौति नमस्त इति वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय क्षयः आश्रयः श्रीरामः
अहंकारस्य प्राणिनामाश्रयत्वमस्याहंकाराधिष्ठात्रे संकर्षणाय हृषीकेशाय बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्रहणं १२६

५४ चत्वारिंशके कृतस्तवं प्रविशत्पुरीं ततोक्रूरानंदानुष्टः सुदाम्नो वायकस्य च १ सवधीं कमक्रूर मनः प्रमोदधस्वधामसंदर्शनसत्कृपातः स्व ४१
राजधानीं मधुरामपश्यदलंकृतानंतमहोत्सवां तां २॥ १।२।३ भूमौ वियति जले वा यावंत्यद्भुतानि तानि त्वय्येव संति तं च त्वां विपश्यतो मे किम

शुक उवाच स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः १ सोपि
चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् २ तमपृच्छद्धृषीकेशः किं 505
ते दृष्टमिवाद्भुतं भूमौ वियति तोये वा तथा त्वां लक्षयामहे ३ अक्रूर उवाच अद्भुतानीह यावंति भूमौ वि
यति वा जले त्वयि विश्वात्मके तानि किं मे दृष्टं विपश्यतः ४ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ।
म ५ तं त्वानुपश्यतो भूमन्किं मे दृष्टमिहाद्भुतं ५ शुक उवाच इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः मथुरा
मनयद्रामं कृष्णं चैव दिनात्यये ६ मार्गे ग्रामजना राजंस्तत्र तत्रोपसंगताः वसुदेवसुतौ वीक्ष्य प्रीत्या
दृष्टिं न चाददुः ७ तावद्व्रजौकसस्तत्र नंदगोपादयोग्रतः पुरोपवनमासाद्य प्रतीक्षंतो वतस्थिरे ८ ता
न्समेत्याह भगवानक्रूरं जगदीश्वरः गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ९

वेदृष्टमित्यर्थः ४ ननु मत्प्राप्तेः पूर्वमेव त्वं विस्मितं मुखोल्लसितोसि अतो भूमौ वियति जले वा किमद्भुतं दृष्टं चेह दृश्यत आह यत्रेति यत्र त्वयि सर्वाद्भुता ॥ अद्भुतमदृष्टं अपि तु स
नि त्वामिह पश्यतो मे भूम्यादौ किमद्भुतं दृष्टं त्वां विना न किंचिदद्भुतमित्यर्थः हे भूमन् हे परमेश्वर ५ गांदिनीसुतोक्रूरः ६ दृष्टिं नाददुः पश्यंत्य एवास्थिताः ७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा०द०पू० स्वगृहं प्रविशतां अवमुच्य उत्तार्य विश्रामेत्यर्थः १०।११ साग्रजः सहगोपालैरित्यर्थः १२ यच्छौचेन यस्य पादरजःक्षालनोदकेन गृहांग
१२७ णस्थिते १३ श्लोक्यः पुण्यकीर्तिर्दैः एकांतभक्तानां या गतिः तां च लेभे १४ अपुनन् पवित्रयंत्यः याभिरद्भिः स्वर्गं प्राप्ताः १५ प्रार्थयति नमस्करो

श्रीभगवानुवाच भवान्प्रविशतामग्रे सहयानः पुरीं गृहं वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीं १०
अक्रूर उवाच नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ११
आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम १२ पुनीहि पा
दरजसा गृहान्नो गृहमेधिनां यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः १३ अवनिज्यांघ्रियुगलमा
सीत्श्लोक्यो बलिर्महान् ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां च या १४ आपस्तेऽघ्र्यवनेजन्यस्त्रींल्लो
कान्शुचयोऽपुनन् शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः १५ देवदेव जगन्नाथ पुण्यश्रवणकी
र्तन यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते १६ श्रीभगवानु० आयास्ये भवतो गेहमहमार्यस
मन्वितः यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं १७ शुक उ० एवमुक्तो भगवता सोऽक्रूरो विमना
इव पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ १८ ॥

॥ निर्द्वंवेति अतः परमन्यच्छ्रेयो नास्तीति मत्वा बहुधा संबोधयति १६ श्रीरामः
आर्येणाग्रजेन यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा सुहृत्प्रियं वितरिष्ये दास्यामि १७ रामकृष्णाभ्यां विनीता विविक्तस्तं कर्मावेद्य [illegible]र्येति १८ १२७

गोपैः परिवारितः प्राविशत् १९ पुरीमनुवर्णयति चतुर्भिः ददर्शेति स्फाटिकानि तुंगानि गोपुराणि पुरद्वाराणि यस्यां तां बृहंति हेममया
नि कपाटानि च तोरणानि च यस्यां तां ताम्रं च आरकूटश्च तन्मयाः कोष्ठा धान्यागाराश्च शालादयो यस्यां तां परिखाः परितः खातगर्ता
स्ताभिर्दुरासदां दुर्गमां उद्यानानि दूरस्थानि वनानि रम्याणि उपवनानि निकटानि तैरुपशोभितां २० सौवर्णशृंगाटकाश्चतु
ष्पथ हर्म्याणि धनिनां गृहाणि निःकुटा गृहोचिता आरामाश्च तैरुपशोभितां श्रेणीनां एककर्मोपशिल्पोपजीविनां सभाभिः

अथापराह्णे भगवान्कृष्णः संकर्षणान्वितः मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः १९ ददर्श तां स्फा
टिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणां ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोप
शोभितां २० सौवर्णशृंगाटकहर्म्यनिःकुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां वैडूर्यवज्रामलनी
लविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु २१ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हि
नादितां संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलां २२ ॥ ॥ उपसंवेशनस्थानैः

अन्यैश्च भवनैर्गृहैः उपस्कृतां अलंकृतां अमलयः स्फटिकः हरितो मरकतवैडूर्यादिरत्नैर्जुष्टेषु वलभ्यादिषु आविष्टैः पारावतैर्ना
दितां तत्र वलभ्यो गृहभुवो भागेषु वक्रदारुच्छादनानि वेद्यो वलभीनामधोदेशविरचिता उपष्टंभवेदिकाः २१ जालामुखरंध्राणि ग
वाक्षच्छिद्राणि कुट्टिमानि मणिबद्धभूमयस्तेषु स्थिति रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गा अन्ये चत्वराणि शृंगाटकानि संसिक्तानि रथ्यादी
नि [illegible] प्रकीर्णानि माल्यादीनि यस्यां तां [illegible]
[illegible] २२

506
507
CC-0. Gu[illegible] University Haridwar Collection. Digitized by S3 Foundation USA

भाद·पू·
१२८

कैः आपूर्णैः कुंभैः दध्ना चंदनेन उक्षितैः सिक्तैः प्रसूनानां दीपानां आवल्यो येषु वृंदैः फलगुच्छैः उपलक्षिता रंभा क्रमुकाः तत्सहितैः केतुभिः केतवः ध्वजाः तत्सहिताः पट्टिका वितस्ति विस्तार पट्टवस्त्राणि तत्रैवं रीति द्वारेषु उभयतः कुंभास्तेषामुपरि कुंभास्तपरितः प्रसूनावलयः कंठे पट्टिकासु रवेचूतादि पल्लवैः तदुपरि पात्रांतरे दीपावलयस्तत्संनिधौ रंभाक्रमुकाः केतवस्तोरणानि चे 508

आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः सवृंदरंभाक्रमुकैः सकेतुभिः स्वलं

नं कृतद्वारगृहां सपट्टिका २३ तां संप्रविष्टौ वसुदेवनंदनौ वृतौ वयस्यैः नरदेववर्त्मना द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियः हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः २४ काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्वपराश्च लोचनं २५
अश्नन्त्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः स्वपंत्य उत्थाय निशम्य निःस्वनं निपातयंत्योर्भमपोह्य मातरः २६

ति २३ नरदेवानां वर्त्मना राजमार्गेण तां पुरीं संप्रविष्टौ विति द्वितीयान्तम् २४ औत्सुक्यमप्याह काश्चिदिति विपर्यक् धृतावस्त्रभूषा द्वयम् युगलेषु एकं भूषणं कृत्वा एकनेत्रे अंजनं दत्वा न द्वितीये २५। श्रीरामः
ततः भोजनं त्यक्त्वा अभ्यज्यमाना क्रियमाणे तैलाभ्यंगा अकृतस्नानाः अपोह्य निरस्य॥ २६॥ श्रीराम १२८

आल्भायालीलाताभिर्हसिताभीक्षणानि तैः श्रियं रमयतीति श्रीरमणः तेनात्मनावपुषा तासां दृशां महोत्सवं ददन्मनांसि जहार २७ मुहुः श्रुतत्वान्नंदितचेतसः सद्यस्तं दृष्ट्वा तस्य प्रेक्षणं तु स्मितं च तदेव धारा तया उक्षणं सेचनं तेन लब्धो मानो याभि

मनांसि तासाममरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः जहार मत्तद्विरदेंद्रविक्रमो दृशां ददन् श्रीरमणात्मनोत्सवं २७ दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणल 509
ब्धमानाः आनंदमूर्तिमुपगृह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिं २८ प्रासादशि
खरारूढाः प्रीत्युत्फुल्लमुखांबुजाः अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ २९ दध्यक्षतैः
सोदपात्रैः स्रग्गंधैरभ्युपायनैः तावानर्चुः प्रमुदिताः तत्र तत्र हि द्विजातयः ३० ऊचुः पौराः अहो गोप्यः तपः किमचरन्महत् याह्येतावनुपश्यंति नरलोकमहोत्सवौ ३१ रजकं कंचिदायांतं रंग
कारं गदाग्रजः दृष्ट्वा याचत वासांसि धौतान्युत्तमानि च ३२ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ३३॥

सि लब्धं प्राप्तं ध्यजूपतदप्राप्तिजनितमनं माधिं व्यथां जहुः हे अरिंदम निर्जितकामेति संबोधनं शृंगाररसे निमग्ना
मा भूदिति २८ सौमनस्यैः शोभनकुसुमैः २९। ३० पौराः पुरस्त्रियः ३१ रजको वस्त्रनिर्णेजकः स एव रंगकारः ३२॥ ३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰ग॰द॰ १२९

रुषितः कुपितः ३४ हे उद्वृत्ताः गिरौ वने चराः नित्यं परिधत्त अभीप्सथ प्रार्थकं ३५ राजकुलानि राजकीयाः लुंपंति निःसंकुचै

सयाचितो भगवता परिपूर्णेन सर्वतः साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ३४ ईदृशान्येव वासां
सि नित्यं गिरिवनेचराः परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ३५ याताशु बालिशा मैवं प्रार्थ्यं
यदि जिजीविषा बध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि हि ३६ एवं विकत्थमानस्य कुपितो दे
वकीसुतः रजकस्य कराग्रेण शिरः कायादपाहरत् ३७ तस्यानुजीविनः सर्वे वासःकोशान्
विसृज्य वै दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ३८ वसित्वात्मप्रिये वस्त्रे कृष्णः संकर्षण
स्तथा शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ३९ ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत्
विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां रामकृष्णौ विरेजतुः स्वलंकृतौ
बालगजौ पर्वणीव सितेतरौ ४१ ततः प्रसन्नो भगवान्[illegible]दात्सारूप्यमात्मनः श्रियं च पर
मां लोके बलैश्वर्यस्मृतीन्द्रियं ४२ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः तौ दृष्ट्वा स
समुत्थाय ननाम शिरसा भुवि ४३ ॥

९ ति ३६।३७ वासः कोशान् वस्त्रपुटकान् ३८ वायकस्तंतुवायः रामः
विशेषः वेषं अलंकारं चैलेयैः वस्त्रमयैः अकल्पैः भूषणैः ४० पर्वणि उत्सवे ४१ इह लोके परमं श्रियं बलं ऐश्वर्यं च स्मृतिं च १२९

४४।४५ क्षेमाय अभयाय भवाय उत्सवाय ४६ रजकवधेन वायकानुग्रहेण च युवयोर्विषमदृष्टितया अ
नीश्वरता न शंकनीयेत्याह अत्र हेतुः समयोरिति अत्रापि हेतुद्वयं सुहृदो जगदात्मनोरिति ४७।४८ इत्यभिप्र

तयोरासनमानीय पाद्यं चार्घ्यार्हणादिभिः पूजां सानुगयोश्चक्रे स्रक्तांबूलानुलेपनैः
४४ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४५ भव
न्तौ किल विश्वस्य जगतः कारणं परं अवतीर्णाविहांशेन क्षेमाय च भवाय च ४६ न हि वां वि
षमा दृष्टिः सुहृदोर्जगदात्मनोः समयोः सर्वभूतेषु भजंतं भजतोरपि ४७ तावाज्ञापयतं भृत्यं कि
महं करवाणि वां पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्य राजेंद्र सुदामा प्री
तमानसः शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ४९ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानु
गौ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ५० सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ।
तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ५१ इति तस्मै वरं दत्त्वा श्रियं चान्वयवर्द्धिनीं बलमायु
र्यशःकीर्तिं निर्जगाम सहाग्रजः ५२ इति श्रीभागवते दशमस्कंधे एकचत्वारिंशोऽध्यायः

त्यौति एवं विज्ञापयन् अभिप्रेत्य तन्मयं ज्ञात्वा ४९।५०।५१ अन्वयवंशवर्द्धिनीं अप्रार्थितं श्री आदि इति कं दत्त्वा ततो निर्जगाम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
१३०

सैरंचरन्मधुपुरे रजकं निहत्य हस्तः प्रदायचवरान्यवायकाय मालाकृतं समनुकंप्य चकार कुब्जामृज्वींध
नुष्यसहसोन्नमयन्बभंज १ द्विचत्वारिंशके कुब्जां नमयन्धनुषो भिदा वधस्तद्रक्षिणां कंसारिष्टरंगो
त्सवादिच २ अंगलेपाश्चंदनाद्यः गृहीतान्यंगविलेपभाजनानि ययातां रसप्रदः सुखप्रदः १ हे अंग हेव

शुक उवाच अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनां विलोक्य
कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः १ का त्वं वरोर्वेतदु हानुलेपनं
कस्यांगने वा कथयस्व साधु नः देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भवि
ष्यति २ सैरंध्र्युवाच दास्यस्म्यहं सुन्दर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि
मद्भावितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसि
तालापवीक्षितैः धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ४ ॥ २ रोरु इति सोपहासं बोधप्रश्नः

तिलंका एतदनुलेपनं कस्य वस्तु हइति निपातो भूविलेपयुक्ते श्वितकैः अस्मत्सेवा सद्यः फलतीति रचिरादिति २ इति
स्वः श्रीबाउरः कटयो वक्रो इति त्रिवक्रेति नाम यस्याः सा अंगलेपनक्रिया साधनायां कंसस्य बहुमानादास्यस्मि ३ ॥
रूपं चांगसौष्ठवं पेशलं सौकुमार्यं चरसिकता हसितं चआलापाश्च वीक्षितं च तैर्धर्षितात्मा मोहितचित्ता सांद्रघनमनु

राम कृष्णाभ्यामितरः पीतादिवर्णास्तेन शोभितं शीलं यस्य तेन संप्राप्तपरभागेन संप्राप्तः परो नाभेरुपरितनो भागो ये
न संप्राप्तः परभागशोभस्याभायेनेति वातेनानुरंजितौ ५ स्वदर्शने सद्यः दर्शयन् ६ तस्याप्रपदे पादाग्रद्वयं पद्भ्यामाक्र

ततस्तावंगरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन शुशुभातेनुरंजितौ ५ प्रसन्नो भगवान्
कुब्जां त्रिवक्रां रुचिराननां ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलं ६ पद्भ्यामाक्रम्य प्रपदे
द्व्यंगुल्युत्तानपाणिना प्रगृह्य चिबुकेध्यात्ममुदनीनमदच्युतः ७ सा तदर्जुसमानांगी बृहच्छ्रो
णिपयोधरा मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ८ ततो रूपगुणौदार्यसंपन्ना प्राह के
शवं उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ९ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्स
हे त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ १० एवं स्त्रिया याच्यमानः कृष्णो रामस्य
पश्यतः मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ११ एष्यामि ते गृहं सुभ्रु पुंसामा
धिविकर्षणं साधितार्थोगृहाणां नः पांथानां त्वं परायणं १२ ॥

स्मिन्पाणौ तेन च चिबुके मुखस्याधोभागे धृत्वा अध्यात्मं देहं उन्नमयामास ७ तदेव ऋजु समानमंगं यस्याः ८ द्व्यंगुल्यौ उत्तानेय
धरौ यस्याः सा मुकुंदस्पर्शनादिति मुख्यं कारणं ८ ॥ ९ । ११ आधिविकर्षणं मनःपीडाशमनं कंसवधेन साधितः अर्थः सुहृदां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰ अयनं त्वमाश्रयः मधुरया गिरा तां प्रस्थाप्य वणिक्पथे वणिग्भिरर्चितः १३ लेख्या चित्रन्यस्ता इव मूर्तयो यासां ताः १४ धनुर्म
१३१ खशालां पृच्छन् १५ प्रसह्य बलात् १६ निमिषेण निःशेषं मदकरी मत्तहस्ती १७।१८ गृह्यतां वध्यतामिति वदन्तो जि

सुक उवाच विसृज्य माधव्या वाण्या तां व्रजन्मार्गे वणिक्पथैः नानोपायनताम्बूलैः स्रग्गन्धैः समा
गतोऽर्चितः १३ तद्दर्शनस्मरक्षोभादात्मानं नाविदन्स्त्रियः विस्रस्तवासःकवरवलयाले
ख्यमूर्तयः १४ ततः पौरान्पृच्छमानो धनुषः स्थानमच्युतः तस्मिन्प्रविष्टो ददृशे धनुरैन्द्र
मिवाद्भुतं १५ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् वार्यमाणो नृभिः कृष्णः प्रसह्य ध
नुराददे १६ करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यतां नृणां विकृ
ष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः १७ धनुषो भज्यमानस्य शब्दः खं रो
दसी दिशः पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् १८ तद्रक्षिणः सानुचराः कुपिता
आततायिनः गृहीतुकामा आववुर्गृह्यतां वध्यतामिति १९ अथ तान्दुरभिप्रायान्वि
लोक्य बलकेशवौ क्रुद्धौ धनुर्वा आदाय शकले तांश्च जघ्नतुः २० श्रीरामः श्रीराम
घ्नन्त आवव्रुः वेष्टितवन्तः १९ न केवलं क्रुद्धौ किन्तु भग्नस्य धनुषः शकले गृहीत्वा जघ्नतुश्चेति २० १३१

परतः प्रातर्गन्तव्यमिति शालामुखादेव पुनर्निष्क्रम्य २१ तेजः प्रभावं प्रागल्भ्यं धृष्टतां २२ शकटं शकटावमोचनस्थानं २३ मु
कुन्दस्य विगमे व्रजान्निर्गमनसमये याः आशिषः आशासिषत सुखं प्रभाता रजनीयं अद्य ध्रुवं तत्र द्रष्टा भविष्यते इत्यादि मुकुन्द
त्यः ऋता बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य लक्ष्मीमिति वा २४ अवनिक्तं क्षालितं अङ्घ्रियुग्मं ययोस्तौ क्षीरमिश्रमन्नं भुक्त्वा

बलं च कंसप्रहितं हत्वा शालामुखात्ततः निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः २१ तयोस्तदद्भुतं
ग वीर्यं निरीक्ष्य पुरवासिनः तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ २२ तयोर्विचरतोः स्वैरमा
दित्योऽस्तमुपेयिवान् कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः २३ गोप्यो मुकुन्दविगमे विर
हातुरा या आशासताशिष ऋता मधुपुर्यभूवन् संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हि
त्वेतरान्नु भजतश्चकमेऽयनं श्रीः २४ अवनिक्ताङ्घ्रियुगलौ भुक्त्वा क्षीरोपसेचनं ऊषतुस्तां
सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं २५ कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च वधं निश
म्य गोविन्दरामविक्रीडितं परं २६ दीर्घप्रजागरो भीतो दुर्निमित्तानि पश्यति बहून्याच
ष्टोभयथा मृत्योर्दौत्यकराणि च २७ ॥ ॥ सुखं ऊषतुन्यवसताम् २५ परं केवलं रामकृष्णयोर्विक्री
डितं तत् न तु पराक्रमः कश्चित् २६ उभयथा स्वप्नजागरितभेदेन मृत्योर्दौत्यकराणि उत्तरं शिरःस्यप्रतलिहि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यानिदर्शयतिश्लोकत्रयेण प्रतिरूपेदृश्यमानेपिस्वशिरसोऽदर्शनं असत्यपिद्वितीयेचक्षुषोंतर्द्धानेज्योतिषांचंद्रा
दीनांद्वित्वं २८ छायायांप्रतिबिंबेछिद्रप्रतीतिः पिहितकर्णपुटस्यांतश्रूयमाणोयोशब्दस्तस्याश्रवणं वृक्षेषुस्वर्ण

अदर्शनंस्वशिरसः प्रतिरूपेचसत्यपि असत्यपिद्वितीयेचद्वैरूप्यंज्योतिषांयथा २८ छिद्रप्रती
तिश्छायायांप्राणघोषानुपश्रुतिः स्वर्णप्रतीतिर्वृक्षेषुस्वपदानामदर्शनं २९ स्वप्नेप्रेतप
रिष्वंगःखरयानंविषादनं यायान्नलदमाल्येकस्तैलाभ्यक्तोदिगंबरः ३० अन्यानिचेत्थं
भूतानिस्वप्नजागरितानिच पश्यन्मरणसंत्रस्तोनिद्रांलेभेनचिंतया ३१ व्युष्टायांनिशिकौ
रव्यसूर्येचाद्भ्यःसमुत्थिते कारयामासवैकंसोमल्लक्रीडामहोत्सवं ३२ आनर्चुःपुरुषारं
गंतूर्य[illegible]भेर्यश्चजघ्निरे मंचाश्चालंकृताःस्रग्भिःपताकाचैलतोरणैः ३३ तेषुपौराजा
नपदाब्रह्मक्षत्रपुरोगमाः यथोपयोषं[illegible]विविशूराजानश्चकृतासनाः ३४

प्रतीतिःरजःपंकादिषुस्वपदानामदर्शनं एतानिजागरितदुर्निमितानि २९ स्वप्नान्याहप्रेतैःमृतैःपरिष्वंगःखरयानंविषभक्ष
णंनलदमालीजपाकुसुममालीयायात्तैलाभ्यक्तःदिगंबरःतदप्येकंदुर्निमितमिति ३०।३१ कष्टेनकथंचित्प्रमातायांपुनःसू
र्येचाद्भ्यःसमुत्थितइतितथाचश्रुतिःयउदगान्महतोर्णवाद्विभ्राजमानःसलिलस्यमध्यात्समारुषभोलोहिताक्षःसूर्योविपश्चित्

३५ मल्लतालउत्तरः उपरि उच्चैःश्रूयतेयेषुतेषुतूर्येषुउपाध्यायामल्लाचार्याः ३६ उपस्थानंमल्लरंगं ३७ समाहूताःनि
वेदितान्युपायनानियैस्ते ३८ इतिदशमेटीकायां ४२ त्रिचत्वारिंशेकेहत्वागजेंद्रंरामकृष्णयोः रंगप्रवेशसंभाष्यंचा

कंसःपरिवृतोमात्यैराजमंचमुपाविशत् मंडलेश्वरमध्यस्थोहृदयेनविदूयता ३५ वाद्यमाने
षुतूर्येषुमल्लतालोत्तरेषुच मल्लाःस्वलंकृताःदृप्ताःसोपाध्यायाःसमागताः ३६ चाणूरोमुष्टिकः
कूटःशलस्तोशलएवच तआसेदुरुपस्थानंवल्गुवाद्यप्रहर्षिताः ३७ नंदगोपादयोगोपाए
कस्मिन्मंचआविशत् निवेदितोपायनास्तेभोजराजसमाहूताः ३८ इतिश्रीभा·दशमेरंगोपव
र्णनंनामद्विचत्वारिंशः ४२ शुकउवाच अथकृष्णश्चरामश्चकृतशौचौपरंतप मल्लदुंदु
भिनिर्घोषंश्रुत्वाद्रष्टुमुपेयतुः १ रंगद्वारंसमासाद्यतस्मिन्नागमवस्थितं अपश्यत्कु
वलयापीडंकृष्णोंबष्ठप्रणोदितं २ बध्वापरिकरंशौरिःसमुह्यकुटिलालकान् उवाचह
स्तिपंवाचामेघनादगभीरया ३ ॥ १ गरिवाचभावगं १ पूर्वैयुरुतंनिरपराधत्वंयाभ्यांतौ एतदुर्लभव

वतिःधनुर्भंगेकृतेपि आवाभ्यांनिजेश्वर्येसूचितेपितैरोनमुंचति अवांपुनर्जिघांसति अतोस्यमातुलहन
नेनकोपिदोषइति एवंकृतापराधपरिहारावितिः १ अंबष्ठोहस्तिपस्तेननोदितं २ परिकरंयुद्धोचितंपरिधानंदृ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द॰ पू॰ भा॰ ४ अंतको मृत्युः कालस्तन्निभमितं यमस्तन्नियंतन्नि[redacted]नीतेरूपमायस्यतं ५ विगलितो विच्युतः मुष्टिना निहत्या लीषत
१३३ द्वाअंघ्रौ भूव ६ अचक्षाणा अपश्यन् घ्राणमेव घ्राणं तेन दृष्टिर्यस्य सः लोचनागोचरमपि हि पशवो घ्राणेन जानंतीति
प्रसिद्धं परामृशन् धृतवान् पुष्करेण शुंडाग्रेण सः हस्तः प्रसह्य बलेन ७ धनुषः पंचविंशतिर्यावत्तावंतं देशं गजं विच 518

अंव रे अंवष्ट मार्गं नो देह्यपक्रम मा चिरं नो चेत्सकुंजरं त्वाद्य नयामि यमसादनं ४ एवं निर्भर्त्सितोंब
ष्टः कुपितः कोपितं गजं नोदयामास सह स्वायकालांतकयमोपमं ५ करींद्रस्तमभिद्रुत्य करेणातर
सा ग्रहीत् कराद्विगलितः सोपि निहत्यांघ्रिष्वलीयत ६ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवं ॥
परामृशत्पुष्करेण सप्रसह्य विनिर्गतः ७ पुच्छे प्रगृह्यातिबलं धनुषः पंचविंशतिः विचकर्ष य
थानागं सुपर्ण इव लीलया ८ स पर्यावर्तमानेन सव्यदक्षिणतोच्युतः बभ्राम भ्राम्यमाणेन गो
वत्सेनेव बालकः ९ ततोभिमुखमभ्येत्य पाणिनाहत्य वारणं प्राद्रवन्पातयामास स्पृश्यमानः पदे
कर्षयथा नागं सर्पं वहूर्तमानं गजं सुपर्णो गरुड इवयेमिति आविरासीत यथा प्राच्यां दिशीं दुरि व पुष्कलेति वत ८ सपर्यावर्तमानेनेति पुच्छया
हिणां कृष्णं गृहीतुं यदि दक्षिणाः परिवर्तते गजः तर्हि सव्यतो भ्रामयति यदा सव्यतः परिवर्तते तदा दक्षिणातो भ्रामयं स्तेन सह
भ्रमन् गोवत्सेन भ्राम्यमाणेन बालकः स ९ वक्रसायथा न्यो वा बालक इवेति ९ वारणं गजं प्राद्रवन् कर्षणेन समंततो धा श्रीरामः
वन् पातयामास यथा पतति तथा वञ्चयित्वा प्राद्रवदित्यर्थः १० १३३

किं च स धावन्निति प्रहरन् प्रहरन् ११।१२।१३।१४ रंगं समाविशत्तदा वीरश्रिया बभौ इति तृतीयेनान्वयः कथंभूतं अ
शं न्यस्तं गजदंतायेन सः असृजो रक्तस्य मदस्य च विंदुभिः परितोंकितः १५ विरूढाः उद्गताः स्वेदकणिकास्ताभिः उपलक्षितं
वदनांबुरुहं यस्य सः न केवलं समाविशत् किंतु वृतो गोपैरिति १६ तत्र शृंगारादि सर्वरसकदंबमूर्तिर्भगवांस्तत्तदभिप्रायानुसा 519

स धावन्क्रीडया भूमौ पतित्वा सहसोत्थितः तं मत्वा पतितं क्रुद्धो दंताभ्यां सोहनत् क्षितिं ११ स्वविक्रमे प्रति
हते कुंजरेंद्रोत्यमर्षितः चोद्यमानो महामात्यैः कृष्णमभ्यद्रवद्रुषा १२ तमापतंतमासाद्य भगवान्मधु
सूदनः निगृह्य पाणिना हस्तं पातयामास भूतले १३ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया दंतमु
त्पाट्य तेनेनं हस्तिपांश्चाहनद्धरिः १४ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत् अंसन्यस्तविषाणो
सृङ्मदविंदुभिरंकितः १५ विरूढस्वेदकणिकावदनांबुरुहो बभौ वृतो गोपैः कतिपयैर्बलदेवजनार्द
नौ रंगं विविशतू राजन्गजदंतवरायुधौ १६ मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्गोप
नां स्वजनोसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः मृत्युर्भोजपतेर्विराड्विदुषां तत्त्वं परं योगिनां वृष्णी
रेण वर्णीनसाकल्येन सर्वेषामित्याह मल्लानामिति मल्लादीनां अज्ञानदृष्टीनां अशन्यादिरूपेण दशधाविदितः सन् साग्रजो रंगं गत इत्यन्वयः
मल्लाद्यभिव्यंजकारसाः क्रमेण लोके निवध्यते रौद्रोद्भुतश्च शृंगारो हास्यं वीरो दया तथा भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः ॥
अविदुषां विराट् विकलः अपर्याप्तो राजत इति तथा अनेन बीभत्सउक्तः विकलत्वं च पंचभूतसारसर्वांगत्वादिना वक्ष्यते १७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मा०द०पु०
१३४

उद्विविजे भीतो बभूव १८ यथा नटा वितिनिर्जेयत्वं दर्शितं १९ प्रहर्षवेगेन उत्कलितानि उज्जृम्भितानि ईक्षणानि आननानि च येषां ते तयोराननं न पपुः न तृप्तिं प्रापुः निराकाङ्क्षा न बभूवुरित्यर्थः २० तदेवाह पिबन्त इवेति श्लिष्यन्तः परिष्वङ्गं कुर्वत इव लक्षिते त्यर्थः २१ यथा दृष्टं धनुर्भङ्गादि यथा श्रुतं गोवर्द्धनोद्धरणादि तत्तदन्तिके मत्यतदनुरूपमित्यर्थः प्रत्यक्षं च तयोः स्वरूपं गजदन्तादियुक्तं

हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ कंसो मनस्यपि तदा भृशमुद्विविजे नृप १८ तौ रेजतू रङ्गतो महाभुजौ विचित्रवेषाभरणस्रगम्बरौ यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षतां १९ निरीक्ष्य तावुत्तमपूरुषौ जना मञ्चस्थिता नागरराष्ट्रिका नृप प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननं २० पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः २१ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतं तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव २२ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि २३ एष वै किल देवक्यां जातो नीतश्च गोकुलं कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि २४ पूतनानेन नीतान्तं चक्रवातश्च दानवः अर्जुनौ धेनुकः केशी गुह्यकोन्ये च तद्विधाः २५ गावः सपाला एतेन दावाग्नेः परिमोचिताः कालीयो दमितः सर्प इन्द्र

गुणाः शौर्यादयः माधुर्यं हसितालापादि प्रागल्भ्यं धार्ष्ट्यं तैः विस्मिता वा कारायामुद्र ५ " श्च विमदः कृतः २६
हेतुभिः एतावित्यादिभिः २३ किलेति सर्वत्रान्वयः २४ गुह्यकः शंखचूडः अन्ये व्योमासुरादयः २५॥ २६ श्रीराम

श्रीरामः
१३४

२७ आब्रूमं श्रमयुक्तं सुखं श्रा श्रममु खमिति वा यद्वा अस्य श्रमं यथा भवति तथा नरतिस्म २८ अनेन परिरक्षितो यदोर्वंशः सुबहु विश्रुतः सन् श्रियादि लप्स्यतीति २९ धेनुकबकवत्सासुरेषु विपर्ययो वक्ति जेन बानि हतानि अश्चयात् ३० जनेष्वेवं ब्रुवाणेषु

सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं २७ गोप्योस्य नित्यमुदितहसितप्रेक्षणं मुखं पश्यन्त्यो विविधांस्तापांस्तरन्ति स्माश्रमं मुदा २८ वदन्त्यनेन वंशोयं यदोः सुबहुविश्रुतः श्रियं यशो महत्वं च लप्स्यते परिरक्षितः २९ अयं चास्याग्रजः श्रीमान् रामः कमललोचनः प्रलम्बो निहतो येन वत्सको धेनुकस्तथा ३० जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ३१ हे नन्दसूनो हे राम भवन्तौ वीरसंमतौ नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ३२ प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विन्दन्ति वै प्रजाः मनसा कर्मणा वाचा विपरीतमतोन्यथा ३३ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटं वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ३४ तस्माद्राज्ञः प्रियं यूयं वयं च करवाम हे भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ३५ तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः नियुद्ध

...सहमानश्चाणूरोब्रवीदिति ३१।३२।३३।३४ हे द्वा स प्रियं करवामेति राज्ञि प्रीते भूतानि च प्रसीदन्तु ३५।३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰पु॰ ३७ यथोचितं नियुद्धं बाहुयुद्धं भवेत् मल्लसभासदः मल्लसभाधिकृतान् अधर्मो मा स्पृशेदित्यर्थः हे मल्लेति वा ३८ सहस्रद्विपा
१३५ नां सत्वं बलं बिभर्तीति ३९ तथा बलिभिर्महद्भिः सह अनयोः अधर्मः विक्रमं पराक्रमं कुरु मुष्टिको विक्रमतात् ४० इतिद

जा प्रभोजपतेरस्य वयं चापि वनेचराः करवाम प्रियं नित्यं तन्नः परमनुग्रहः ३७ बाला वयं तुल्य
बलैः क्रीडिष्यामो यथोचितं भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ३८ चाणूर उवाच न
बालो न किशोरस्त्वं बलश्च बलिनां वरः लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ३९ तस्माद्भव
द्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ४० इति श्रीभागवते ६५४
दशमे कुवलयापीडवधो द्विचत्वारिंशः ४२ शुक उवाच एवं चर्चितसंकल्पो भगवान्म
धुसूदनः आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां हस्तयोर्बध्वा पद्भ्यामे
व च पादयोः विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया २ अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव
जानुनी शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ३ ॥ इति श्रीभागवते दशमे टीकायां ४३ चतुश्चत्वारिंशे
केतु मल्लकंसादिमर्दनम् कंसयोषितसमाश्वासन ताभ्यां पित्रोश्च दर्शनम् १ एवमिति चर्चितः निश्चितः संकल्पो श्रीरामः
येन सः १ हस्ताभ्यां हस्तयोरिति २ बाहुमध्या कनिष्ठेऽङ्गुलिव्यतिरेकेणाऽऽनतमुष्टिर्हस्तोऽरत्निः ३ १३५

परिभ्रामणं हस्तौ गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरंभो बाहुभ्यां निःपीडनं अवपातनं अधः क्षेपः उत्सर्पणं उत्स्र
ज्य पुरतो गमनं अपसर्पणं पृष्ठतोऽनुगमनं एतैः प्रत्यवरुन्धतां प्रत्याहृतवन्तौ ४ उत्थापनं पादौ जानुनी च पीडयित्वोर्ध्व
नं उन्नयनं हस्ताभ्यामुद्धृत्यनयनं चालनं कंठादिलग्नस्य निःसारणं स्थापनं पादादि पिंडीकरणं एवं परस्परं आत्म

प परिभ्रामणविक्षेपपरिरंभावपातनैः उत्सर्पणापसर्पणैश्चान्योन्यं प्रत्यरुन्धतां ४ उत्थापनैरुन्नय
नैश्चालनैः स्थापनैरपि परस्परं जिगीषन्तावपचक्रतुरात्मनः ५ तद्बलाबलवद्युद्धं समेताः स
र्वयोषितः ऊचुः परस्परं राजन्सानुकंपा वरूथशः ६ महानयं बताधर्म एषां राजसभासदां
ये बलाबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ७ क्व वज्रसारसर्वांगौ मल्लौ शैलेन्द्रसन्निभौ क्व चातिसु
कुमारांगौ किशोरौ नाप्तयौवनौ ८ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् यत्राधर्मः स
चिन॰१ मुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ९ ॥ ५ नेदेहस्य अयचक्रतुः अपकारं कृतवन्तौ ५ युद्धं बलाबलवत् एकतो बलव
त् एकतोऽबलं युद्धविषममित्युचुरित्यर्थः ६ तदेव दर्शयति महानिति यद्यतः बलाबलवत् ततो युद्धं रु
मित्युचुरित्यन्वयः बलयोर्बलवतोश्च युद्धं राजा नेच्छति स्वयं वा ... एतेन राज्ञः पश्यतः स्वयमप्यन्विच्छन्ति इत्यमधर्म
अनुमन्यन्त इति महानधर्म इति ७ बलाबलवद्युद्धं तात्पर्यं दर्शयति पंचभिः क्वेति वज्रसाराणि वज्रकर्कशानि सर्वांगानि येषांगा ८

अपरा ऊचुः नसभामिति अब्रुवन्त्वा त्वापि तत्स्त्रीं तिष्ठन् विपरीतं विब्रुवन् अतः न जानामीति ब्रुवन् अतः
प्राज्ञः सभां न प्रविशेदिति १० वल्गातः शत्रुमभितः इति शत्रोः सर्वतो धावतः [illegible] मेवारिरामाउ
पूर्व्याः तं वदनांबुजं पश्यतो ११ अन्या ऊचुः किं न पश्यत रामस्य मुखं हासक्रोधरूपालेन संरंभः आवेशस्तेन शोभितः १२ अन्याऊ
चुः पुण्यावतेति नृलिंगेन मनुष्यदेहे नगरूढः वनस्थानि चित्राणि माल्यानि यस्य सः गिरित्रः शिवः रमा च ताभ्यां

नसभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी १० वल्गा
तः शत्रुमभितः कृष्णस्य वदनांबुजं वीक्ष्यतां ध्रुवमार्यैस्तत्पद्मकोशमिवालिभिः ११ किं न पश्य
त रामस्य मुखमाताम्रलोचनं मुष्टिकं प्रति सामर्षं हाससंरंभशोभितं १२ पुण्या बत व्रजभुवो
यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः गाश्चारयन्सहबलः क्वणयंश्च वेणुं विक्री
डियाचति गिरित्ररमार्चितांघ्रिः १३ गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्व
न मनन्यसिद्धं दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य १४
अर्चितांघ्रिर्यस्य सः धिगिमां सभां यस्यामयं पराभूतेत तास्तु व्रजभुवो धन्याः यतो यासु अयं कुसलो विविधक्रीडया अंचति गच्छ
ति १३ अहो कष्टमत्यपुण्या वयं यतो स्माभिरयं तु सरे दृष्टो यं गोप्यस्तु धन्या वहुपुण्या इत्याह त्रिभिः गोप्येति अमुष्य कृष्णस्य रू
[illegible] नसारं [illegible] च असमोर्ध्वं न विद्यते ऊर्ध्वमधिकं च यस्य तत तदपि न अन्येन आभरणादिना किंतु स्वतः एव ऐश्वर्य

यादोहनादिष्वेनं गायंतिता व्रजस्त्रियो धन्याः प्रेंखेंखनं दोलांदोलनं उक्षणं सेचनं कथंभूताः उरुक्रमे चित्ततेनेव यानेन
सर्वविषयप्राप्तिर्यासां ताः पाठांतरे उरुक्रमं चिंतयंत्यतस्तथा कुतः अनुरक्तधियः तत्र लिंगं अश्रुकंठ्यः १५ प्रातरि

यादोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ गायंति चैनमनुरक्तधि
योऽश्रुकंठ्यो धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः १५ प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं
क्वणयतोऽस्य निशम्य वेणुं निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यंति सस्मितमुखं सदय
यावलोकं १६ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः शत्रुं हंतुं मनश्चक्रे भगवान्भरतर्षभ
१७ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ पितरावन्वतप्येतां पुत्रयोरबुधौ बलं १८ तैस्तै
र्नियुद्धविधिभिर्विविधैरच्युतेतरौ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ १९ भगव
द्गात्रनिःपातैर्वज्रनिःपेषनिष्ठुरैः चाणूरो भज्यमानांगो मुहुर्ग्लानिमवाप ह २०॥
ति यां बलाः अस्य वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि सस्मितं मुखं पश्यंति ता भूरिपुण्या इति १६ एवं सभयं ब्रुवाणासु तासां
भयनिवृत्तये कृष्णः शत्रुं हंतुं मनो दधे मनश्चक्रे १७ सभयाः स्त्रीगिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आतुरौ विह्वलौ पुत्रयो
र्यो बलमजानंतौ पितरावनुतापं प्राप्तौ १८।१९ तदा भगवतो गात्राणां अरत्निजानुमुष्ट्यादीनां निःपातैः प्रहारैः वज्रनिःपेषप्रपातः

श्येनस्येव वेगायस्य चाणूरः अबाधत अताडयत २१ भूपृष्ठे रूपरि पोथयामास आस्फालयन् जीव
इंद्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महान् स्तंभो ध्वजपताकाद्यलंकृतः पुरुषाकृतिः उच्छ्रीयते स यथा

स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत २१ नाचलत्तत्प्र
हारेण मालाहत इव द्विपः २२ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः भूपृष्ठे पोथया
मास तरसा क्षीणजीवितं २३ विस्रस्ताकल्पकेशस्रगिन्द्रध्वज इवापतत् तथैव मुष्टिकः पू
र्वं स्वमुष्ट्याभिहतेन वै बलभद्रेण बलिना तलेनाभिहतो भृशं २४ प्रवेपितः स रुधिरमुद्
वन्मुखतोऽर्दितः व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः २५ ततः कूटमनुप्राप्तं रामः प्रह
रतां वरः अवधील्लीलया राजन्सावज्ञं वाममुष्टिना २६ चाणूरे मुष्टिके कूटे शले तोशले
लके हते शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः २७ गोपान्वयस्यानाकृष्य तैः संसृ
ज्य विजहतुः वाद्यमानेषु तूर्येषु वल्गन्तौ रुतनूपुरौ २८ जनाः प्रजहृषुः सर्वे कर्म
णा रामकृष्णयोः ऋते कंसं विप्रमुख्याः साधुसाध्विति वादितः ३० श्रीरामः पातु

तदैव हि शल्यः
तलपादापह
तशीर्षकः द्वि
धा विशीर्णस्तो
शलक उभाव
पि निपेततुः २७
४

पतलितहृदपतदिति २२।२३।२४ अर्दितः पीडितः व्यसुः उर्व्युपस्थे भूतले २५।२६।२७।२८ वल्गन्तौ नृत्यन्तौ २९ साधुसाध्वि

३१।३२।३३ अव्ययः अश्रमः लघिम्ना लाघवेन ३४।३५ दुर्विग्रहं अविषह्यं उग्रं तेजो यस्य स महत्सः ३६ गरिष्ठायवि

हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ३१ निःसार
यत दुर्वृत्तौ वसुदेवसुतौ पुरात् धनं हरत गोपानां नन्दं बध्नीत दुर्मतिं ३२ वसुदेवस्तु दुर्मेधा ह
न्यतामाश्वसत्तमः उग्रसेनः पिता चापि सानुगः परपक्षगः ३३ एवं विकत्थमाने वै कंसे प्रकु
पितोऽव्ययः लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ३४ तमाविशन्तमालोक्य मृत्युमात्म
न आसनात् मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ३५ तं खड्गपाणिं विचरन्तमाशु
श्येनं यथा दक्षिणसव्यमम्बरे समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ३६
प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमंचात् तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ३७ तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विप
श्यतः हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेन्द्र ३८ स नित्यदोद्विग्नम
ना स्तमीश्वरं पिबन्वदन्वा विचरन्स्वपन्श्वसन् ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दु

ष्टिः भः ३६ ष्टि ट्टि ष्टि

आश्रयत्वमुक्तं तत्र हेतुः अब्जनाभः कुतस्तस्योपर्येवं पपात आत्मतंत्रः ३७।३८। ३९ श्रीरा[illegible]यतितराम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४०

निर्वेशो निःकृतिः अनृण्यमित्यर्थः तत्कारिणसंतस्तेभ्यधावन्तेयाताः हंतुं अभिवीसोवेगो येषांतान्संयत्तानुद्युक्तान ॥४१॥४२॥४३॥ शोचंत्यो

तस्यानुजा भ्रातरो ष्टौ कंकन्यग्रोधकादयः अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ४० तथातिरभसांस्तांस्तु संयत्तान्रोहिणीसुतः अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ४१ नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः पुष्पैः किरंतस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ४२ तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ४३ शयानान्वीरशय्यायां पतीनालिंग्य शोचतीः विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ४४ हा नाथ प्रियधर्मज्ञ करुणानाथवत्सल त्वया हतेन निहता वयं ते सगृहप्रजाः ४५ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ न शोभते वयमिव निवृत्तोत्सवमंगला ४६ अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणं तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शं ४७ सर्वेषामिह भूतानामेष हि प्रभवाप्ययः गोप्ता च तद्वध्यायी न क्वचित्सुखमेधते ४८ शुक उवाच राजयोषित आश्वास्य भगवाँल्लोकभावनः या

विलापाः अश्रूणि शुचः अश्रूणि ४४ धर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि ते तव वीयावयं ४५ त्वया पत्या विरहिता पुरीयं न शोभते ति स्वदृष्टाभिधानं ४६
अनागसामिति परमार्थाभिधानं ४७ एष श्रीकृष्णः प्रभवत्यस्मादिति प्रभवः अपियंत्यस्मिन्निति अप्ययः तदवध्यायी तदवज्ञां कुर्वशीलं यस्य सः ४८॥४९

528

आस्पृश्य ईषत्स्पृष्ट्वा ५० पुत्रभ्रांतिं विहाय जगदीश्वरावितिज्ञात्वा शंकितौ न सस्वजाते नालिंगितवंतौ किंतु बद्धांजलीतस्थतुरित्यर्थः ५१ प्रस
व्यहत्वा हस्तीद्रं मल्लेन्द्रान्मल्लीलया वीभत्सचरितं कंसं सवीभत्समारयत् १ इति दशमे टीकायां ४४ पंचचत्वारिंशके थ पित्रनंदादिसांत्वनं
उग्रसेनाभिषेकश्च गुरोर्वासात्सुरागमः १ उपलब्धार्थाविति अयमर्थः उपसमीपे आवयोः पुत्रबुध्या सांसारिकभोगान्पूर्वमेव लब्धौ अर्थौ आवामीश्व

मातरं पितरं चैव मोचयित्वाथ बंधनात् कृष्णरामौ ववंदाते शिरसा स्पृश्य पादयोः ५० देवकी वसुदेवश्चाविज्ञाय जगदीश्वरौ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ५१ इति भागवते दशमस्कंधे कंसवधश्चतुश्चत्वारिंशोध्यायः ४४ शुक उवाच पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः माभूदिति निजां मायां ततान जनमोहिनीं १ उवाच पितरावेत्य साग्रजः सात्वतर्षभः प्रश्रयावनतः प्रीणन्नंब तातेति सादरं २ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि बाल्यपौगंडकैशोराः पुत्राभ्यामभवन्क्वचित् ३॥ ॥ रौ इति

ईश्वरावित्यर्थः परमेश्वरत्वज्ञानं नामकिं दुर्लभं तु मयि पुत्रतया प्रेमश्रतदृदानीमिव तत्त्वज्ञानं माभूदिति निजां मायां स्वाधीनां तयोः प्रसारितवान् १ तदेवदर्शयति उवाचेत्यष्टभिः प्रीणयन्सादरं बुवन् २ अस्मत्तः अस्मन्निमित्तं नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्यां आवाभ्यां बाल्यपौगंडकैशोराः तत्र तदवस्थानुभवसुखानि अर्थैः तेनाऽभवन्निमित्तमाभ्यां पुत्राभ्यां इति समानाधिकरणं वा ३ ॥श्रीराम

प्रसन्नान १ (margin: न २)

529

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्तयोरात्मजःकल्पआत्मनाचधनेनच वृत्तिंनदद्यात्तंप्रेत्यस्वमांसंखादयंतिहि ६। मू॰ २

द॰भा॰पू॰ आवामेवंदेवहीनावित्याहु नलब्धइति पितृगेहस्थाबालायांमुदंविंदते यच्चनलब्धा एवंतावत् श्लोकद्वयेनयुवयोश्चावयोश्चकार्येदा
१३९ निर्यातेत्युक्तं ५ आवयोःयुष्मत्परिचर्यालोपेनधर्महानिरपियातेत्याह सर्वार्थसंभवेति सर्वेषांधर्माद्यर्थानांसंभवोयोदेहोयतस्ताभ्यांजनि
तःपोषितश्च तयोःपित्रोर्निर्वेशंआनृण्यंशतसंवत्सरमात्रायुषापिमर्त्योनप्राप्नोति ५ तन्मध्येपितुर्यःपुत्रःकल्पःसमर्थःसन्नपिदेहेन

530

नलब्धोदैवहतयोर्वासोनौभवदंतिके यांबालाःपितृगेहस्थाविंदंतेलालितामुदं ४ सर्वार्थसंभवो
देहोजनितःपोषितोयतः नतयोर्यातिनिर्वेशंपित्रोर्मर्त्यःशतायुषा ५ मातरंपितरंवृद्धंभार्यांसा
ध्वींसुतंशिशुं गुरुंविप्रंप्रपन्नंचकल्पोबिभ्रच्छ्वसन्मृतः ७ तन्नावकल्पयोःकंसान्नित्यमु
द्विग्नचेतसोः मोघाएतेव्यतिक्रांतादिवसावामनर्चतोः ८ तत्क्षंतुमर्हथस्तातमातर्नौपर
तंत्रयोः अकुर्वतोर्वांशुश्रूषांक्लिष्टयोर्दुर्हृदाभृशं ९ श्रीशुकउवाच इतिमायामनुष्यस्यहरेर्वि
श्वात्मनोगिरा मोहितावंकमारोप्यपरिष्वज्यापतुर्मुदं १० सिंचंतावश्रुधाराभिःस्नेहपाशेनचावृ
ति तौ नकिंचिदूचतूराजन्बाष्पकंठौविमोहितौ ११ एवमाश्वास्यपितरौभगवान्देवकीसुतः मातामह

धनेनचपित्रोर्वृत्तिंजीविकांनपादयेत्तंप्रेत्यलोकांतरेयमदूताःस्वमांसंखादयति ६ मातुःशुश्रूषामकुर्वन्विफलजीवितश्चभवतीत्याह मातरमिति अबिभ्रच्च श्रीरामः
पुष्णन्श्वसन्नपिमृतस्तुल्यइति ७ तत्तस्मान्नौआवयोःमोघंव्यर्थंअनर्चतोःअपूजयतोः ८ दुर्हृदाकंसेन ९।१०।११ आश्वास्यशान्तयित्वा १२ १३९

त्वमेवाज्ञापयेतिमांवदेत्याह ययातीति नवनुयादवत्वेपिमदात्पानदोषइतिभावः १३ ममतादृशीशक्तिर्नास्तीतिचेत्तत्राह मयीति मत्प्रसादेनसर्वंभविष्यती
ति १४ स्वान्ज्ञातीन्संबंधांश्चदिग्भ्यआनायेति १५।१६ सिद्धाःपूर्णाः कृष्णरामाभ्यांगतानिरस्तोज्वरोयेषांते १७ सदयस्मितमीक्षणंयस्मिंस्तत् १८ प्रवयसोवृद्धा

531

आहचास्मान्महाराजप्रजाश्चाज्ञप्तुमर्हसि ययातिशापाद्यदुभिर्नासितव्यंनृपासने १३ मयिभृ
त्यउपासीनेभवतोविबुधादयः बलिंहरंत्यवनताःकिमुतान्येनराधिपाः १४ सर्वान्स्वान्ज्ञाति
घ संबंधान्दिग्भ्यःकंसभयाकुलान् यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् १५ सभाजि
तान्समाश्वास्यविदेशावासकर्षितान् न्यवासयन्स्वगेहेषुवित्तैःसंतर्प्यविश्वकृत् १६ कृष्ण
संकर्षणभुजैर्गुप्तालब्धमनोरथाः गृहेषुरेमिरेसिद्धाःकृष्णरामगतज्वराः १७ वीक्षंतोहरहः
प्रीतामुकुंदवदनांबुजं नित्यप्रमुदितंश्रीमत्सदयस्मितवीक्षणं १८ तत्रप्रवयसोप्यासन्
युवानोतिबलौजसः पिबंतोक्षैर्मुकुंदस्यमुखांबुजसुधांमुहुः १९ अथनंदंसमासाद्यभ
न्दे गवान्देवकीसुतः संकर्षणश्चराजेंद्रपरिष्वज्येदमूचतुः २० पितर्युवाभ्यांस्निग्धाभ्यांपोषि
तौलालितौभृशं पित्रोरभ्यधिकाप्रीतिरात्मजेष्वात्मनोपिहि २१॥

१९ अपिअतिशयितंबलमोजोयेषांते
१९।२० भृशंआत्मनोप्यधिकेयंनूनपितोनचाश्चर्यमेतदित्याह पित्रोरिति आत्मनोदेहाद्यात्मजेष्वभ्यधिकाहिप्रीतिरिति २१ श्रीरामजीसदासहाय श्रीरामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा·द·पु·
१४०

की
देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्राविति न वाच्यमित्याह सपितेति २२।२३ सव्रजं व्रजवासिभिः सहितः कुप्यानि स्वर्णरौप्यातिरिक्तकांस्यादिपात्राणि २४।२५ पुरोधसा गर्गाचार्येण

सपिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे २२ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं २३ एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः वासोलंकारकुप्याद्यैरर्हयामास सादरं २४ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ २५ अथ शूरसुतो राजन्पुत्रयोः समकारयत् पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं २६ तेभ्योऽदाद्दक्षिणा गावो रुक्ममाल्यः स्वलंकृताः स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनी २७ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः २८ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ २९ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ३० अथो गुरुकुले वासमिच्छंतावुपजग्मतुः काश्यं सांदीपनं नाम ह्यवंतीपुरवासिनं ३१ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदितां ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः प्रोवाच वेदा

एद्विजसंस्कृतिमुपनयनं २६ गावो गाः रुक्मस्य माला यासां ताः २७ याः पूर्वं मनोदत्ताः २८ गायत्रं ब्रह्मचर्यं २९ प्रकर्षेण भवंत्याभ्यामिति प्रभवौ अत एव सर्वज्ञौ स्वतःसिद्धामलं ज्ञानं प्रच्छादयंतौ नरचेष्टितैः ३०।३१ यथावदुपसाद्य प्राप्य गुरौ रतिमनन्यां ग्राहयंतौ शिक्षयंतौ गुरुमुपेतौ सेवितवंतावित्यर्थः ३२ शुद्धो भावो यासु ताभिरनुवृत्तिभिः सेवा

श्रीराम
१४०

532

ननु स्वस्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्च तस्यान्येभ्यः को विशेष इत्याशंक्याह यस्मिन्निति द्वाभ्यां कर्माशयं कर्मवासनां निर्हृत्य ब्रह्मभावन्मयः स्वरूपज्ञानवान् अर्कवर्णः शुद्धसत्वमूर्तिः सन्परां गतिं तत्पदं याति ३२ अखिलस्यात्मा च हेतुश्च तस्मिन् कारणेन मनुष्याकृतौ परिपूर्णो भगवतो भक्तिं कुरुतः अतः कृतकृत्यावित्यर्थः ३३ प्रस्तुतमाह आगमिष्यति पित्रोर्युवयोः ३४ यात यूयं व्रजं तातेति यदाह कृष्णस्तत्सत्यं करिष्यतीति ३५॥

533

यस्मिन्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धं निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ३२ तस्मिन्भवंतावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ भावं विधत्तां नितरां महात्मन् किं वावशिष्टं युवयोः सुकृत्यं ३३ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः प्रियं विधास्यते पित्रोर्भगवान्सात्वतां पतिः ३४ हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वतां यदाह वः समागत्य कृष्णः सत्यं करोति तत् ३५ मा खिद्यतां महाभागौ द्रक्ष्यथः कृष्णमंतिके अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ३६ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः नोत्तमो नाधमो वापि समानस्यासमोऽपि वा ३७ न माता न पिता तस्य न भार्या न सुतादयः नात्मीयो न परश्चापि न देहो जन्म एव च ३८

कालविलंबनमसहमानौ प्रत्याह मा खिद्यतामिति हे महाभागौ अंतिके इदानीमेव समीपे आकृतः इत्याह अंतर्हृदीति तर्हि सर्वैः किमिति न दृश्यते तत्राह ज्योतिरिवैधसीति यथा मथनं विना न दृश्यते तथा भक्तिं विना सोऽपीति भावः ३६ अहो अस्मास्वतस्य त्वदागमनं स्वस्यातिप्रिया पुत्रादीन्विहाय न गच्छत्तदृतिमन्ये तत्राह अस्य प्रियादयो न हि संति तत्र ते तु अमानिनः समानस्य चेति ३७॥३८॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोपिजन्मकर्मादिरहितोपि क्रीडाप्रयोजनः सत्साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्विकतामसराजसयोनिषु यद्वा देवादिमत्स्यादिनृसिंहा
दियोनिषु कल्पते आविर्भवतीत्यर्थः ३९ ननु जन्मकर्मादिरहितः कुत एतदित्याह सत्वमिति अनीहः क्रीडामतीतोपि क्रीडत्सतथापि मायागुणैः
यातइत्यर्थः ४० अत्रापि वि[illegible]धोपाधेर्जीवस्य कर्तृत्वं दृष्टांतीकुर्वन्भूतस्याविधेयवकर्तृत्वमाह यथेति भ्रमरिका परिभ्रमणं तयोपलक्षितया

नचास्य कर्म्मवा लोके सदसन्मिश्रयोनिषु क्रीडार्थं सोपि साधूनां परित्राणाय कल्पते ३९ सत्वं
रजस्तम इति भजते निर्गुणो गुणान् क्रीडन्नतीतोपि गुणैः सृजत्यवति हन्त्यजः ४० यथा भ्र
मरिकादृष्ट्या भ्राम्यतीव महीयते चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ४१ युव
योरेव नैवायमात्मजो भगवान्हरिः सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥
४२ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च विना च्युताद्वस्तुतरां न वाच्यं
स एव सर्वं परमार्थभूतः ४३ एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन् गोप्यः
समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमंथयन् ४४॥

९दृष्ट्या भूरपि भ्राम्यतीव प्रतीयते एवं चित्ते
कर्तरि सति तत्र चित्ते चित्ते अहंधिया आत्माध्यासेन आत्मा कर्ता स्मृतो यथा तद्वदिति ४१ किंतु युवयोरेव नायमात्मजः एव किंतु शत्रुमित्रामि
त्रादिरूपोपीति स तावात्मत्वनिरूपणेन मोहनिवृत्तये संबंधमनेकानि कीं करोति युवयोरेवेति द्वाभ्याम् अच्युतादितरं नितरां तत्वो
तो वाच्यं निर्वचनार्हं वस्तु नास्तीति ४२।४३ दीपान्निरूप्य पञ्चात्य वास्तु देहल्यादीन् ४४ श्रीरामायनमः श्रीकृष्णाय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सरहस्यं मंत्रदेवताज्ञानसहितं धर्मान्मन्वादिधर्मशास्त्रादीनि न्यायपथान्मीमांसादीन्आन्वीक्षिकीं तर्कविद्यां संधिश्चविग्रहो यानमासनं द्वैधमाश्रयः ३।४।३।५
तावतीश्चतुष्षष्टिकलास्ताश्चशैवतंत्रप्रोक्तालिख्यंते ॥ गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४ आलेख्यं ५ विशेषच्छेद्यं ६ तंडुलकुसुमविकाराः ७ पुष्पास्त
रणं ८ दशनवसनांगरागाः ९ मणिभूमिकाकर्म १० शयनरचनं ११ उदकवाद्यमुदकघातः १२ चित्रयोगाः १३ माल्यग्रंथनविकल्पाः १४ शेखरापीठयो
जनं १५ नेपथ्ययोगाः १६ कर्णपत्रभंगाः १७ सुगंधयुक्तिः १८ भूषणयोजनं १९ ऐंद्रजालं २० कौचुमारयोगाः २१ हस्तलाघवं २२ चित्रशाकापूपभक्ष्यवि
कारक्रिया २३ पानकरसरागासवयोजनं २४ सूचीवायकर्म २५ सूत्रक्रीडा २६ वीणाडमरुवाद्यानि २७ प्रहेलिका २८ प्रतिमा लाघवं २९ दुर्वचकयोगाः ३०

सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधां ३४ सर्वेनरवरश्रेष्ठौ सर्वविद्याप्रवर्त
कौ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ३५ अहोरात्रैश्चतुष्षष्ट्या संयतौ तावतीः कलाः गुरुदक्षिणयाचार्यं छंदयामासतुर्नृ

पुस्तकवाचनं ३१ नाटकाख्यायिकादर्शनं ३२ काव्यसमस्यापूरणं ३४ पट्टिकावेत्रवाणविकल्पा ३५ तर्ककर्माणि ३६ वास्तुविद्या ३७ रूपरत्नपरीक्षा ३८ धा
तुवादः ३९ मणिरागज्ञानं ४० आकरज्ञानं ४१ वृक्षायुर्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकसारिकाप्रलापनं ४४ उत्सादनं ४५
केशमार्जनकौशलं ४६ अक्षरमुष्टिकाकथनं ४८ देशभाषाज्ञानं ४९ पुष्पशकटिका ५० निमित्तज्ञानं ५१ यंत्रमातृकाधारणमातृ
कासंवाच्यं ५२ मानसी काव्यक्रिया ५३ अभिधानकोशः ५४ छंदोज्ञानं ५५ क्रियाविकल्पा ५६ छलितकयोगाः ५७ वस्त्रगोपनानि ५८ द्यूतविशे
षाः ५९ आकर्षक्रीडा ६० बालक्रीडनकानि ६१ वैनायकानां ६२ वैजयिकानां ६३ वैयासिकानां च विद्याज्ञानि ६४ इति चतुष्षष्टि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽर्भके
प्रभासे क्षेत्रे महाम्भृतं वालं वरयामासतुः ३७ ईश्वराविति विदित्वा समुद्रोऽर्हणमाजहारेति ३८।३९ पांचजन्यस्त्वसुरो हार्षीत्स च महान्समासाध्यकृत्यर्थः ४०

द्विजस्तयोस्तन्महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं संमन्त्र्य ताभ्यां स समाहृतार्णवे मृतं वालं प्रभासे वरयांब
भूवह ३७ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ वेलामुपव्रज्य निषीदतुः क्षणं सि
धुर्विदित्वार्हणमाहरत्तयोः ३८ तमाह भगवानाशु गुरुपुत्रः प्रदीयतां योसाविह त्वया ग्रस्तो वालको मह
तोर्मिणा ३९ समुद्र उवाच नैवाहार्षमहं देव दैत्यः पंचजनो महान् अंतर्जलचरः कृष्ण शंखरूपधरोसुरः
४० आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकं तदंगप्रभवं शंखमादाय
रथमागमत् ४२ ततः संयमनीं नाम यमस्य दयितां पुरीं गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ४३॥
शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां ४४ उवाचावनतः
कृष्णं सर्वभूताशयालयं लीलामनुष्य हे विष्णो युवयोः करवाम किं ४५ श्रीभगवानुवाच गुरुपुत्रमि
हानीतं निजकर्मनिबंधनं आनयस्व महाराज मच्छासनपुरस्कृतः ४६ तथेति तेनोपनीतं गुरुपुत्र
यदूत्तमः दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ४७ श्रीः॥ ॥श्रीराधाकृष्णाभ्यां नमः श्रीरामायनमः

४१।४२।४३ सपर्यां पूजां ४४ सर्वेषां भूतानामाशयोंतःकरणानि तान्यालयो निवासो यस्य तं ४५ निजकर्मैव बंधनं तदा भूतमपि मदाज्ञापुरस्कार

वत्सेति प्राधान्येनैकस्य संबोधनं गुरोर्निःक्रियोगुरुदक्षिणा युष्मद्विधयोर्गुरोर्मम कामानां मध्ये कोनु कामोऽवशिष्यते न कोपि ४८
हेवीरी ४९ अनिलरंहसा वायुवेगेन पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन ५० नष्टं अहष्टं तत्पुनर्लब्धं धनं याभिस्ता इव ५१ इति दशमे टीका
यां॥ ॥४५॥ ॥ षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा यशोदानंदयोश्चक्रे कृष्णः शोकापनोदनं १ गोपीनां सांत्वनं प्रतिरहस्यं सन्मंत्रिसा

गुरुरुवाच सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः कोनु युष्मद्विधगुरोः कामानामवशिष्यते ४८
गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी छंदांस्ययातयामानि भवंत्विह परत्र च ४९ गुरुणैवमनुज्ञा
तौ रथेनानिलरंहसा आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ५० समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ
अपश्यंतो वह्वहानि नष्टलब्धधना इव ५१॥ ॥इति भागवते दशमे पंचचत्वारिंशः॥ ॥४५॥ श्रीशुक उवा
वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः १ तमाह भगवा
न्प्रेष्ठं भक्तमेकांतिनं क्वचित् गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः २ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीति
मावह गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ३ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः मामेव दयितं
प्रेष्ठमात्मानं मनसा गताः ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ४॥

१ध्यामिति तदर्थं उद्धवं विशिनष्टि वृष्णीनामिति वुद्धिसत्त
मः बुद्ध्यातिश्रेष्ठः १।२।३ गोपीनां विशेषतः संदेशकारणमाह ता इति मय्येव संकल्पात्मकं मनो यासां ताः मदर्थे त्यक्ता दैहिकाः पतिपुत्रादयो याभिस्ताः ततः किमत आह॥
येत्यक्तलोकधर्मा इति मन्निमित्तं त्यक्तो लोकधर्मो विहामुत्रसुखे तत्साधनानि च यैस्ताः विभर्मि संवर्द्धयामीत्यर्थः ४॥ श्रीरामायनमोनमः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तासां वियोगाधिं दर्शयति हृद्येन मयिता इति विहारेणाश्रोत्कंठ्यं तेन विह्वलाः परवशाः गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ५ ये प्रत्याग
मनसंदेशास्तैः मदीयाबल्लव्यो गोप्यः मदात्मिका इति तासां मात्मा स्वदेहे यदि स्यात् नहि विरतापेन दह्येनैव मयि वर्तमानत्वात् कथंचिज्जीवंतीति भावः ६
संदेशं भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादिकं ७ निम्लोचति अस्तंगतवति सति छन्नं यानं यस्येति तदा गोपीभिरज्ञातत्वेन नंदसंगं

मयिताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः स्मरंत्योंग विमुह्यंति विरहौत्कंठ्यविह्वलाः ५ धारयंत्यतिकृच्छ्रेण

न प्रायः प्राणान्कथंचन प्रत्यागमसंदेशैर्वल्लव्यो मे मदात्मिकाः ६ शुक उवाच इत्युक्त उद्धवो राजन्संदेशं भर्तु

राहृतः आदाय रथमारुह्य प्रययौ नंदगोकुलं ७ प्राप्तो नंदव्रजं श्रीमान्निम्लोचति विभावसौ छन्नयानः प्र
विशतां पशूनां खुररेणुभिः ८ वासितार्थेभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः धावंतीभिश्च वास्राभिरूधोभा
रैः स्ववत्सकान् ९ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च १० गा
यंतीभिश्च कर्माणि शुभाणि रामकृष्णयोः स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितं ११ अग्न्यर्कातिथिगोविप्र
पितृदेवार्चनादिभिः धूपैर्दीपैश्च माल्यैश्च गोपावासैर्मनोरमं १२ सर्वतः पुष्पितवनं द्विजालिकुल
नादितं हंसकारंडवाकीर्णैः पद्मखंडैश्च शोभितं १३॥ ९ लब्धवानिति सूचयति ८ व्रजं वर्णयति पंचभिः वासितार्थे इ
त्यादिना वासिताः पुष्पवत्यो गावस्तन्निमित्तं परस्परं युध्यद्भिः शुष्मिभिर्मत्तैर्नादितं वास्राभिर्धेनुभिर्वत्सकान्प्रति ९ विलंघद्भिरुत्प्लवद्भिः गोदोहशब्दैः सह
अभितो रवा यस्मिन् तं सुचनय देहि रक्षरोत्पाद्योय स्मिंस्तद्वेणूनां निस्वनेन च १० गायंतीभिर्गोपीभिर्गोपैश्च सुविराजितं ११ अग्न्याद्यर्चतान्वितैर्गोपगृहैः

प्रेयोदिभिश्च मनोरमं १२ वंद्वं स महे ९३

श्रीरामः
१४२

540

अर्चयन्पूजयामास १४ कशिपौ शय्यायां संविष्टं १५।१६ साधूनामितिकर्मणा वध्री १७ गावो गावः गिरिर्गोवर्द्धनं १८ अप्यायास्यति आ
गमिष्यतिकिं १९ श्रीकृष्णोपकारस्मरणादिनिरनुपमानंदेनाभिभूयमान आह दवाग्नेरित्यादिना वातवर्षाभ्येति वृषासर्पाद्येति अन्ये

तमागतं समागम्य कृष्णस्यानुचरं प्रियं नंदः प्रीतः परिष्वज्य वासुदेवधियार्चयन् १४ भोजितं परमा
न्नेन संविष्टं कशिपौ सुखं गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः १५ कच्चिदंग महाभाग सखा नः शू
रनंदनः आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः १६ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना
साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा १७ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् गोपान्व्रजं चा
त्मनाथं गावो वृंदावनं गिरिं १८ अप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुं तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सु
स्मितेक्षणं १९ दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना २० स्म
रतां कृष्णवीर्याणि लीलापांगनिरीक्षितं हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः २१ सरि
च्छैलवनोद्देशान्मुकुंदपदभूषितान् आक्रीडानीक्षमाणानां मनो याति तदात्मतां २२ मन्ये कृष्णं च
रामं च प्राप्ताविह सुरोत्तमौ सुराणां महदर्थाय गर्गस्य वचनं यथा २३॥ ०० भ्यो दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षितास्म २०।
किंच स्मरतामिति लीलया अपांगेन हेऽंग हे उद्धव २१ न केवलं शिथिला एव किंतु शनैरुपरमतीत्याह सरिच्छैलेति सरितः शैलाश्च वनोद्देशाश्च तानाक्रीडस्थानानि २२

नोयदू

पां

क्रीं

कृष्णरामौ प्राप्य महदर्थं गर्गस्य वचनं यथा २३

541

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द॰श॰पू॰ नेकेव लंतद्वचनानुसारेणैव व्यवहारसंवादादपीत्याह कंस इति २४ इभराड्यष्टिमिव तालत्रयप्रमाणं धनुर्बभंज २५।२६।२७।२८।२९
१४३ ३०। अखिलगुरुत्वमेवजनकत्वेन नियंतृत्वेन चाह एतावि ति रामोमुकुंद इश्चैत्येतौ विश्वस्य वीजयोनिर्मित्तोपादाने॰ ननु प्रधानपु

कंसं नागायुतप्राणं मल्लौ गजपतिं तथा अवधीष्टां लीलयैव पशूनिव मृगाधिपः २४ तालत्रयं महा
सारं धनुर्यष्टिमिवेभराट् बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं २५ प्रलंबो धेनुकोरिष्टस्तृणावर्त्त
बकादयः दैत्याः सुरासुरजितो हतायेनेह लीलया २६ शुकउवाच इति संस्मृत्य संस्मृत्य नंदः कृ
ष्णानुरक्तधीः अत्युत्कंठोभवत्तूष्णीं प्रेमप्रसरविह्वलः २७ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च
शृण्वंत्यश्रून्यवास्राक्षीत्स्नेहस्नुतपयोधरा २८ तयोरित्थं भगवति कृष्णे नंदयशोदयोः वीक्ष्यानु
रागं परमं नंदमाहोद्धवो मुदा २९ उद्धव उवाच युवां श्लाघतमौ नूनं देहिनामिह मानद नारायणे
खिलगुरौ यत्कृता मतिरीदृशी ३० एतौ हि विश्वस्य च वीजयोनी रामो मुकुंदः पुरुषः प्रधानं अन्वी
य भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ३१॥

९ एतयोर्वीजयोनित्वं प्रसिद्धं अत आह पुरुषप्रधानमिति पुरुषो
शः प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावित्याह अन्वीयभूतेष्वनुप्रविश्य भूतानां च तदुपहितस्य विलक्षणस्य नानाभेदस्य ज्ञानस्य जीवस्य ईशाते श्रीरामः
ईश्वरौ नियंतारौ भवतः कुतः पुराणौ अनादित्वात्कारणत्वात् ततश्च नियंतृत्वमित्यर्थः ३१॥ श्रीरामो जयतितराम् श्रीगोपालाय नमो नमः १४३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राज्ञा धृतराष्ट्रेण वसंति शुश्रुमस्रुत च तो वयं ॥ ३ ॥ मुखाय पुत्रा दुर्योधनादयः तद्वशेन गच्छतीति तथा यतः अंधदृक् अंधनेत्रः ३४
३५ ॥ ३६ ॥ इति दशमे टीकायां एकोनपंचाशत्तमे तु गत्वाक्रूरो गजाह्वयं राज्ञः स्वभ्रातृपुत्रेषु बुध्वा वैषम्य मागमत् ॥ पौरवेंद्रगणांय

पितर्युपरते बालाः सह मात्रा सुदुःखिताः ॥ आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुमः ॥ ३३ ॥ तेषु राज्ञोंबिका पुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्तते नूनं दुःपुत्रवशगोंधदृक् ॥ ३४ ॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥ इत्यक्रूरं समादिश्य भगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीभागवते महापुराणे दशमस्कंधेऽक्रूरागमनो नामाष्टचत्वारिंशोऽध्यायः ४८ शुक उवाच स गत्वा हास्तिनपुरं पौरवेंद्रयशोंकितं ॥ ददर्श तत्रांबिकेयं सभीष्मं विदुरं पृथां ॥ १ ॥ सहपुत्रं च वाह्लीकं भारद्वाजं सगौतमं ॥ कर्णं दुर्योधनं द्रौणिं पांडवान्सुहृदोपरान् ॥ २ ॥ यथावदुपसंगम्य बंधुभिर्गांदिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययं ॥ ३ ॥ उवास कतिचिन्मासान्राज्ञो वृत्तविवित्सया ॥ दुःप्रजस्याल्पसारस्य खलछंदानुवर्तिनः ॥ ४ ॥

शोभिः तत्रस्तत देवब्राह्मणाग्नियतनादिभिरंकितं ॥ १ ॥ वाह्लीकपुत्रः सोमदत्तिः भारद्वाजो द्रोणः गौतमः कृपः ॥ २ ॥ अव्ययं कुशली ॥ ३ ॥ दुःप्रजस्य [illegible] तु असाम्यल्पसारस्य मंदधृतेः कर्णादीनां छंदमिच्छामनुवर्तितुं शीलं यस्येति तथा ॥ ४ ॥

545

किंचास्तां तावत्त्वबंधशंका यतो विद्योपाधेर्जीवात्मनोपि न वस्तुतो बंधोऽस्तीत्याह देहाद्युपाधेरिति भावो जन्मतन्मूलाभिदान साक्षात्त्वरूपतो न स्यादिति ननु मम बंधाभाववद्वत्तां त्वयामोक्षोऽपि स्यात् उभिमिति चेन्नहि बंधाभावे मोक्षासंभवादपन्नो बंधोपीत्याशंक्याह अत इति यतो नाविद्या अतो न बंधो मोक्षस्तु स्वैव शुभो न स्यातामित्यर्थः ननु एवं लेमा वधूश्च श्रुतवानसि यमुनाह्रदे तु मुक्तं दृष्टवानसि अतः कथमुभयं नास्तीत्यत आह निकाम इति स्वाभिप्रायानुरूपस्त्वयि नोऽस्माकमविवेकः

देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् अतो न बंधस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥ २२ ॥ त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः बाध्येत पाखंडपथैरसद्भिस्तदा भवान्सत्वगुणं बिभर्षि ॥ २३ ॥ स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥ अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥ २५ ॥

विवेक एव तव बोधो स्यातामिति ॥ २२ ॥ ननु तर्हि ममावतारस्तच्चरितानि च शुक्तिरजतवत् अविद्याकल्पितान्येव किं न हि न हि बपरमेव कूतश्चेतिय द्वांतः अस्यं तु तव लीलेत्याह त्वयेति त्वयोदित इति ॥ २३ ॥ सुरेश्वराद्येषु जातास्तेषां अक्षौहिणीशतानां वधेन भूभारमपनेतुं स्वांशेन रामेण सदा वर्तसे इति ॥ २४ ॥ अत एवं भूतस्य तवागमनेन कृतार्थाः स्मीत्याह अद्येति नो वसतयः हे ईश नो वसतयो गृहाः तपोवनादपि पुण्याः कुतः यावतः यावसतीस्त्वं साक्षात्प्रविष्टः कथंभूतः यस्य तव पादसलिलमेव गंगा त्रिजग

544

पुनाति त्रिपदक्षस्कं पंचदशमस्कंधटीकायां सप्तचत्वारिंशोऽध्यायः ४८

तेजः प्रभा ओजः शस्त्रादिनैपुण्यं वीर्यं शौर्यं न सहन्निरसमानैश्चिकीर्षितं कर्तुमिष्टम् ५ गरस्य विषस्य दानादि अपेशलं अन्याय्यं तेजः ओजः इत्यादिकथयामास तत्कथनोत्तरं पृथायावृत्तमाह पृथात्विति अश्रूणां कलालेशाः ययोस्ते ई

तेज ओजो बलं वीर्यं प्रश्रयार्जवसद्गुणान्। प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितं ५ कृतं च धार्तराष्ट्रैर्यद्गरदानाद्यपेशलं आचख्यौ सर्वमेवास्मै पृथा विदुर एव च ६ पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तं। उवाच जन्मनिलयं स्मरंत्यश्रुकलेक्षणा ७ अपि स्मरंति नः सौम्य पितरौ भ्रातरश्च मे भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ८ भ्रात्रेयो भगवान्कृष्णः शरण्यो भक्तवत्सलः पैतृष्वस्रेयान्स्मरति रामश्चांबुरुहेक्षणः ९ सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव सांत्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् १० कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वभावन प्रपन्नां पाहि गोविंद शिशुभिश्चावसीदतीं ११ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणां बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् १२ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने योगेश्वराय योगाय त्वामहं शरणं गता १३ श्रीशुक उवाच इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं। प्रारुदद्दुःखिता राजन्भवतां प्रपितामही १४॥

पक्षीयामयः कुलस्त्रियः ८ पैतृष्वस्रेयान्मत्पुत्रान् ९ सांत्वयिष्यति किं १० योगउपायो मायायोगस्तस्य स्वामी तस्य सं॰ हे विश्वात्मन् सर्वांतर्यामिन् हे विश्वभावन विश्वपालक प्रपन्नां शरणागतां अवसीदतीं क्लिश्यंतीं ११ आपवर्गिकात् १२ शुद्धाय धर्मात्मने ब्रह्मणे अपरिच्छिन्नाय परमात्मने जीवसखाय योगेश्वराय अणिमादियुक्ताय ज्ञानात्मने १३ प्रपितामही पांडुः तस्य भार्या

एवं यास हृसमं दुःखच यस्य सः तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेंद्रादिभिः तत्कथनैरित्यर्थः १५ बंधुभिः रामकृष्णादिभिः सौहृदेनोदितं सुहृन्मध्ये यत्तद्वदत् १६ भ्रातर्युपरते इति पांडौ पुत्रेषु सत्सु राजासनं समास्थितः इति कटाक्षः १७ भवतु तथाप्येवं वर्तमानः श्रेयो वाप्स्यति १८ अधर्मेणोति तमः नरकः इहैव महद्दुःखमिति भावः १९ नत्वात्मजानात्मजादिषु कथं समत्वं स्यात्तत्राह नेहेति अत्यंतसंवासः सम

समदुःखसुखोऽक्रूरो विदुरश्च महायशाः॥ सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः॥१५॥ यास्यन्राजानमभ्येत्य विषमं पुत्रलालसं॥ अवदत्सुहृदां मध्ये बंधुभिः सौहृदोदितं॥१६॥ अक्रूर उवाच भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन। भ्रातर्युपरते पांडावधुनासनमास्थितः १७ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन्। वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि १८ अन्यथा त्वाचरंल्लोके गर्हितो यास्यसे तमः। तस्मात्समत्वे वर्तस्व पांडवेष्वात्मजेषु च १९ नेह चात्यंतसंवासः कर्हिचित्केनचित्सह। राजन्स्वेनापि देहेन किमु जायात्मजादिभिः २० एकः प्रसूयते जंतुरेक एव प्रलीयते एकोऽनुभुंक्ते सुकृतमेक एव च दुष्कृतं २१ अधर्मोपचितं वित्तं हरंत्यन्येऽल्पमेधसः। संभोजनीयापदेशै

कस्थितिः २० तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि सह स्थितिर्नास्तीत्याह एकेति २१ किंच यदा च सह संवसंति तेदापि स्नेहेनोपार्जितं वित्तमपहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह अधर्मेति संभोजनीयाः पोष्याः पुत्रादयस्तद्व्यपदेशैः अल्पमेधसो मूढास्तस्य वित्तं हरंति जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रा हरंति तद्वत् २२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुहृद्भिश्चरितंसुस्मतोन्योन्यशिक्यादीनिति अघार्दनंशाद्वलेजेमनंभोजनंव्यक्तेतरं व्यक्ताज्जडप्रपंचादितरच्चदसत्वात्म
कंवत्सपालरूपं यद्वाव्यक्तेतरः चिद्विलास अनद्रूपमिति रूपंमजस्योरुमहानभिष्टवः तद्रूतांस्तुतिं एतच्छृण्वन्नृणोन्न
रः सर्वपुरुषार्थान्प्राप्नोति ६०।।६१।। इतिश्रीपरमानंदेनृसिंहपदषट्पदः।। व्याकरोच्छ्रीधरस्वामीयथामतिविधेस्तुतिं।। इतिदश
मे १४।। ततःपंचदशेधेनुपालनंधेनुकार्दनं कालीयक्ष्वेडतोगोपरक्षणंचनिरूप्यते १ अहिवक्त्रप्रवेशेनसख्यारिचौरसखी

एतत्सुहृद्भिश्चरितंमुरारेरघार्दनंशाद्वलजेमनंच व्यक्तेतरंरूपमजोर्वभिष्टवं शृण्वन्गृणन्नेतिनरो
खिलार्थान् ६० एवंविहारैःकौमारैः कौमारंजहतुर्व्रजे निलायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः
६१ इतिभा०द०ब्रह्मस्तुतिः।।१४।। शुक० ततश्चपौगंडवयःश्रितौव्रजेबभूवतुस्तौपशुपालसंमतौ
गाश्चारयंतौसखिभिःसमंपदैर्वृंदावनंपुण्यमतीवचक्रतुः १ तन्माधवोवेणुमुदीरयन्वृतोगोपै
र्गृणद्भिःस्वयशोबलान्वितः पशून्पुरस्कृत्यपशव्यमाविशद्विहर्तुकामःकुसुमाकरंवनं २

ततः कुसुमाकरं प्रविश्य पक्वफलं तालालिकाननम्।।२।। ततइति पशुपालसंमतौ पशुपालैःस
म्मतौ पशुपालानांवासम्मतौ ईषद्वयोर्वत्सातिरेकमनुकृतवन्तावित्यर्थः अतीवचक्रतुःसर्वतः प्रस
रणेन १ स्वयशोगृणद्भिः गोपैर्वृतःस्वलक्ष्यनंप्राविशत्।।२।। श्रीमद्गोपालोजयतितराम् श्रीराम

किंचयानेवंपुष्णातितेधनमादायमृताजीवंतोपिवातंपरित्यजंति स्ववुध्यास्वीयांस्त्वामिमानेनरायःअर्थाःअकृता
र्थप्राप्तभोगं २३ सपुनःपापेकपार्थयोनरकंवसतीत्याह स्वयमिति असिद्धार्थःअपूर्णमनोरथः २४ अयम्यनि
यम्यशान्तासन्समोभवेति २५ हेदानपते अक्रूर नंक्ष्यामि २६ सौदामिनी चलेअस्थिरे सुदामापर्वतः तत्र

पुष्णातियानधर्मेणस्वबुध्यातमपंडितं।। तेकृतार्थंप्रहिण्वंतिप्राणारायःसुतादयः।।२३।।
स्वयंकिल्बिषमादायतेस्त्यक्तोनार्थकोविदः।। असिद्धार्थोविशत्यंधंस्वधर्मविमुखस्त
मः।।२४।। तस्माल्लोकमिमंराजन्स्वप्नमायामनोरथम्।। वीक्ष्यायम्यात्मनात्मानंसमः
शान्तोभवप्रभो।।२५।। श्रीधृतराष्ट्र उवाच यथावदसिकल्याणीं वाचंदानपतेभवा
न्।। तथानयानतृप्यामिमर्त्यःप्राप्ययथामृतम्।।२६।। तथापिसूनृतासौम्यहृदिन
स्थीयतेचले।। पुत्रानुरागविषमेविद्युत्सौदामिनीयथा।।२७।। ईश्वरस्यविधिं दा २
कोनुविधुनोत्यन्यथापुमान्।। भूमेर्भारावताराययोवतीर्णोयदोःकुले।।२८।।

भवाविशुद्धेवतस्मिन्स्फटिकशिलामयेसदृसेवातिस्फुरिताविद्युत्यथालीयतेसंतद्वदित्यर्थः २७ नन्वेवंजा ।।श्रीराम।।
नतोऽपिकथमेवंमोहइतिचेदत्राह।। ईश्वरस्येति।। ईश्वरस्यविधिं मायामित्यर्थः २८ श्रीरामः ।।२५५।।

भा॰द॰पू॰ तद्वनं निरीक्ष्य रंतुं मनो दधे॰ कथंभूतं मंजुघोषा ये अलिमृगद्विजाः भ्रमरमृगपक्षिणस्तैराकुलं व्याप्तं महन्मनःप्रख्यपयः सरस्वता महतां मनसा
५५ तुल्यं स्वच्छं पयो यस्मिन्नत्सरः आश्रये नास्ति यस्य वातेन वातेनेति शैत्यगुणः॰ शतपत्रगंधिनेति॰ परिमलवत्त्वं पुष्टं वनततिमाद्यंसूचितं २
अरुणपल्लवश्रिया सह स्पृशंत्यः शिखाः शाखाग्राणि येषां तान् ४ तरुजन्म यत्कृतं तस्य तमसः पापस्यापहत्येनाशाय अथवा येन त्व

तन्मंजुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयः सरस्वता वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ३ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः स्पृशच्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ४ श्रीभगवानुवाच॰ अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणं नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतं ५ एतेलिनस्तव यशोखिललोकतीर्थं गायंत्य आदिपुरुषानुपथं भजंते प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेपि न जहत्यनघात्मदैवं ६ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान्हि सतां निसर्गः ॥ ७ ॥ श्रीगोपाल ॥
याद्धरेण सर्वोपकारकं तरुजन्म कृतं ते त्वां नमंति॰ एवं स्थावरप्रशंसोपि जन्म यद्ज्ञानरूपं तमोस्ति तस्यापहत्यै ५ हे अनघ वने गूढमपि त्वां न त्यजंति त्वयि मनुष्यवेषेण निगूढे सति मुनयोप्यलिवेषेण निगूढास्त्वां भजंतीत्यर्थः ६ इयान्हि सतां निसर्ग इति यदस्ति स्वस्मिन्तद्गृहमागताय महते समर्पयंतीति ७ राम॰
५५

१ तथा
तृणवीरुधस्तव पादौ स्पृशंतीति॰ करजाभिमृष्टाः नखैः स्पृष्टाः सदयैर्वलोकनैः श्रीरपि यत्स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्याध
न्या इति ८ एवं श्रीमद्वृन्दावनं प्रति प्रीतः सन्नद्रेः समीपवर्तिसरित्तटेषु पशून्संचारयंस्तानुगः प्रीतमना रेमे ९ तामेव रतिमाह॰ दशभिः क्वचि

धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः नद्योद्रयः खगमृगाः सदयावलोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ८ श्रीशुक उ॰ एवं वृन्दावनं श्रीमान्श्रीतः प्रीतमनाः पशून् रेमे संचारयन्नद्रेः सरिद्रोधःसु सानुगः ९ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः उपगीयमानचरितः स्रग्वी संकर्षणान्वितः १० अनुजल्पति जल्पंतं कलवाक्यैः शुकं क्वचित् क्वचित्सवल्गु कूजंतमनुकूजति कोकिलं ११ क्वचिच्च कलहंसानामनुकूजति कूजितं अभिनृत्यति नृत्यंतं बर्हिणं हासयन्क्वचित् १२ मेघगंभीरया वाचा नामभिर्दूरगान्पशून् क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया १३ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः अनुरौति स्म सत्वानां भीतवद्व्याघ्रसिंहयोः १४ क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपबर्हणं स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः १५ ॥

भिनृत्यति॰ बर्हिणं अभिमुखो नृत्यतीति वा सखीन्हासयन् १२।१३ चकोरादीन्नेनुकृत्य रौति कदाचिच्च सत्वानां मध्ये व्याघ्रसिंहयोस्ताभ्यां भीत
तवद्द्रवति सत्वेसु पलायमानेषु पलायत इत्यर्थः॥ तयोः सत्वानां वलोदूर्णां भीतवद्द्रवतीति वा १४ आर्यमग्रजं विश्रमयति विगतश्रमं करोतीति १५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भा॰द॰पू॰
५६

मिथोऽनुत्यादीन्कुर्वतो गोपान्प्रशशंसतुः १६।१७ व्यजनैः पल्लवादिनिर्मितैः १८।१९। ईशचेष्टित इति निगूढस्वमायत्वेऽपि तदीरात्नाईशस्ये

नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः गृहीतहस्तौ गोपालान्हसन्तौ प्रशशंसतुः १६ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्शितः वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्हणः १७ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः अपरे हतपाप्मानो व्यजनैः समवीजयन् १८ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः गायन्ति स्म महाराज स्नेहक्लिन्नधियः शनैः १९ एवं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडम्बयन् रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः २० श्रीदामा नाम गोपालो रामकेशवयोः सखा सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् २१ राम राम महासत्त्व कृष्ण दुष्टनिबर्हण इतोऽविदूरे सुमहद्वनं तालालिसंकुलं २२ फलानि तत्र भूरीणि पतन्ति पतितानि च सन्ति किन्त्ववरुद्धानि धेनुकेन दुरात्मना २३ सोऽतिवीर्योऽसुरो राम हे कृष्ण खररूपधृक् आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः २४ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् न सेव्यते पशुगणैः पक्षिसंघैर्विवर्जितं २५ विद्यन्तेऽभुक्तपूर्वाणि फलानि सुरभीणि च एष वै सुरभिर्गन्धो विषूचीनोऽवगृह्यते २६ प्रयच्छ तानि नः कृष्ण गन्धलोभितचेतसां वाञ्छास्ति महती राम गम्यतां यदि रोचते २७॥

॥ वचेष्टितानि दृश्यन्ते यस्मः २०। ईशचेष्टितमेव दर्शयितुमाह श्रीदामेति। तोककृष्णः कश्चिद्गोपः २१ तालालिसंकुलं तालानां पंक्तिभिर्व्याप्तं २२।२३।२४।२५ विषूचीनः सर्वतः प्रसृतः २६।२७।

रामः
५६

552

२८।२९। सनगं सवृक्षं ३० प्रत्यक्पद्भ्यां पश्चिमाभ्यां। काशब्दमिति। गर्दभध्वन्यनुकारिणीं पर्यसरत्परितो धावदित्यर्थः ३१ उपक्रोष्टा गर्दभः पराक्

एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू २८ बलः प्रविश्य बाहुभ्यां तालान्संपरिकम्पयन् फलानि पातयामास मतंगज इवौजसा २९ फलानां पततां शब्दं निशम्यासुररासभः अभ्यधावत्क्षितितलं सनगं परिकम्पयन् ३० समेत्य तरसा प्रत्यक्पद्भ्यां पद्भ्यां बलं बली निहत्योरसि काशब्दं मुञ्चन्पर्यसरत्खलः ३१ पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ३२ स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३३ तेनाहतो महातालो वेपमानो बृहच्छिराः पार्श्वस्थं कम्पयन्भग्नः स चान्यं सोऽपि चापरं ३४ बलस्य लीलयोत्सृष्टखरदेहहताहताः तालाश्चकम्पिरे राजन्महावातेरिता इव ३५ नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ३६ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबान्धवाः ३७ तांस्तानापततः कृष्णो रामश्च नृप लीलया गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३८॥

॥ प्रतिमुखो परो पश्चिमौ हृत्तुं ३२ तृणराजस्याग्रे क्षिप्तवान् ३३ पार्श्वस्थं तालं ३४ उत्सृष्टेनोत्क्षिप्तेन खरदेहेन हतैराहताश्चकंपिरे कंपयन्तः ३५ यस्मिन्निदं विश्वमोतप्रोतं तन्तुषु पट इव ग्रथितं सर्वतोऽनुस्यूतमित्यर्थः

वलं

५८

553

४९।४८।४९।५०।५१।संप्रतिसंद्युरव इताप्राप्तास्मृतिर्यैस्तेसंप्रतीतस्मृतयः यद्वासम्यक्प्राप्तास्मृतिर्यैस्तेरिति ५२।परेतस्यमृतस्यात्मनःपुनर्जी
वनंगोविंदानुग्रहेक्षितंज्ञातवंतः ५३ इतिदशमेटीकायां१५षोडशेकालियस्योक्तोनिग्रहोयमुनाह्रदे·तत्पत्नीभिस्तुतेनाथकृष्णेनानुग्र
हःकृतः१कृष्णांरासभद्देतैया अगधाताल फलान्यलं· प्रीतोन्द्रत्यत्कृष्णाद्दंगे कालियस्यकत्वानिधिः २उदवासयत उत्सारितवान १ बहूनि

जनन्युपहृतंप्राश्यस्वाद्वन्नमुपलालितौ संविश्यवरशय्यायांसुखंसुषुपतुर्व्रजे ४७ एवंसभगवान्कृष्णो
वृंदावनचरः क्वचित· ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ४८ अथगावश्चगोपाश्चनिदाघातपपी
डिताः दुष्टंजलंपपुस्तस्यात्तृषार्त्ताविषदूषितं ४९ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः निपेतुर्व्यसवःस
र्वेसलिलांतेकुरूद्वह ५० वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ईक्षयामृतवर्षिण्यास्वनाथान्स
मजीवयत ५१ तेसंप्रतीतस्मृतयः समुत्थायजलांतिकात् आसन्सुविस्मिताः सर्वेवीक्षमाणाःपरस्परं
५२ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितं पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ५३ इतिश्रीभागवते
दशमेरासभवधः १५ शुकउवाच· विलोक्यदूषितांकृष्णांकृष्णः कृष्णाहिनाविभुः तस्याविशुद्धिमन्विच्छन्
सर्पंतमुदवासयत १ राजोवाच· कथमंतर्जलेगाधेन्यगृह्णाद्भगवानहिं सवैबहुयुगावासंयथासीद्वि

युगान्यावासोतमहिं सवैअहिः अजलचरोपितस्मिन्नंतर्जलेयथायेनप्रकारेणासीत् अथवाबहूनियुगानिआवासोयथाभवतितथाकेनप्रका

प्रकथ्यताम ॥२॥श्रीराम
रासंवेत्तासीदिविकथ्यताम २

रजोभि२

भा·द·पू·
५७

घनैर्नभइवभुर्वस्त्तलंरराजतत्रफलप्रकरणासंकीर्णमितिदैत्यदेहैः फलतालाग्रैश्चसंकीर्णमितिअफलारुणश्वेतनीलघनसा
दृश्यसंपादनं ३९।४० आदन्अभक्षयन् ४१।४२गोरजश्छुरितेषुकुंतलेषुबद्धंबर्हंवन्यानिप्रसूनानिचयस्यरुचिरमीक्षणंचारुहासश्चय

फलप्रकरसंकीर्णंदैत्यदेहैर्गतासुभिः रराजभूःसतालाग्रैर्घनैरिवनभस्तलं ३९ तयोस्तत्सुमहत्कर्मनिशम्य
विबुधादयः मुमुचुःपुष्पवर्षाणिचक्रुर्वाद्यानितुष्टुवुः ४० अथतालफलान्यादन्मनुष्यागतसाध्वसाः
तृणंचपशवश्चेरुर्हतधेनुककानने ४१ कृष्णःकमलपत्राक्षःपुण्यश्रवणकीर्तनः स्तूयमानोनु
गो गैर्गोपैःसाग्रजोव्रजमाव्रजत ४२ तंगोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासं वेणुं
क्वणंतमनुगैरुपगीतकीर्तिंगोप्योदिदृक्षितदृशोभ्यगमन्समेताः ४३ पीत्वामुकुंदमुखसारघमक्षि
भृंगैस्तापंजहुर्विरहजंव्रजयोषितोह्नि तत्सत्कृतिंसमधिगम्यविवेशगोष्ठंसव्रीडहासविनयंयद
पांगमोक्षं ४४ तयोर्यशोदारोहिण्यौपुत्रयोःपुत्रवत्सले यथाकामंयथाकालंव्यधत्तांपरमाशिषः
४५ गताध्वानश्रमौतत्रमज्जनोन्मर्दनादिभिः नीवींवसित्वारुचिरांदिव्यस्रग्गंधमंडितौ ॥ ४६॥श्री·

स्यतंदिदृक्षितदृशः दिदृक्षिताःदर्शनोत्कंठादृशोनेत्राणिर्यासांताः ४३ मुकुंदस्यमुखमेवपद्मगतंसारघंमधुअक्षिभिर्योविरहस्तस्माज्जातंतापंजहुःसवता रामः
सांसत्कृतिंकयंवाकृतांतामाह·सव्रीडेति सलज्जोहासेनविनयोयथाभवतितथायदेतत्किंअपांगमोक्षंकटाक्षदर्शनंतथातांसत्कृतिंप्राप्येति ५७

श्रीधरी·

मा॰द॰पू॰
५८

गोपालनेनव्यवदुदाराचरितंतदेवामृतंअतस्तत्कथ्यतामिति ३ अप्यमाणोपच्यमानंपयोयस्यसः अतः उपरिगच्छंतःखगायस्मिन्पतंति
४ किंचिविप्रुंप्मता अंबुकणायुक्तेनविषोदकतरंगस्पर्शिमारुतेनस्पृष्टायस्यतीरगाम्रियंतेसहृदआसीदिति ५ तंकालियंचंडोवेगोयस्यतद्धि

ब्रह्मन्भगवतस्तस्यभूम्नःस्वच्छंदवर्तिनः गोपालोदारचरितंकस्तृप्येतामृतंजुषन् ३ शुकउवाच कालिं
द्यांकालियस्यासीद्ध्रदःकश्चिद्विषाग्निना श्रप्यमाणपयोयस्मिन्पतंत्युपरिगाःखगाः ४ विप्रुष्मताविष
दोर्मिमारुतेनाभिमर्शिताः म्रियंतेतीरगायस्यप्राणिनस्थिरजंगमाः ५ तंचंडवेगविषवीर्यमवेक्ष्यतेनदु
ष्टांनदींचखलसंयमनावतारः कृष्णः कदंबमधिरुह्यततोतितुंगमास्फोट्यगाढरशनोन्यपतद्विषो
दे ६ सर्पह्रदःपुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः पर्यक्प्लुतोविषकषायवि
भीषणोर्मिर्धावन्धनुःशतमनंतबलस्यकिंतत् ७ तस्यह्रदेविहरतोभुजदंडघूर्णवार्घोषमंगवरवा
रणविक्रमस्य आश्रुत्यतत्स्वसदनाभिभवंनिरीक्ष्यचक्षुःश्रवाःसमसरत्तदमृष्यमाणः ८॥ ६ अमेववीर्यंयस्यतं

कदंबमित्याविनाश्रीकृष्णचरणस्पर्शभाग्येनसएकस्तत्तीरेनशुष्कः अमृतमाहृत्यगरुत्मनाक्रांतत्वादितिपुराणांतरे आस्फोट्यबाहुकरत
लेनाहत्यगाढादृढंकक्षारशनायेनसः ६ तस्यसर्पस्यह्रदः पुरुषश्रेष्ठस्यपतनभारेणसंक्षोभितानामुरगाणांविषेरुच्छ्वसितोंबुराशिर्यस्यसः
विषेनकषायीकृताभयंकराऊर्मयोयस्यसः पर्यक्परितःधनुःशतंप्लुतःप्रसृतः नैतच्चित्रमित्याह अनंतबलस्येति ७ भुजदंडाहतोदक

धौतंभुजजालेषुसमनितावलिम्बितोविततस्येहनामनःसर्पःसं
मसरत्समाजगाम ८

श्रीरामः
५८

भा॰ द॰ उ॰ श्रीगणेशाय नमः ततः पंचाशत्तमे तु जरासंधेमघादिव कारयित्वा बुधौ दुर्गं तन्निनाय निजं जनं १ छ
१ कपटान्नकपटैरेव हत्वा दैत्यानयत्ततः अजयच्च जरासंधं धर्मेशौ बत धार्मिकं २ अस्तिप्राप्तिसं
ज्ञे के ई यतुः जग्मतुः २ कंसश्लोकः कृमिश्रमर्षः ताभ्यां युतः ३ न्यरुणात्तरुरोध ४ तस्य बलं सेनां

श्रीशुक उवाच अस्तिप्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ मृते भर्तरि दुःखार्ते ई
यतुः स्म पितुर्गृहान् १ पित्रे मगधराजाय जरासंधाय दुःखिते वेदयांचक्रतुः स
र्वमात्मवैधव्यकारणं २ स तदप्रियमाकर्ण्य शोकामर्षयुतो नृप अयादवीं
महीं कर्तुं चक्रे परममुद्यमं ३ अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः यदु
राजधानीं मथुरां न्यरुणत्सर्वतो दिशं ४ निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरं
स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलं ५ चिंतयामास भगवान्हरिः कारणमा
नुषः तद्देशकालानुगुणं स्वावतारप्रयोजनं ६
ग॰ २ ...द्वेलं लंघितमर्यादं सागरमिव तेन तस्य बलेन संरुद्धं ५ किं बलमेव हन्मि न मागधं मा
व मगधं वाहत्वा लिंगन्हा भिमासमामगधं सर्वहन्मी निचिंतयामास ननु प्रथमं कस्यं जेष्यामी राम
१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

C05591

560

ऊणादिसू १४०

561

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005581

Diamond Book Binding House
Moh Karachh B.H.E.L Road Jawalapur

562

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA